अनुक्रमणिका ।



काव्यमाला

श्रीकूरनारायणकविप्रणीतं
सुदर्शनशतकम् ।

सटीकम् ।

रङ्गेशविज्ञप्तिकरामयस्य चकार चक्रेशनुतिं निवृत्तये ।
समाश्रयेऽहं वरपूरणीं यस्तं कूरनारायणनामिनं मुनिम् ॥

सौदर्शन्युज्जिहाना दिशि विदिशि तिरस्कृत्य सावित्रमर्चि-
र्बाह्याबाह्यान्धकारक्षतजगदगदंकारभूम्ना स्वधाम्ना ।
दोःखर्जूदूरगर्जद्विबुधरिपुवधूकण्ठवैकल्यकल्पा
ज्वाला जाज्वल्यमाना वितरतु भवतां वीप्सयाभीप्सितानि ॥ १ ॥

बाह्याबाह्यान्धकारक्षतजगदगदंकारभूम्ना बाह्यश्चाबाह्यश्च बाह्याबाह्यौ । बाह्याबाह्यौ तावन्धकारौ च बाह्याबाह्यान्धकारौ । बाह्यान्धकारो बाह्येषु स्रक्चन्दनादिषु विषयेषु भोग्यताभ्रान्तिः । 'संसारसर्पदष्टानां भोग्याः स्रक्चन्दनादयः । मोहेन मधुरायन्ते निसर्गान्निम्बसंनिभाः ॥' इत्युक्तत्वात् । ज्ञानशक्त्यादिकल्याणगुणविभूषिते सकलजगदन्तर्यामित्वेनाबाह्यविषये श्रीरङ्गनायके निर्गुणत्वादिभ्रान्तिरबाह्यान्धकारः । अथवा विशृङ्खलविजृम्भमाणतमःपटलो बाह्यान्धकारः । अज्ञानान्यथाज्ञानविपरीतज्ञानादिरबाह्यान्धकारः । द्वन्द्वान्ते श्रूयमाणोऽन्धकारशब्दः प्रत्येकमभिसंबध्यते । तेन तमसा क्षतं नष्टं यज्जगत् । नष्टप्रवृत्ति नष्टेष्टसाधनप्रवृत्ति चेत्यर्थः । तादृशस्य जगतो भुवनस्यागदंकारश्चिकित्सको भूम्ना बाहुल्यं यस्य तत्तेन । अथवा चिकित्सकस्य भूम्ना बाहुल्यमिव बाहुल्यं यस्य तत्तेन स्वधाम्ना निरर्गलविनिर्गलत्स्वतेजःपटलेन सावित्रं सवितृसंबन्धि अ.

१. अस्य टीकाकारो न ज्ञायते. भाति चायं कश्चन विशिष्टाद्वैतमतानुयायी द्रविडः-

चिंस्तेजस्तिरस्कृत्य आच्छिद्य । मद्भूतेनेत्यर्थः (!) । दिशि दिशि सर्वासु दिक्षु । चतुर्दशभुवनेष्वित्यर्थः । उज्जिहाना उद्गमाना । दोःखर्जूदूरगर्जद्विबुधरिपुवधूकण्ठो-त्स्यकल्पा दोषां भुजानां खर्जूः कण्डूतिस्तया दूरमत्यर्थं गर्जन्तः सिंहनादं कुर्वन्तो विबु-धरिपवस्त्रिदशकण्टकास्तेषां वक्षो महिष्मल्लानां कण्ठा ग्रीवास्तेषां संकल्पं मङ्गलसूत्रादि-राहित्यं तस्मिन्कल्पा समर्था संनद्धा । प्रचण्डभुजदण्डकण्डूलतया प्रलयसमयजलधरघोर-घोषाटोपलोपकृद्गर्जनतर्जनादिकरणचणनिर्जरद्विपद्धूर्धन्यविधानसंनद्धेत्यर्थः । अत एव जाज्वल्यमाना अप्रतिहतवृत्त्या प्रकाशमाना । सौदर्शनी सुदर्शनसंबन्धिनी ज्वाला भव-तामभीप्सितान्यभीष्टार्थान् वीप्सया पौनःपुन्येन वितरतु ददातु दद्यात् । एतेनाश्रिता-नामिष्टानिष्टप्राप्तिहरणनिपुणेत्युक्तम् ॥

प्रत्युद्यातं मयूखैर्नभसि दिनकृतः प्रत्तसेवं प्रभाभि-
र्भूमौ सौमेरवीभिर्दिवि वरिवसितं दीप्तिभिर्देवधाम्नाम् ।
भूयस्यै भूतये वः स्फुरतु सकलदिग्भ्रान्तसान्द्रस्फुलिङ्गं
चाक्रं जाग्रत्प्रतापं त्रिभुवनविजयव्यग्रमुग्रं महस्तत् ॥ २ ॥

सौमेरवीभिरमरगिरिसंबन्धिनीभिः प्रभाभिर्द्युतिभिर्भूमौ विश्वंभरायां प्रत्तसेवं प्रकृत-सेवं कृतपरिचर्यम् । ‘अच उपसर्गात्तः’ इति तत्वे दकारलोपः । अमरगिरिकिरणपरि-चरितमित्यर्थः । दिनकृतः सूर्यस्य मयूखैः किरणैर्नभस्याकाशे प्रत्युद्यातं प्रत्यागत्य परि-पूजितम् । प्रभाकरप्रभाविर्भावसंभावितमित्यर्थः । देवधाम्नाममरसौधानां नक्षत्राणां वा दीप्तिभिः प्रभाभिर्दिवि स्वर्गलोके वरिवसितमुपासितम् । सुरवरनिकरकनकमयसदनरु-चिररुचिचयपरिचरितमित्यर्थः । नक्षत्रप्रभासेवितमिति वार्थः । सकलदिग्भ्रान्तसान्द्र-स्फुलिङ्गं सर्वासु दिक्षु भ्रान्ताः सान्द्रा निबिडाः स्फुलिङ्गाः कृशानुकणा यस्य तत् । सकलदिगन्तरालचम्भ्रम्यमाणनीरन्ध्रकरालाग्निकणमिति यावत् । त्रिभुवनविजयव्यग्रं त्रयाणां भुवनानां विजये व्यग्रं ससंभ्रमम् । त्रिभुवनविजयव्यासङ्गनिर्जितत्रिभुवनान्तरा-लवर्तमानपरिपन्थिपरम्परमित्यर्थः । जाग्रत्प्रतापमतिस्फुरत्प्रतापदहनम् । प्रतिदिशं प्रकाशमानप्रतापप्रवृत्तिप्रकृष्टमित्यर्थः । उग्रं प्रतिभटभयंकरम् । चाक्रं चक्रस्येदं चक्रराज-संबन्धि तत्प्रसिद्धं महत्तेजो वो युष्माकं भूयस्यै बहुतरायै भूतये भूयात् । ‘बहोर्लोपो भू च बहोः’ इति ॥

पूर्णे पूरैः सुधानां सुमहति लसतः सोमबिम्बालवाले
बाहाशाखावरुद्धक्षितिगगनदिवश्चक्रराजद्रुमस्य ।
ज्योतिश्छद्मा प्रवालः प्रकटितसुमनःसंपदुत्तंसलक्ष्मीं
पुष्णन्नाशामुखेषु प्रदिशतु भवतां सप्रकर्षं प्रहर्षम् ॥ ३ ॥

पूरैरमृतरसप्रवाहैः पूर्णे तस्मिन् । मधुरतरसुधारसप्रवाहप्रपञ्चपरिपूरित इति

किम् । वनभुवि काननप्रदेशे प्रवालः पावकः किम् । एवंप्रकारेण प्रमुग्धैरविदग्धैः प्रेक्ष्यमाणो दृश्यमान उत्प्रेक्ष्यमाणः शङ्क्यमानः । सर्वत्र काकुरनुसंधेया । 'किं नोर्ध्वःस्वरलब्धैरकाकुः' इति भरतेनोक्तम् । दनुजद्वेषिणो रक्षःसंहारिणः सुदर्शनपुरुषस्य स्वैपराशिरस्त्विषां संबन्धि लेपं स चासौ राशिश्च वः साधिष्ठं प्रमोदं संतोषं प्रबोधं विज्ञानं वा जनयतूत्पादयतु ॥

भानो भा नो त्वदीया स्फुरति कुमुदिनीमित्र ते कुत्र तेज-
स्तारास्थारादधीरोऽस्यनल न भवतः स्वैरमैरंमदार्चिः ।
शंसन्तीत्थं नभःस्था यदुदयसमये चक्रराजांशवस्ते
युष्माकं प्रौढतापप्रभवभवगदापक्रमाय क्रमन्ताम् ॥ १३ ॥

यदुदयसमये चक्रज्वालासमुदयकाले नभःस्था वियति दिव्यविमानारूढा देवा तेजःपदार्थानुद्दिश्येत्थं सोपहासं शंसन्ति वदन्ति । किमिति । हे भानो सूर्य, त्वदीया त्वत्संबन्धिनी भा दीप्तिर्नो स्फुरति न प्रकाशते । हे कुमुदिनीमित्र चन्द्र, ते तेजश्चन्द्रिका कुत्र कस्मिन्प्रदेशे विलीनम् । हे ताराः, आराद्दूरत एव स्थ भवथ । अनल पावक, अधीरोऽसि । सा ज्वाला त्वां न गणयति किमर्थं चपलो भवसीत्यर्थः । हे ऐरंमदार्चिः सौदामिनीसंबन्धितेजः, भवतः स्वैरं न निरन्तरावर्तनानयुक्तम् (?) । अर्चिःशब्दस्य नपुंसकस्यापि 'अर्चिर्हेतिः शिखा स्त्रियाम्' इति स्त्रीलिङ्गत्वपक्षेऽप्येवं योज्यम् । ऐरंमदार्चिर्विद्युत्संबन्धिनी अर्चिस्तेजो यस्य पुरुषस्य स ऐरंमदार्चिस्तस्य संबन्धी विद्युत्पुरुष इत्यर्थः । ते तादृशा अस्त्रराजांशवश्चक्रराजमयूखा युष्माकं प्रौढश्चासौ तापश्च तस्य प्रभवो जन्मसदनं स चासौ भवश्च स एव गदस्तस्यापक्रमो निष्क्रमणं तस्मै क्रमन्तां पादप्रचारं कुर्वन्तु ॥

जग्ध्वा कर्णेषु दूर्वाङ्कुरमरिसुदृशामक्षिषु स्वर्वधूनां
पीत्वा चाम्भश्चरन्त्यः सवृषमनुगता वल्लवेनादिमेन ।
गावो वश्चक्रभर्तुः परममृतरसं प्रश्रितानां दुहाना
ऋद्धिं स्वालोकलुप्तत्रिभुवनतमसः सानुबन्धां ददन्ताम् ॥ १४ ॥

अरिसुदृशां शत्रुयुवतीनां कर्णेषु दूर्वाङ्कुरं कर्णावतंसीकृतगारुत्मतरत्नप्रभापटलरमणीयनूतनदूर्वादलं जग्ध्वा । भक्षयित्वेत्यर्थः । शत्रुस्त्रीणां वैधव्यं विधायेति यावत् । स्वर्वधूनाममररमणीनामक्षिषु नयनेष्वम्भः पीत्वा जलं निपीय । रक्षोविक्षोभितदिविषन्महिषीविलोचनविनिर्गताश्रुपरम्परां निवारयित्वेत्यर्थः । पशवस्तृणं जग्ध्वा तदनु जलं पिबन्तीति प्रसिद्धिः । सवृषं वृषेण धर्मेण ऋषभेण च सह वृत्तिर्यस्मिस्तत् चरन्त्यो विचरन्त्यः । आदिमेन चिरन्तनेन वल्लवेन गोपालेनानुयाता अनुगम्यमानाः । प्रश्रितानामृतरसं निरतिशयानन्दं दुग्धं च परमत्यर्थं दुहानाः प्रस्नुवानाः । स्वालोकलुप्तत्रिभुवन-

तमसः स्वालोकेन स्वप्रकाशेन स्वदर्शनेन वा कृतं निरस्तं त्रिभुवनतमोऽज्ञानान्धकारं याभिस्ताः । चक्रभर्तुः सुदर्शनराजस्य भासः किरणाः सानुबन्धां नैरन्तर्येणानुवर्तमाना-मृद्धिं समृद्धिं ददन्तां वितरन्तु । सानुबन्धशब्दः किरणविशेषणतया वा योज्यः ॥

सेनां सेनां मघोनो महति रणमुखेऽलं भयं लम्भयन्ती-
रुत्सेकोष्णालुदोष्णां प्रथमदितिजदामावलीर्यावलीढे ।
विश्वं विश्वंभराढ्यं रथपदधिपतेर्लीलया पालयन्ती
वृद्धिः सा दीधितीनां वृजिनमनुजनुर्मार्जयत्वर्जितं वः ॥ १५ ॥

महति रणमुखे महत्तरसंगरराग्रे इनाः प्रभवन्तीः सहिताम् । 'इनः सूर्ये प्रभौ' इत्यमरः । मघोनः शक्रस्य सेनामलर्थं भयं लम्भयन्तीः । उत्सेकोष्णदोष्णः उत्सेकेन गर्वेणोष्णालूनि उष्णं परजनसमृद्धिं न सहन्त इत्युष्णालूनि मदातिशयेन परविभवासहिष्णूनि । 'शीतोष्णाभ्यामालुच्' 'न सहते इति वक्तव्यम्' । इति शीतं न सहते उष्णं न सहते इत्यालुच्प्रत्ययः । उष्णासहिष्णूनि दोष्णि भुजा यासां ताः पूर्वदितिपदां पूर्वदेवानामावलीः पङ्क्तीर्यावलीढे आस्वादयति । विश्वं विश्वंभराढ्यं विश्वंभराढ्या यस्य तं विश्वं पृथिव्यादिपञ्चभूतात्मकं जगत्कर्म लीलया अनायासेन पालयन्ती रक्षन्ती रथपदधिपतेः सुदर्शनपुरुषस्य दीधितीनां द्युतीनां वृद्धिरनुजनु जनुषि जनुषि अर्जितं संपादितं वृजिनं दुरितं मार्जयतु । शोधयत्वित्यर्थः ॥

तप्ता स्वेनोष्मणेव प्रतिभटवपुषामस्रधारां धयन्ती
प्राप्तेव क्षीबभावं प्रतिदिशमसकृत्तन्वती घूर्णितानि ।
वंशास्थिस्फोटशब्दं प्रकटयति पटून्यावहन्त्यट्टहासा-
न्भाः सा वः स्यन्दनाङ्गप्रभुसमुदयिनी स्पन्दतां चिन्तिताय ॥ १६ ॥

या भाः स्वेन स्वकीयेनोष्मणा औष्ण्येनेव तप्ता दह्यमाना असह्यप्रतापवती प्रतिभटवपुषां परिपन्थिशरीराणामस्रधारां रुधिरधारां धयन्ती पिबन्ती क्षीबभावं मत्ततां प्राप्तेव गतेव प्रतिदिशं दिशि दिशि घूर्णितानि घूर्णनान्यसकृदनेकशस्तन्वती कुर्वती वंशास्थिस्फोटशब्दम् । वंशवत्स्थितत्वाद्वंशास्थीत्युच्यते । वंशो नाम चरमभागावस्थितः शरीराधारस्तस्यास्थि तस्य स्फोटः स्फुटनं तस्मात्संजातः शब्दश्चिटचिटायनानो ध्वनिस्तमावहन्ती धारयन्ती । कुर्वतीत्यर्थः । पटून्क्षोभसमर्थानट्टहासान्विशृङ्खलहसितानि प्रकटयति व्यपदिशति । एवं चाघटमानशब्दोऽट्टहास इति सूचयन्ती । लोके तावन्मेदुरा प्रमदा उष्णालुः सती मदिरां पीत्वा प्रमत्ता भूत्वा घूर्णितानि प्रकटयति हसितानि च विदधाति । स्यन्दनाङ्गप्रभुसमुदयिनी स्यन्दनाङ्गप्रभोश्चक्रराजात्समुदयः सोऽस्यास्तीति समुदयिनी सा वश्चिन्तिताय चिन्तितार्थसिद्धये स्पन्दतां चेष्टताम् ॥

दैत्यैरासेव्यमानो दनुजभटभुजादण्डदर्पोष्मतप्तै-
राशारोधोतिलङ्घी लुठदुडुपटलीलक्ष्यडिण्डीरपिण्डः ।
रिङ्गज्ज्वालातरङ्गत्रुटितरिपुतरुव्रातपातोग्रमार्ग-
श्चाक्रो वः शोचिरोघः शमयतु दुरितापह्नवं दाववह्निम् ॥१७॥

दनुजभटभुजादण्डदर्पोष्मतप्तैः दनुजभटा राक्षसवीरास्तेषां भुजा एव दण्डास्तेषां दर्पो गर्वस्तस्मात्संजातमूष्म तेन तप्तैर्दैत्यैरासेव्यमानः । उष्णतप्ता जलप्रवाहं प्रविशन्ति । आशारोधोतिलङ्घी आशा दिश एव रोधांसि तटान्यतिलङ्घितुं शीलमस्यास्तीत्यतिलङ्घी । लुठदुडुपटलीलक्ष्यडिण्डीरपिण्डः लुठन्ती परिवर्तमाना उडूनां नक्षत्राणां पटली समूहः सैव लक्ष्यं व्याजो यस्य स एव डिण्डीरपिण्डः उडुपटलीव्याजडिण्डीरपिण्डः फेनपटलो यस्य सः । रिङ्गज्ज्वालातरङ्गत्रुटितरिपुतरुव्रातपातोग्रमार्गः । ज्वाला एव तरङ्गाः रिङ्गन्तश्चलन्तश्च ते ज्वालातरङ्गाश्च तैस्त्रुटितास्ते च रिपुतरवः शत्रुवृक्षास्तेषां व्रातः समूहस्तस्य पातः पतनं तेनोग्रो भयंकरो मार्गो यस्य सः । चाक्रः सुदर्शनसंबन्धी शोचिरोघस्तेजःप्रवाहः । 'ओघो वृन्देऽम्भसां रये' इत्यमरः । वो युष्माकं दुरितापह्नवं दुरितं पापमपह्नव आवरणमाच्छादनं यस्मिन्स तं दाववह्निं दावानलं शमयतु निर्वापयतु । दुरितशब्दाभिहितं दावदहनं विनाशयत्वित्यर्थः ॥

भ्राम्यन्ती संश्रितानां भ्रमशमनकरी छन्नसूर्यप्रकाशा
सूर्यालोकानुरूपा रिपुहृदयतमस्कारिणी निस्तमस्का ।
धारासंपातिनी च प्रकटितदहना दीप्तिरस्येशितुर्वै-
श्चित्रा भद्राय विद्रावितविमतजना जायतामायताय ॥ १८ ॥

भ्राम्यन्ती स्वयं भ्रमणानि कुर्वती संश्रितानामाश्रितानां भ्रमशमनकरी । भ्रान्तिनाशिनीत्यर्थः । स्वयं भ्रमन्त्यप्याश्रितभ्रान्तिं निवारयतीति चित्रम् । छन्नसूर्यप्रकाशा आच्छादितः सूर्यस्य प्रकाशः प्रभा यया सा । सूर्यालोकानुरूपा सूरिजनप्रकाशनदर्शनयोरनुरूपा । 'आलोकौ दर्शनोद्द्योतौ' इत्यमरः । रिपुहृदयतमस्कारिणी शत्रुहृदयविमोहिनी । निस्तमस्का सर्वज्योतीरूपा । धारासंपातिनी प्रकटितदहना आसारवत्यपि प्रकटितपावका । विद्रावितविमतजना पलायिताः शत्रुजना यया सा । प्रधावितशत्रुपरम्परेत्यर्थः । अस्येशितुश्चक्रराजस्य चित्रा अद्भुता दीप्तिः प्रभावः आयताय दीर्घाय भद्राय मङ्गलाय जायतां प्रादुर्भवतु ॥

निन्ये वन्येव काशी दवशिखिजटिलज्योतिषा येन दाहं
कृत्या वृत्त्या विलिल्ये शलभसुलभया यत्र चित्रप्रभावे ।
रुद्रोऽप्यद्रेर्दुहित्रा सह गहनगुहां यद्भयादभ्ययासी-
द्दिश्याद्दिश्यार्चितो वः स शुभमनिभृतं शौरिहेतिप्रतापः ॥१९॥

[illegible] सर्वदेव समानैव सा गौर्नु गोऽस्तिवित्युम् । [illegible]
[illegible] समानैव गौर्नु न सा [illegible]
[illegible] दीप्यते प्रकाशते इत्यर्थः । अनूनरसस्यन्दिनी मोक्षानन्दं दुहाना सा गोऽग्निशा-
[illegible] ॥

दाहं दाहं सपत्नान्समरभुवि लसद्भस्मना वर्त्मना या-
न्क्रव्यादप्रेतभूताद्यभिलषितपुषा प्रीतकापालिकेन ।
कङ्कालैः कालधौतं गिरिमिव कुरुते या स्वकीर्तेर्विहर्तुं
घृणिः सांदृष्टिकं वः सकलमुपनयत्वायुधाग्रेसरस्य ॥ २२ ॥

समरभुवि संगररङ्गे सपत्नान्शत्रुवृन्दान् दाहं दाहं दग्ध्वा दग्ध्वा लसद्भस्मना लसद्विसरद्भस्म भसितं यस्य तत् तेन । क्रव्यादप्रेतभूताद्यभिलषितपुषा प्रेतादिवाञ्छितपोषकेण । प्रीतालुब्धाः कापालिका यत्र तेन वर्त्मना मार्गेण यान् गच्छन् यो घृणिः स्वकीर्तेर्विहर्तुं यशःसंचाराय कङ्कालैरस्थिविशेषैः कालधौतं स्वर्णकृतं गिरिमिव कुरुते । 'कालकूटं गिरिं' इति वा पाठः । आयुधाग्रेसरस्य चक्रस्य स घृणिर्ज्वाला वः सकलं सांदृष्टिकं सद्यःकालिकं फलमुपनयतु प्रापयतु ॥

दग्धानां दानवानां सभसितनिचयैरस्थिभिः सर्वशुभ्रां
पृथ्वीं कृत्वापि भूयो नवरुधिरझरीकौतुकं कौणपेभ्यः ।
कुर्वाणं वाष्पपूरैः कुचतटघुसृणक्षालनैस्तद्वधूनां
पापं पापच्यमानं शमयतु भवतामस्त्रराजस्य तेजः ॥ २३ ॥

दग्धानां दाहं प्रापितानां दानवानां सभसितनिचयैर्भस्मसमूहसहितैरस्थिभिः करणभूतैरतिविस्तृतां वसुधां सर्वशुभ्रां कृत्वा भूयः पुनरपि तद्वधूनां दानवीनां कुचतटघुसृणक्षालनैः कुचतटेष्वनुलिप्तकुङ्कुमरसस्य क्षालनं येषां तैः । प्रक्षालितकुचविन्यस्तकुङ्कुमद्रवैरित्यर्थः । वाष्पपूरैरश्रुप्रवाहैः । 'क्षालनात्' इति वा पाठः । कुचतटघुसृणक्षालनं वाष्पपूराणां नवरुधिरझरीसाम्यहेतुः । कौणपेभ्यः पिशाचेभ्यो नवरुधिरझरीकौतुकं नूतनरक्तप्रवाहकुतूहलं कुर्वाणं विदधत् अस्त्रराजस्य चक्रस्य तेजः पापच्यमानं परितः परिपक्वं पापं शमयतु ॥

मा गान्मोषं ललाटानल इति मदनद्वेषिणा ध्यायतेव
स्रष्ट्रा प्रोन्निद्रवासाम्बुजदलपटलप्लोषमुत्पश्यतेव ।
वज्राग्निर्मा स्म नागं व्रजदिति चकितेनेव शक्रेण वद्धैः
स्तोत्रैरस्त्रेश्वरस्य घ्नतु दुरितशतं द्योतमाना द्युतिर्वः ॥ २४ ॥

(इति ज्वालावर्णनम्)

कक्षातौल्येन कद्रूतनयफणमणीन्कल्यदीपस्य युञ्ज-
न्पातालान्तः प्रतापी निखिलमपि तमः स्वेन धाम्ना निगीर्य
दैतेयप्रेयसीनां वमति हृदि हतप्रेयसां भूयसां य-
श्चक्राग्रीयाग्रदेशो दहतु विलसितं भूयसामंहसां वः ॥ २९

यश्चक्रप्रधिः पातालान्तःप्रतापी पातालमध्यदेशप्रतपनशीलः स्वेन धाम्ना स्वकी तेजसा निखिलमपि तमो निगीर्य गिलित्वा । निर्मूलयित्वेत्यर्थः । अपिशब्दात्पूर्वं प लस्थरत्नौपधिकान्तिभिस्तत्र तत्र स्थितं तमो निरस्तं न तु निखिलमित्यर्थः । कद्रू यफणमणीन् फणिफणास्थितमणीन् कल्यदीपस्य (प्राभातिकदीपस्य) कक्ष्यातौल्येन शिखासादृश्येन युञ्जन् योजयन् प्रापयन् हतप्रेयसां हतप्रियाणां दैतेयप्रेयसीनाम् सुन्दरीणां हृदि मानसे वमति प्रथमं निगीर्णं तमः पुनरुद्गिरति असौ चक्राग्रीयाग् श्चक्रश्रेष्ठाग्रदेशः प्रधिर्वो भूयसामंहसां पापानां विलसितं निःसंकुचितं संचारं बहु भवति तथा दहतु भस्मीकरोतु । निर्मूलयत्वित्यर्थः ॥

कृष्णाम्भोदस्य भूषा कृतनयननयव्याहतिर्भार्गवस्य
प्राप्तामावेदयन्ती प्रतिभटसुदृशामुद्धटां वाष्पवृष्टिम् ।
निष्टप्ताष्टापदश्रीः सममभरचमूगर्जितैरुज्जिहाना
कीर्तिं वः केतकीभिः प्रथयतु सदृशीं चञ्चला चक्रधारा ॥३०॥

कृष्णाम्भोदः श्रीरङ्गनाथजलधरस्तस्य भूषा भूषणम् भार्गवस्य शुक्रस्य परशुरामस्य च कृता नयननयव्याहतिर्यया सा प्रतिभटसुदृशां शत्रुसुन्दरीणां वाष्पवृष्टिमश्रुवृष्टिं प्राप्तामासन्नामावेदयन्ती निष्टप्ताष्टापदश्रीस्तप्तकाञ्चनस्य श्रीः शोभेव शोभा यस्याः सा अमरचमूगर्जितैर्देवसेनाकृतसिंहनादैः समं सार्धमुज्जिहाना स्फुरन्ती चक्रधारा सुदर्शननेमिरतिचपला केतकीभिः केतकीकुसुमैः सदृशीं वः कीर्तिं प्रथयतु प्रकटयतु । चञ्चला विद्युदपि नीलनीरदभूषा निखिलजननयनमुकुलकारित्वाद्भार्गवनयननयमपि मुकुलयति स्फुरणेन महतीं वृष्टिं सूचयति तप्तकाञ्चनकमनीया च स्तनितैः संस्फुरति च ॥

वप्राणां भेदिनीं यः परिणतिमखिलश्लाघनीयां दधानः
क्षुण्णां नक्षत्रमालां दिशि दिशि विकिरन्विद्युता तुल्यकक्षः ।
निर्याणेनोत्कटेन प्रकटयति नवं दानवारिप्रकर्षं
चक्राधीशस्य भद्रो वशयतु भवतां स प्रधिश्चित्तवृत्तिम् ॥ ३१॥

वप्राणां प्राकाराणाम् । वप्रघटितशरीराणां प्रत्यागम्य स्थितानां शत्रूणामित्यर्थः । भेदिनीं भेदयित्रीमखिलश्लाघनीयां परिणतिं परमपुरुषरूपतां विहाय आच्छाद्य चक्राकाररूपताप्राप्तिपरिणतिं दधानः । यद्वा अखिलश्लाघ्यामुद्धतानामरातीनां भेदिनीं परितो

नम्रतां दधानश्चक्रप्रधिः परितो नम्र एव स्थितः । लोके महानेव नम्रश्चेत् श्लाघ्यतरो भवति अनम्रास्तमयति न । क्षुण्णां चूर्णितां नक्षत्रमालां नक्षत्रपङ्क्तिं दिशि दिशि विकिरन् तत्र तत्र विक्षिपन् विद्युता तडिता तुल्यकक्षास्तुल्यद्वारस्तडित्तुल्यन्यायः । तडित्सदृश इत्यर्थः । अथवा तडिता तुल्या कक्ष्या नेमेश्चलत्प्रदेशो यस्य स यः प्रधिरुत्कटेन निरतिशयवेगेन निर्याणेन गमनेन नवं दानवारिप्रकर्षं श्रीरङ्गेशस्यागच्छमानपट्टकलं अथवा देवप्रकर्षं प्रकटयति व्यक्तीकरोति चक्राधीशस्य स भद्रः कल्याणः प्रधिर्भवतां चित्तवृत्तिं चेतसो निरङ्कुशव्यापारं वशयतु । भद्रो गजश्च कूटतटविपाटनपटीयसीमखिलश्लाघ्यां परिणतिं तिर्यग्दन्तप्रहृतिं दधानः औद्धत्येन चूर्णितां सप्तविंशतिमौक्तिकविरचितहारविशेषरूपां नक्षत्रमालां सर्वत्र विकिरन् तडित्समानबन्धनरज्जुरुत्कटेन स्थूलतरेण निर्याणेनापाङ्गदेशेन नूतनं दानवारिप्रकर्षं मदजलातिशयं प्रकटयति चित्तवृत्तिं वशाधीनां करोति चक्रेशस्य महाराजस्य सकाशे तिष्ठति ॥

नाकौकःशत्रुजत्रुत्रुटनविघटितस्कन्धनीरन्ध्रनिर्य-
त्नव्यक्रव्यासहव्यग्रसनरसलसज्ज्वालजिह्वालवह्निम् ।
यं दृष्ट्वा सांयुगीनं पुनरपि विदधत्याशिषो वीर्यवृद्ध्यै
गीर्वाणा निर्वृणाना वितरतु स जयं विष्णुहेतिप्रधिर्वः ॥ ३२॥

पूर्वार्धमेकं पदम् । नाकः स्वर्ग ओकः स्थानं येषां देवानां तेषां शत्रवोऽसुरास्तेषां जत्रूण्यङ्गविशेषास्तेषां त्रुटनं छेद इत्यर्थः । तेन विघटिता वियोजिता विरूपिताश्च ते स्कन्धाश्च तेभ्यो नीरन्ध्रनिर्यत् निरर्गलविनिर्गच्छत् । नव्यं क्रव्यास्रं मांसशोणितं तदेव हव्यं हवनयोग्यं द्रव्यं तस्य ग्रसनं भक्षणं तस्मिन् रसो रागः । प्रीतिरित्यर्थः । तेन लसन्तोऽहमहमिकया नृत्यन्तस्ते च ते ज्वालाश्च त एव जिह्वा अस्य सन्तीति तथा लसज्ज्वालजिह्वालो वह्निर्यस्य स तं सांयुगीनं संयुगे साधुं यं प्रधिं दृष्ट्वा निर्वृणानाः प्रहृष्टा गीर्वाणाः पुनरपि वीर्यवृद्ध्यै स्वतः प्रवृद्धस्य चक्रप्रधेः स्वभक्त्यतिशयेन पौनःपुन्येन वीर्यसमृद्धये आशिषः सद्यः फलानाशीर्वादान्विदधति कुर्वन्ति स तादृशो विष्णुहेतिप्रधिर्भवतां विजयं वितरतु ॥

धन्वाध्वन्यस्य धारासलिलमिव घनं दुर्गतस्येव दृष्टि-
र्जात्यन्धस्येव पङ्गोः पदविहृतिरिव प्रीणनी प्रेमभाजाम् ।
पत्युर्मायाः क्रियायां प्रकटपरिणतिर्विश्वरक्षाक्षमायां
मायामायामिनीं वस्फुटयतु महती नेमिरस्त्रेश्वरस्य ॥ ३३ ॥

धन्वनि मरुभूमौ [illegible] धारासलिलं प्रवाहजलमिव अथवा वर्षस्थलधर[illegible]मिव, दुर्गतस्य दरिद्रस्य धनं निधिदानमिव, जात्यन्धस्य दृष्टि[illegible]दर्शनमिव पङ्गोः [illegible] पदन्यास इव, प्रेमभाजां भक्तानां प्रीणनी प्रीति

जननी । आनन्दकरीत्यर्थः । विश्वरक्षक्षमायां सकलजनरक्षणपटीयस्यां मायया क्रियायां प्रकृतिं विशदीकृत्य संजातक्रियायां बहुस्यां प्रजायेय इति संजातो भगवतः संकल्पविशेषः मायाः पत्युः श्रीरङ्गेशस्य प्रकटपरिणतिर्व्यक्तपरिणामः । ईश्वराकारेण परिणमतीत्यर्थः । ईश्वरपरिणामदशा सती महती महत्तरा अब्जाधिपस्य चक्रेशस्य नेमिर्वे आयामिनीं दीर्घामविच्छिन्नामविद्यां त्रुटयतु विच्छेदयतु ॥

त्राणं या विष्टपानां वितरति च यया कल्पते कामपूर्ति-
र्न स्थातुं यत्पुरस्तात्प्रभवति कलयाप्यौषधीनामधीशः ।
उन्मेषो याति यस्या न समयनियतिं सा श्रियं वः प्रदेया-
न्न्यक्कृत्य द्योतमाना त्रिपुरहरदृशं नेमिरब्जेश्वरस्य ॥ ३४ ॥

या चक्रनेमिर्जगतां त्राणं ददाति । अनुक्तसमुच्चयार्थश्चकारो जननसंहारावाकर्षति । तथा सति नेमिरुत्पत्त्यादि ददातीत्यर्थः । यया कामपूर्तिश्च कल्प्यते समर्थ्यते । चकारात्स्वर्गादि । त्रिपुरहरदृशा तु कामसंहार एव समर्थितो न तु कामपूरणादि । यत्पुरस्तान्नेमेः पुरोभागे चन्द्रः कलयाप्यल्पकालेनापि यद्वा षोडशांशेनापि स्थातुं न प्रभवति । रुद्रलोचनसमीपे चन्द्रः कलया स्थातुं प्रभवति । यस्या नेमेः उन्मेषो विजृम्भणं समयनियतिं यस्मिन्नेव काले विजृम्भते नान्यस्मिन्निति कालनियतिं न याति । नेमिविजृम्भणस्याकालकाल्यत्वात् । हरनयनं तु संहारकाल एव विजृम्भते नान्यस्मिन् । तस्मात्त्रिपुरहरदृशं न्यक्कृत्य द्योतमाना चक्रनेमिर्वः श्रियं प्रदद्यात् ॥

नक्षत्रक्षोदभूतिप्रकरविकिरणश्वेतिताशावकाशा
जीर्णैः पर्णैरिव द्यां जलधरपटलैश्चूर्णितैरूर्णुवाना ।
आजावाजानवाजानतरिपुजनतारण्यमावर्तमाना
नेमिर्वात्येव चाक्री प्रणुदतु भवतां संहतं पापतूलम् ॥ ३५ ॥

नक्षत्रक्षोदभूतिप्रकरविकिरणश्वेतिताशावकाशा स्वीयधाराघोरविघट्टनक्षुण्णानां नक्षत्राणां क्षोदश्चूर्णं स एव भूतिस्तस्याः प्रकरः समूहस्तस्य विकिरणं विक्षेपस्तेन श्वेतिता धवलीकृता आशावकाशा दिगन्तरालानि यया सा । जीर्णैः पर्णैरिव गलद्भिः पाण्डुरैः पुराणैः पत्रैरिव चूर्णितैर्वेगात् शकलितैर्जलधरपटलैर्द्यामाकाशमूर्णुवाना । आच्छादयन्तीत्यर्थः । वात्या च विक्रियासंरम्भोत्क्षिप्तैर्निर्गलगलद्दलैराकाशमावृणुते । आजौ रणाङ्गणे आजानवाजेन आजन्मसिद्धेन वाजेन वेगेन आनता प्रह्वीकृता रिपुजनता शत्रुसमूहः सैवारण्यं विपिनं तदुद्दिश्य आवर्तमाना । 'अरण्यमावर्तयन्ती' इति पाठे अरण्यं भ्रमयन्ती । चाक्री नेमिर्वात्येव चक्राकारचङ्क्रमणसमीरणसमूह इव । वातमण्डलीवेति यावत् । भवतां संहतं संघीभूतं पापतूलं प्रणुदतु ॥

क्षिप्त्वा नेपथ्यशाटीमिव जलदघटां जिष्णुकोदण्डचित्रां
तारापुञ्जं प्रसूनाञ्जलिमिव विपुले व्योमरङ्गे विकीर्य ।

ज्वालाजालाब्धिमुद्रं क्षितिवलयमिवाबिभ्रती नेमिचक्रं
नागेन्द्रस्येव नाभेः फणपरिषदिव प्रौढरत्नप्रकाशा ।
दत्तां वो दिव्यहेतेर्मतिमरविततिः ख्यातसाहस्रसंख्या
संख्यावत्संघचित्तश्रवणहरगुणस्यन्दिसंदर्भगर्भाम् ॥ ४१ ॥

अनेनाराणां शेषफणामण्डलसाधर्म्यं प्रतिपाद्यते। ज्वालाजालाब्धिमुद्रं ज्वालाजालान्येवाब्धयः समुद्रास्त एव मुद्रा सीमचिह्नं यस्य तत् नेमिचक्रं पृथ्वीवलयमिवाबिभ्रती दधती । शेषफणाश्च समुद्रपरिवृतं भूमण्डलं बिभ्रति । नागेन्द्रस्येव नाभेः पिण्डिकायाः। नाभिः कुण्डलितनागेन्द्र इव स्थित इत्यर्थः । फणपरिषदिव फणसमूह इव स्थिता । ख्यातसाहस्रसंख्या ख्याता प्रसिद्धा साहस्रं सहस्रं संख्या यस्याः सा । फणाश्च सहस्रसंख्याः सुदर्शनाराणि सहस्रसंख्याकानि । किं च प्रौढरत्नप्रकाशा प्रौढः प्रसिद्धो रत्नानां प्रकाशो यस्याः सा। दिव्यहेतेश्चक्रस्यारविततिर्वो युष्माकं संख्यावत्संघचेतःश्रवणहरगुणस्यन्दिसंदर्भगर्भां संख्यावत्समूहः पण्डितसमूहस्तस्य चित्तं श्रवणं च हरन्ति आनन्दयन्तीति चित्तश्रवणहरास्ते च ते गुणाश्चार्थगुणाश्चित्तहराः शब्दगुणाः श्रवणहरास्तान् स्यन्दते इति स्यन्दी स चासौ संदर्भोऽर्थग्रथनं शब्दग्रथनं च स एव गर्भे यस्याः सा तां मतिं दत्तां दिश्यात् । रसिकजनश्रवणमनोहरगुणसुधास्यन्दसंदोहसुन्दरां मतिं वितरत्वित्यर्थः ॥

ब्रह्मेशोपक्रमाणां बहुविधविमतक्षोदसंमोहितानां
सेवायै देवतानां दनुजकुलरिपोः पिण्डिकाद्यङ्गभाजाम् ।
तत्तद्धामान्तसीमाविभजनविधये मानदण्डायमाना
भूमानं भूयसां वो दिशतु दशशती भास्वराणामराणाम् ॥४२॥

बहुविधविमतक्षोदसंमोदितानां बहुविधशत्रुनिहननेन संमोदिता हर्षं प्रापितास्तासाम् । तत एव दनुजकुलरिपोः सुदर्शनस्य सेवायै पिण्डिकाद्यङ्गभाजां नाभिप्रभृत्यङ्गानि भजन्तीति पिण्डिकाद्यङ्गभाजस्तासाम् । ब्रह्मेशोपक्रमाणां देवतानां तत्तद्धामान्तसीमाविभजनविधये एतदवधिकं चतुर्मुखस्थानमेतदवधिकं पञ्चमुखस्थानमेतत्सीमाकमिन्द्रस्थानमिति तत्तद्देवस्थानसीमानिर्णयायेत्यर्थः । मानदण्डायमाना मानदण्डवत्स्थिता भास्वराणामराणां दशशती सहस्रं वो भूमानं महत्त्वम् । आधिक्यमिति यावत् । दिशतु । निरतिशयमहिमानं ददात्वित्यर्थः ॥

ज्वालाकल्लोलमालानिबिडपरिसरां नेमिवेलां दधाने
पूर्वे [illegible] भुवनमहविर्भोजिना पूरुषेण ।
प्रस्फूर्ज[illegible] स्फुलिङ्गै-
र्भद्रं वो विद्रुमाणां प्रियम[illegible] विधत्ताम् ॥ ४३ ॥

ज्वालाकल्लोलमालानिविडपरिसरां ज्वाला एव तरङ्गास्तासां मालाः पङ्क्तयस्ताभिर्नि विडो नीरन्ध्रः परिसरः संनिहितप्रदेशो यस्याः सा ताम् । नेमिवेलां समुद्रोद्वेलनवार सेतुर्नेमिरेव वेला नेमिवेला तां दधाने । भुवनमयहविर्भोजिना जगन्मयं जलमयं हविर्भुङ्क्त इति तथाभूतेन पूरुषेण सुदर्शनेन भगवता वा आक्रान्तमध्येऽधिष्ठितमध्यभा प्रस्फूर्जत्प्राज्यरत्ने प्रकाशमानप्रकृष्टमणौ रथपदजलधौ सुदर्शनसमुद्रे अरविततिः एवम रुत्तरोत्तरं वर्धमानैः स्फुलिङ्गैर्विद्रुमाणां प्रवालखण्डानां श्रियं शोभां विस्तृणाना वित यन्ती सती वो भद्रं विधत्तां करोतु ॥

नासीरस्वैरभग्नप्रतिभटरुधिरासारधारावसेका-

नेकान्तस्मेरपद्मप्रकरसहचरच्छायया प्राप्य नाभ्या ।

मुक्तानीवाङ्कुराणि स्फुरदनलशिखादर्शितप्राक्प्रवाला-

न्यव्याघातेन भव्यं प्रददतु भवतां दिव्यहेतेरराणि ॥ ४४ ॥

नासीराः सेनाप्रधाविनस्त एव स्वैरभग्ना यथेष्टं पलायिताः प्रतिभटाः प्रत्यर्थिभटास्तेषां रुधिरवृष्टिधाराभिः संजाता अवसेकास्तान् प्राप्य । एकान्तेति । एकान्तविकसितपद्माक रस्य सहचरो बन्धुश्छाया कान्तिर्यस्याः सा तया नाभ्या मुक्तानि त्यक्तानि । प्रसूतानी त्यर्थः । अङ्कुराणीव । शोणितवर्षधारावसिक्तनाभ्यालवालस्थितबीजसंभूताङ्कुराणीवाव स्थितानि । स्फुरदिति । प्रकाशमानाग्निज्वालाभिः प्रकटितानि प्रथमपत्राणि किसल यानि येषां तानि दिव्यहेतेरराणि वोऽव्याघातेन निष्प्रत्यूहेन भव्यं प्रददतु दिशन्तु ॥

दावोल्कामण्डलीव द्रुमगणगहने वाडवस्येव वह्ने-

र्ज्वालावृद्धिर्महाब्धौ प्रवयसि तमसि प्रातरर्कप्रभेव ।

चक्रे या दानवानां हयकरटिघटासंकटे जाघटीति

प्राज्यं सा वः प्रदेयात्पदमरपरिपत्पद्मनाभायुधस्य ॥ ४५ ॥

या सुदर्शनारपरिपद्द्रुमगणगहने द्रुमवृन्दैर्गहने दुष्प्रवेशे वने दावोल्कामण्डली दावाग्नि ज्वालासमूह इव महाब्धौ वाडवस्य ज्वालावृद्धिरिव प्रवयसि तमसि प्रातरर्कप्रभेव प्रात प्रवर्धमानसूर्यप्रभेव हयकरटिघटासंकटे तुरगगजघटाभिः संबाधे दानवानां समूहे जाघ टीति चेष्टते । 'खर्टीति' वा पाठः । पद्मनाभायुधस्य सा तादृशी अरपरिपदरनिकरो वः प्राज्यमुत्कृष्टं पदं दद्यादत्यन्तमहत् निरतिशयमैश्वर्यं देयात् । पल्लवितकोरकितकुसुमितफलि तवल्लिकामल्लिकाजालवेष्टितमल्लीमल्लानकीनालतमालमालप्रमुखनानाविधतरुखण्डे जृम्भ माणा दहनकरालज्वालाजालमिव, [illegible] निपुणवज्रा नलद्युमदर्शनेन [illegible] प्रभातप्रभाकरप्रभेव, रथतुरगक रटिभटसंक्षोभदानवसैन्य [illegible] महत्पदं देयादिति वः ॥

तापाद्दैत्यप्रतापातपसमुपचितात्त्रायमाणं त्रिलोकीं
लोलैर्ज्वालाकलापैः प्रकटयदभितश्छिन्नपट्टाञ्चलानि ।
छत्राकारं शलाका इव कनककृताः शौरिदोर्दण्डलग्नं
भूयासुर्भूपयन्त्यो रथचरणमरस्फूर्तयः कीर्तये वः ॥ ४६ ॥

दैत्यप्रतापातपसमुपचितात्प्रत्यर्थिजनस्यान्तःसंतापकृत्तेजः स एवातपस्तेन समुपचिता- संवर्धितात् । संपादितादिति यावत् । तापात् त्रिलोकीं त्रायमाणम् । अभितो लोलै- र्ज्वालाकलापैश्छिन्नपट्टाञ्चलानि आतपत्रं परीत्य प्रलम्बमानसूक्ष्मपटाञ्चलानि प्रकटयत् शौरिदोर्दण्डलग्नं रङ्गेशभुजसंसक्तं छत्राकारं रथचरणं सुदर्शनं भूपयन्त्योऽलंकुर्वत्यः । कनककृताः स्वर्णरचिताः शलाकाः कर्णिका इव प्रतीयमाना अरस्फूर्तयोऽरविजृम्भणानि वः कीर्तये भूयासुः ॥

नाभीशालानिखातां नहनसमुचितां वैरिलक्ष्मीवशानां
संयद्वारीहतानां समनुविदधती काञ्चनालानपङ्क्तिम् ।
राज्या च प्राज्यदैत्यव्रजविजयमहोत्तम्भितानां भुजानां
तुल्या चक्रारमाला तुलयतु भवतां तूलवच्छत्रुलोकम् ॥ ४७ ॥

संयद्वारीहतानां संयद्युद्धमेव वारी गजग्रहणाय कृतस्तृणाच्छादितो गर्तस्तया हतानां वैरिलक्ष्मीवशानां प्रतीपभूपानां लक्ष्म्यः संपद एव वशाः करिण्यस्तासां नहनसमुचितां बन्धनस्य समुचितां नाभीशालानिखातां पिण्डिका एव शाला तस्यां निखातां दृढतरं कीलितां काञ्चनालानपङ्क्तिं आलानानि गजबन्धनस्तम्भास्तेषां पङ्क्तिः कनकेन विरचिता या चालानपङ्क्तिश्च तां समनुविदधती सम्यगनुकुर्वाणा। प्राज्यदैत्यव्रजविजयमहोत्तम्भि- तानां बहुलतरदैत्यनिकरविजयोत्सवेनोत्तम्भितानामुद्धतानां भुजानां राज्या पङ्क्त्या च तुल्या चक्रारमाला सुदर्शनारश्रेणी भवतां वैरिसमूहं तूलवत्तुलयतु उत्क्षिप्य निर्मूलयतु ॥

आ नेमेश्चक्रवालात्त्विष इव वितताः पिण्डिकाचण्डदीप्ते-
र्दीप्ता दीपा इवाराद्गहनरणतमीगाहिनः पूरुषस्य ।
शाणे रेखायितानां रथचरणमये शत्रुशौण्डीर्यहेम्नां
रेखाः प्रत्यग्रलग्ना इव भुवनमरश्रेणयः प्रीणयन्तु ॥ ४८ ॥

आ नेमेश्चक्रवालात् प्रधेरेव लोकालोकपर्वतात् । आनेमिसंज्ञकलोकालोकपर्यन्तमि- त्यर्थः । परीत्य यतः नेमिश्चक्रवालाचल इव तिष्ठति । अभिविधावाङ् । त्विष इव वि- तताः चक्रवालपर्यन्तं [illegible] पिण्डिकाचण्डदीप्तेर्नाभिसंज्ञकसूर्यस्य त्विष इव मयूखा इव । तेजस्वितया [illegible] सूर्यमण्डलमिव तिष्ठति । गहनरणतमीगाहिनो दुष्प्रवेशसंगर- तमीप्रवेशिनः पुरुषस्य सुदर्शनस्वामिनः [illegible] तिमिरपटलविघटनार्थं प्रदीप्ता दीपा इव

रथचरणमये शाणे चक्रसंज्ञके निकषोपले। स्वार्थे मयट्प्रत्ययः। रेखायितानां रेखाकाराकारितं यथा भवति तथा संघटितानां शत्रुशौण्डीर्यहेम्नां प्रत्यर्थिमदकाञ्चनानां प्रलम्बमाः सद्यः संसक्ता रेखा इव स्थिता अरश्रेणयः पङ्क्तीभूतान्यराणि भुवनं प्रीणयन्त्वानन्दयन्त्वित्यर्थः। अरश्रेण्यास्तरणिकिरणसादृश्यकथनेन निखिलभुवनव्यापित्वपरिशुद्धत्वे प्रत्यपादिषाताम्। दीपसादृश्यकथनेन तमोनिवर्तकत्वं मङ्गलाकारत्वं च प्रतिपादितम्। काञ्चनरेखातुल्यताकथनेन रमणीयत्वमार्जवं च प्रतिपादितं भवति। पिण्डिकाचण्डकिरणमारभ्य नेमिचक्रवालाचलपर्यन्तं व्याप्ताः किरणा इव भुवनं व्याप्ताः परिशुद्धाश्च घोरतरसंगरनिकुरम्बसंचारिसुदर्शनपुरुषं परीत्य प्रकाशमानाः करदीपिका इव तिमिरनिरासका मङ्गलाकाराश्च चक्रराजशाणोपरिघृष्यमाणाः कनकरेखा इव ऋजवो रमणीयतराश्चारश्रेणयः सकलभुवनप्रीतये भवन्त्वित्यर्थः॥

दीप्तैरर्चिःप्ररोहैर्दलवति विधृते बाहुनालेन विष्णो-
रुद्यत्प्रद्योतनाभं प्रथयति पुरुषं कर्णिकावर्णिकायाम्।
चूडालं वेदमौलिं कलयति कमले चक्रनाम्नोपलक्ष्ये
लक्ष्मीं स्फारामराणि प्रतिविदधतु वः केसरश्रीकराणि॥ ४९॥

दीप्तैः प्रकाशमानैरर्चिःप्ररोहैर्ज्वालानां प्ररोहैर्वर्तुलतया जायमानैर्दलवति पत्रवति। कुण्डलितज्वालाकलापस्य पद्मदलसाम्यं विद्यते। विष्णोः श्रीरङ्गिणो बाहुनालेन विधृते संकलिते उद्यत्प्रद्योतनाभं आविर्भवद्भास्करस्याभेवाभा यस्य स तम्। उद्यन्मार्तण्डमण्डलच्छायमित्यर्थः। पुरुषं सुदर्शनपुरुषं कर्णिकावर्णिकायां वर्णमाकारो वर्णिका तस्यां विषये। कर्णिकास्वरूपविषय इति यावत्। प्रथयति प्रकटयति। चूडालं चूडा शिखा अस्यास्तीति चूडालस्तम्। वेदमौलिं श्रुतिशिरोभागम्। वेदान्तमिति यावत्। कलयति ख्यापयति। चक्रनाम्ना सुदर्शननाम्ना उपलक्ष्ये उपलक्षितुं योग्ये। अवधेये इति यावत्। कमले केसरश्रीकराणि किंजल्कशोभाकराणि अराणि वः स्फारामत्युज्ज्वलां श्रियं प्रतिविदधतु कुर्वन्तु। चक्रनामकमलस्य कुण्डलितज्वालाखण्डमेव दलनिकुरम्बं श्रीरङ्गिदक्षिणभुजदण्ड एव नालः चक्रमध्यप्रदेश एव प्रभातप्रभाकरदेशः सुदर्शनपुरुषः कर्णिकावदातः परिमलकर्णिकात्वेन वर्णितसुदर्शनपुरुषं परीत्य प्रकाशमानान्यराण्येव केसराणि। एतादृशि चक्रराजस्याराणि भवतां लक्ष्मीं प्रदिशन्तु॥

धातुस्यन्दैरमन्दैः कलुषितवपुषो निर्झराम्भःप्रपाता-
नर्चिष्मत्या स्मृत्या रथचरणगिरेर्नेमिनाभीतटस्य।
व्याकुर्वाणारपङ्क्तिर्वितरतु विभुताविस्तृतिं वित्तकोटी-
कोटीरच्छत्रपीठीकटककरिघटाचामरस्रग्विणीं वः॥ ५०॥

(इत्यरवर्णनम्)

नेमिनाभीतटस्य नेमिश्च नाभी च नेमिनाभ्यौ ते एव तटे यस्य स तस्य रथचरणगिरेः सुदर्शनाद्रेः अरपङ्क्तिरमन्दैरनल्पैर्धातुस्यन्दैर्गैरिकरसस्रोतोभिः कलुषितवपुषः कलुषितं वपुर्येषां तान् शोणीकृताकारान् निर्झराम्भःप्रपातान् निर्झरजलप्रवाहान्तान् अर्चिष्मत्या दीप्तिमत्या जपाकुसुमनिकाशप्रकाशयेत्यर्थः । स्वमूर्त्या स्वाकारेण व्याकुर्वाणा विवृण्वाना । विस्तृणाना इति यावत् । वित्तकोटीति । कनककोटीकोटीरश्वेतातपत्ररत्नसिंहासनरत्नवलयकरियूथन्दचामरप्रसूनमालिकारमणीयां विभुताविस्तृतिं वैभवातिशयं वो वितरतु । पृथुतरप्रधिपिण्डिकासानुरमणीयरथचरणवसुंधराधरधुरंधरस्यारविततिर्धातुनिःस्यन्दसंदोहसंबन्धकलुषिताकारनिर्झरजलप्रवाहान् पद्माकरप्रभापटलरमणीयस्वमूर्त्या विस्पष्टयन्ती सती कनककाहलकलाचिकामुक्ताछत्रचामरपीठिकाशयनभृङ्गारककिरीटकेयूरकण्ठिकाकुण्डलत्रिसरहारहिताङ्गुलीयककटकोज्ज्वलकाञ्चीनूपुरतुरंगगजसुरतरुणीसंकाशपरिचारिकाप्रमुखानेकवस्तुनिष्कलां लक्ष्मीं विस्तारयत्वित्यर्थः ॥

ऐक्येन द्वादशानामशिशिरमहसां दर्शयन्ती प्रवृत्तिं
दत्तः स्वर्लोकलक्ष्म्यास्तिलक इव मुखे पद्मरागद्रवेण ।
देयाद्दैतेयदर्पक्षतिकरणरणप्रीणिताम्भोजनाभि-
र्नाभिर्नाभित्वमुर्व्याः सुरपतिविभवस्पर्शि सौदर्शनी वः ॥५१॥

द्वादशानामशिशिरमहसां सूर्याणामैक्येन । मेलनेनेत्यर्थः । संजातां वि(प्र)वृत्तिं निखिलतेजःपदार्थाभिभवनिरतिशयविजृम्भणं दर्शयन्ती ज्ञापयन्ती । दैतेयेति । दैत्याहंकारविनाशकरणं रणं तेन प्रीणितोऽम्भोजनाभिः श्रीरङ्गो यया सा तथा । प्रत्यर्थिप्राणसंहारचतुरसमरसंचारकोलाहलानन्दितनन्दगोपनन्दन इत्यर्थः । स्वर्लोकलक्ष्म्या मुखे पद्मरागद्रवेण माणिक्यसंघर्षणसंजातनिष्यन्दनेन । दत्तो रचितस्तिलक इव । सुदर्शनराजकृतप्रत्यर्थिनिरसनसंजनितहर्षोत्कर्षेण स्वर्लक्ष्मीरलंकृतेति व्यज्यते । सौदर्शनी नाभिः सुरपतिविभवस्पर्शि इन्द्रविभवं स्पृशतीति तथा । देवेन्द्रवैभवोपममित्यर्थः । उर्व्या नाभित्वं पृथ्वीनायकत्वं वो युष्माकं देयात् । स्वकीयप्रभापटलवलितद्वादशादित्यतेजःसच्छायसमक्षप्रतिपक्षरक्षःसंक्षयदक्षतासंमोदितदामोदरनिर्मूलितप्रतिपक्षपक्षलक्ष्मीरमणीयतया स्वर्लोकलक्ष्मीमुखकमलशृङ्गारहेतुभूतपद्मरागद्रवविरचितवर्तुलतिलक इव प्रकाशमाना सौदर्शनी पिण्डिका विलक्षितमहेन्द्रवैभवं क्षमानायकत्वं वितरत्वित्यर्थः ॥

शस्त्रश्यामे शताङ्गक्षितिभृति तरलैरुत्तरङ्गे तुरङ्गै-
र्मदङ्गन्मातङ्गनक्रे कुपितभटमुखच्छायमुग्धप्रवाले ।
अस्तोकं भासमाना प्रतिभटजलधौ पाटवं वाडवस्य
श्रेयो वः संविधत्तां त्रिनद्रिनहरा श्रीधरास्त्रस्य नाभिः ॥५२॥

सर्वैर्मण्डलाग्रैः [illegible] नीलैः [illegible] तस्मिन् । तरलैः । [illegible] रुग्णाः कल्लोला यस्य स तस्मिन् । [illegible] यस्य तस्मिन् । कुपितेति । कुपिताः [illegible] स्तेषां मुखानि तेषां छाया [illegible] तद्वेन मुखानि [illegible] यस्य स तस्मिन् प्रतिभटजलधौ शत्रुसेनासागरे [illegible] पार्श्वं [illegible] प्राश्नुवाना विस्तारयन्ती । प्रतिभटबलं शोषयन्तीति भावः । [illegible] यस्य नाभिर्वः श्रेयो भद्रं संविधत्तां करोतु । [illegible] [illegible] रौद्रे गजस्फुरितो[illegible] [illegible] [illegible] प्रतीपसेनाकूपारे वडवानल[illegible] प्राश्नुवाना [illegible] नाभि-राश्रितमूर्ति (?) भद्राणि सान्द्रयतु ॥

ज्वालाचूडालकालानलचलनसमाडम्बरा सांपरायं
यासावासाद्य माद्यत्सुरभटसुभुजास्फोटकोलाहलाढ्यम् ।
दैत्यारण्यं दहन्ती विरचयति यशोभूतिशुभ्रां धरित्रीं
सा वश्चक्रस्य नक्रस्यदमृदितगजत्रायिणी नाभिरव्यात् ॥ ५३ ॥

यासौ नाभिर्माद्यत्सुरभटसुभुजास्फोटकोलाहलाढ्यं चक्रराजसंचारचातुरीनिर्मूलितशत्रुमण्डलीसंदर्शनेन माद्यन्त उन्मत्तकविजृम्भणमेदुराः सुरभटास्तेषां भुजानामास्फोटः करपल्लवभुजशिखरेण बद्धप्रकोष्ठबाहोर्मध्ये वीरप्रदेशस्यास्फोटनेन संजनितः कुलिशघोषसंकाशशब्दस्तस्य कोलाहलो विजृम्भणं तेनाढ्यं युद्धमासाद्य । ज्वालेति । चूडा यस्यास्तीति चूडालः । ज्वालाभिश्चूडालः स चासौ कालानलश्च तस्य चलनं घोरान्तरसंचारस्तेन सदृश आडम्बर आस्फोटो यस्याः सा । दैत्यारण्यं दहन्ती सती धरित्रीं यशोभूतिशुभ्रां रक्षःकाननदहनसंजनितकीर्तिवैभवेन धवलां विरचयति । नक्रस्यदमृदितगजत्रायिणी नक्रस्य ग्राहस्य स्यदो वेगस्तेन मृदितो निष्पीडितः स चासौ गजश्च तं त्रायते इति गजत्रायिणी सा चक्रस्य नाभिर्वोऽव्यात् । चक्रविभ्रमसंदर्शनसंजनितदुर्वाराखर्वगर्वपर्वतारूढसुपर्वसुभटभुजास्फोटनसंजातघोरघोपाटोपभयंकरसंगररङ्गमासाद्य ज्वालाजटिलप्रलयसमयपावकप्रतापप्रतिमप्रभावसुरवरनिकरनिपीडितदैत्यविपिनविलसन्दहनचतुरः स्वाभाविकस्वकीययशोवैभवधवलितवसुधाचक्रनक्रविक्रमाक्रान्तनिर्विक्रमगजेन्द्ररक्षणनिपुणव्यापारचक्रनाभिर्वो युष्मान्रक्षत्वित्यर्थः ।

विन्दन्ती सांध्यमर्चिर्विदलितवपुषः प्रत्यनीकस्य रक्तैः
स्फायन्नक्षत्रराशिर्दिशि दिशि कणशः कीकसैः कीर्यमाणैः ।
नाकौकःपक्ष्मलाक्षीनवमदहसितच्छायया चन्द्रपादा-
न्नाथाङ्गी विस्तृणाना रचयतु कुशलं पिण्डिकायामिनी वः ॥ ५४ ॥

विदलितवपुषो बहुविधप्रहारजर्जरीकृतशरीरस्य प्रत्यनीकस्य प्रतिपन्थिबलस्य रक्तैः प्रहारवशान्निर्गलद्रुधिरधाराभिः सांध्यमर्चिः । विकसितजपाकुसुमनिकाशप्रकारमित्यर्थः । विन्दन्ती प्राप्नुवन्ती दिशि दिशि सर्वासु दिक्षु कणशः कीर्यमाणैः शकलीकृत्य प्रक्षिप्यमाणैः कीकसैरस्थिभिः स्फायन्नक्षत्रराशिः प्रकाशमानो नक्षत्रराशिर्यस्याः सा । नाकौक इति । स्वर्लोकवासिविलासिनीनां नवमदेन पौनःपुन्येन मदिरास्वादनसंजातनवमदेन हसितानि निःशङ्कनिःसरद्दीर्घहासास्तेषां छाया कान्तिस्तया धवलिमतया चन्द्रपादानमृतकिरणकिरणान् विस्तृणाना राथाङ्गी पिण्डिकायामिनी नाभिरात्रिर्वः कुशलं रचयतु । निशितखड्गशत्रुशरीरखण्डननिरन्तरनिःसरद्रक्तधारापरम्पराप्रकटितसंध्यारागसामग्री स्वकीयविविधविहारखण्डितकीकसनिकुरुम्बप्रत्यक्षितनक्षत्रसमुन्मेषा विजृम्भितमधुरसास्वादनसंजातसमुल्लासविवशविबुधवधूनिःशङ्कहासकोलाहलप्रदर्शितशशिकरनिकरा चाक्री पिण्डिकायामिनी भवतां भद्रं करोत्वित्यर्थः ॥

निःसीमं निःसृताया भुजधरणिधराघाटतः कैटभारे-
राशाकूलंकषर्द्धेरहितबलमहाम्भोधिमासादयन्त्याः ।
चक्रज्वालापगायाश्चलदरलहरीमालिकादन्तुराया
बिभ्रत्यावर्तभावं भ्रमयतु भुवने पिण्डिका वः प्रशस्तिम् ॥५५॥

कैटभारे रङ्गिणो भुजधरणिधराघाटतः भुज एव धरणिधरः पर्वतस्तस्याघाट आभोगः । विशालतेति यावत् । तस्मान्निःसीमं निःसृताया निरर्गलविनिर्गलिताया आशाकूलंकषर्द्धेः आशा दिश एव कूलानि तटानि कष्यन्ते संघर्ष्यन्ते यया सा आशाकूलंकषा तादृशी ऋद्धिर्यस्याः चलदरलहरीमालिकादन्तुरायाः चलन्ति च यान्यराणि तान्येव लहर्यस्तासां मालिकाभिर्दन्तुरा निम्नोन्नता तस्याः अहितबलमहाम्भोधिमासादयन्त्याः प्रत्यर्थिसेनार्णवं प्रविशन्त्याश्चक्रज्वालापगायाः सुदर्शनप्रभासवन्त्या आवर्तभावं बिभ्रती आवर्तत्वं दधाना पिण्डिका वः प्रशस्तिं प्रख्यातिं भुवने भ्रमयतु प्रचुरयतु । मुरहरकरदोस्तरिशिखरपरिसरतः प्रवहन्त्याः सकलदिक्कूलंकषविजृम्भमाणरमणीयतायाः तुङ्गतरतरङ्गपरम्परादन्तुरितोत्सङ्गायाः परबलजलधिमध्यं प्रविशन्त्याः सुदर्शनज्वालाकल्लोलिन्या आवर्तत्वं दधाना पिण्डिका भवतां सकलभुवनव्यापिनीं कीर्तिं तनोत्वित्यर्थः ॥

पाणौ कृत्वाहवाग्रे प्रतिभटविजयोपार्जितां वीरलक्ष्मी-
मानीतायास्ततोऽन्याः स्वसविधमनुरुद्धेषिणा पूरुषेण ।
प्रासादं वानरेन्द्रैर्विरचितमरुणै रश्मिभिः सूचयन्ती
न[illegible] [illegible] रथचरणपते[illegible]वृंति निर्विघातान् ॥ ५६ ॥

[illegible]

अस्या वीरश्रियो वासहेतोर्दलद्वेषिणा पूरुषेण सुदर्शनेन कर्त्रा अरुणैः किरणैर्निर्मितं प्रासादं सूचयन्ती । पिण्डिका प्रासादवत्स्थितेति यावत् । रथचरणपतेर्नाभिर्वो निष्प्रत्यूहां निर्वृतिम् । ब्रह्मानन्दमित्यर्थः । उत्पादयतु । प्रत्यर्थिराजपरम्पराविजयसमागतवीरलक्ष्मीं परिणीय तस्याः स्वसमीप एव निवासार्थं दनुजकुलविलयनकरव्यापारेण सुदर्शनपूरुषेण विलसन्निपुणैः किरणैर्निर्मिताभिर्नवहर्म्यवद्विराजमाना चक्रपिण्डिका भवतामप्रतिममानन्दं संपादयत्वित्यर्थः ॥

डिण्डीरापाण्डुगण्डैररियुवतिमुखैः पिण्डिका कृष्णहेते-
रुच्चण्डाश्रुप्रवर्षैरुपरततिलकैरुक्तशौण्डीर्यचर्या ।
द्वित्रग्रामाधिपत्यद्रुहिणमदमषीदूषिताक्षक्षमाभृ-
त्सेवाहेवाकपाकं शमयतु भवतां कर्म शर्मप्रतीपम् ॥ ५७ ॥

डिण्डीरापाण्डुगण्डैः फेनपाण्डुरगण्डैः । उच्चण्डाश्रुप्रवर्षैः । उच्चण्डानि धारालानि अत्युत्कटानीति यावत् । अश्रुवर्षाणि येषां तैः । उपरततिलकैः प्रमृष्टतिलकैः । अरियुवतिमुखैः उक्तशौण्डीर्यचर्या भाषिता मदस्य वृत्तिर्यस्याः सा कृष्णहेतेः पिण्डिका । द्वित्रेति । द्वित्रग्रामाधिपत्येन संजातो द्रुहिणमदः सकलजगन्नायकोऽहमित्यहंकारः स एव मषी तया दूषितान्यन्धीकृतान्यक्षाणि इन्द्रियाणि येषां तेषां क्षमाभृतां सेवा यथेष्टविनियोज्यत्वं तस्यां हेवाक औत्सुक्यं स एव पाकः परिपाकः परिणामो यस्य तत् शर्मप्रतीपं सुखविरोधिकर्म शमयतु । 'अनञ्जनविलोचनैरकलितालकालंकृतैरनादृतकपोलकैर्विकलितप्रभाविभ्रमैः । अचुम्बितदरस्मितैर्गतललाटिकाचन्दनैः समृद्धगलदश्रुभिः प्रतिमहीपकान्तामुखैः ॥' सूचितपराक्रमप्रतिभटविदाहिका प्रचण्डतरपिण्डिका कतिपयजनाधिपत्यमात्रेणाहं ब्रह्मेति मत्वा यः कश्चिद्दुरात्मा स्वसमीपगतमपि पूज्यं न पश्यति न शृणोति श्रोतव्यमेवं प्रकारेण मदान्धस्य तस्य सेवाहेवाकपाकं सुखपरम्परापरिपन्थिक्रियाकलापं निर्मूलयत्वित्यर्थः ॥

पर्याप्तामुन्नतिं या प्रथयति कमलं या तिरोभाव्य भाति
स्रष्टुः सृष्टेर्दवीयः कुवलयमहितं या बिभर्ति स्वरूपम् ।
भूम्ना स्वेनान्तरिक्षं कवलयति च या सा विचित्रा विधत्तां
दैतेयारातिनाभिर्द्रविणपतिपदद्वेषिणीं संपदं वः ॥ ५८ ॥

नाभिः पर्याप्तां परिपूर्णाम् । निरतिशयामिति यावत् । उन्नतिमौन्नत्यं प्रथयति । निरतिशयातिशयप्रदानचातुर्यं प्रख्यापयतीत्यर्थः । या कमलं विकसितपद्मं तिरोभाव्य भाति प्रकाशते । स्वसौन्दर्येण कमलाद्रमणीयेत्यर्थः । या स्रष्टुर्ब्रह्मणः सृष्टेर्दवीयो दूरतमं कुवलयमहितं भूवलयपूजितं नाभीमण्डलस्यायत्वाद्भूमण्डलं नाभीमण्डलाकाराकारितं संसृष्टं भवति तस्मादेव भूमण्डले नाभिमण्डलं पूजितं भवति । स्वरूपं बिभर्ति या स्वेन भूम्ना

महत्त्वेनान्तरिक्षं कवलयति परिमेययति । अल्पयतीति यावत् । सा विचित्रा नानाप्रकारा दैतेयारातिनाभिर्द्रविणपतिपदद्वेषिणी कुबेरसंपद्विद्वेषिणी संपदं विधत्ताम् । अनेन पद्येन पिण्डिकाया उन्नतलरमणीयलाघवत्ववर्तुलत्वमहत्त्ववत्त्वं प्रतिपादितं भवति ॥

वाणीवाङ्गैश्चतुर्भिः सदसि सुमनसां द्योतमानस्वरूपा
वाहुन्तस्था मुरारेरभिमतमखिलं श्रीरिव स्पर्शयन्ती ।
दुर्गेवोग्राकृतिर्या त्रिभुवनजननस्थेमसंहारधुर्या
मर्यादालङ्घनं वः क्षपयतु महती हेतिवर्यस्य नाभिः ॥ ५९ ॥

वाणीव वाग्देवतेव चतुर्भिरङ्गैर्नेम्यरनाभ्यक्षैः । ज्वालाया नेम्यन्तःपातित्वात् । वाग्देवताङ्गानि परा पश्यन्ती मध्यमा वैखरीत्येवमाकारेण 'चत्वारि वाक्परिमितापदानि' इति श्रुतिसिद्धध्वनिवर्णपदवाक्यरूपाणि तैरङ्गैरवयवैः सुमनसां देवानां विदुषां च सदसि द्योतमानस्वरूपा सा श्रीरिव मुरारेर्बाहुन्तस्था करकिसलयगर्भसिंहासनस्था अखिलमभिमतमभ्यर्थितार्थप्रपञ्चं स्पर्शयन्ती । ददतीत्यर्थः । दुर्गेव पार्वतीवोग्राकृतिर्नाभिस्त्रिभुवनजननस्थेमसंहारधुर्या भुवनत्रयजननस्थितिसंहतिसमर्था प्रकाशते । अयमर्थः—अङ्गैर्द्योतमानस्वरूपेत्यनेन वाणी उत्पत्तिशक्तिरित्यवगन्तव्या । अभिमतार्थान् प्रदाय रक्षतीत्यनेन श्रीः स्थितिशक्तिः । उग्राकृतिरित्यनेन दुर्गा संहृतिशक्तिरित्यवगन्तव्या । एवंप्रकारेण प्रतिनियतव्यापारशक्तियोगात्प्रतिनियतसृष्ट्यादिकर्तृभ्यो वाणीश्रीशदुर्गेशेभ्योऽपि जननस्थेमसंहारधुर्येत्यनेन सुदर्शननाभिरेवाधिकेत्यवगन्तव्यम् । सा हेतिवर्यस्य नाभिर्मर्यादालङ्घनं निरुपाधिकशेषत्वमात्मनां मर्यादा तस्या अतिक्रमणं स्वातन्त्र्याभिमानं क्षपयतु ॥

स्रग्भिः संतानजाभिर्मधुरमधुरसस्यन्दसंदोहिनीभिः
पाटीरैः प्रौढचन्द्रातपचयसुषमालोपनैर्लेपनैश्च ।
धूपैः कालागुरूणामपि सुरसुदृशो विस्रमर्चासु यस्या
गन्धं रुन्धन्ति सा वश्चिरमसुरभिदो नाभिरव्याद्भव्यात् ॥६०॥

सुरसुदृशो देवरमण्यो यस्या नाभ्या विस्रमशुभगन्धं खण्डितमनुजशरीरशोणितमांससंबन्धसंजातदुर्गन्धमर्चासु पूजासु क्रियमाणासु सतीषु संतानजाभिः पारिजातप्रसूनरचिताभिः मधुरमधुरसस्यन्दसंदोहिनीभिः मधुरः स्वादुभूतोऽसौ मधुरसः पुष्परसस्तस्य स्यन्दो निःस्यन्दस्तस्य संदोहः [illegible] प्रस्नुवन्तीति संदोहिनीभिः । बहलगलदतलमधुरतरसुमनस्स्यन्दिनीभि[illegible] [illegible] पाटीरैः प्रौढचन्द्रातपचयसुषमालोपनैः पूर्णचन्द्र[illegible]

संनगैर्निरन्तरनिःसरन्मकरन्दबिन्दु[illegible] वृद्धितमृगमदचन्दनन्दनप्रमुख[illegible] [illegible] सार्थनिवेशितसंचरत्कान्तनयनाञ्जलिकाभिः सुरसुन्दरीभी [illegible] सरद्रुधिरपटलनिमग्नभा चक्रराजस्य नाभिरम्या[illegible] ॥

अंहः संहृत्य दग्ध्वा प्रतिजनिजनितं प्रौढसंसारवन्या-
दूराध्वन्यानधन्यान्महति विनतिभिर्धामनि स्नापयन्ती ।
विश्रान्तिं शाश्वतीं या नयति रमयतां चक्रराजस्य नाभिः
संयन्मोमुह्यमानत्रिदशरिपुदशासाक्षिणी साक्षिणी वः ॥ ६१ ॥

(इति नाभिवर्णनम्)

या पिण्डिका विनतिभिः प्रपन्नानुष्ठितप्रपत्तिभिः प्रतिजनि जनुषि जनुषि [illegible] संपादितमंहो दुरितं संहृत्य राशीकृत्य दग्ध्वा । मोक्षप्रतिबन्धोपायरंनयं भस्मीकृत्येत्यर्थः । प्रौढसंसारवन्यादूराध्वन्यान् प्रौढो दुरुत्तरः संसार एव वन्या वनसमूहस्तस्यां दूरं चिरकालमध्वन्यान् अध्वगान् अभ्यागतान् । प्रपत्त्यनुष्ठानात्पूर्वमधन्यानित्यर्थः । महति निरतिशयानन्दवैभवे धामनि स्थाने स्नापयन्ती अभिषेचयन्ती शाश्वतीं विश्रान्तिं पुनरावृत्तिरहितामानन्दसंपत्तिं नयति प्रापयति संयन्मोमुह्यमानत्रिदशरिपुदशासाक्षिणी संयति युद्धेऽतिशयेन मुह्यमानाः । चक्रप्रहारपरवशा इत्यर्थः । ते च ते त्रिदशरिपवस्तेषामवस्था तस्याः साक्षिणी सा चक्रराजस्य नाभिर्वोऽक्षिणी लोचने रमयतां क्रीडयतु आनन्दयत्वित्यर्थः ॥ इति नाभिवर्णनम् ॥

श्रुत्वा यन्नामशब्दं श्रुतिपथकटुकं देवनक्रीडनेषु
स्वैर्वैरिस्वैरपत्न्यो भयविवशधियः कातरन्यस्तसाराः ।
मन्दाक्षं यान्त्यमन्दं प्रतियुवतिमुखैर्दर्शितोत्प्रासदर्पै-
रक्षं सौदर्शनं तत्क्षपयतु भवतामेधमानां धनाशाम् ॥ ६२ ॥

स्वैर्वैरिस्वैरपत्न्यो नाकशत्रुसंबन्धिन्यो यथेष्टं वर्तिन्यो नितम्बिन्य इति यावत् देवनक्रीडनेषु पाशकक्रीडनेषु । द्यूतक्रीडास्वित्यर्थः । श्रुतिपथकटुकम् । कर्णपथपरिपन्थिनमिति यावत् । यन्नामशब्दं यस्याक्षस्य नामशब्दो वाचकशब्दस्तं श्रुत्वा भयविह्वलधियः कातरन्यस्तसाराः कातरं व्याकुलं न्यस्ताः सारा याभिस्ताः दर्शितोत्प्रासदर्पैस्त[illegible] नामशब्द[illegible]भयसंजातवैकल्याद्[illegible]के दर्शित उत्प्रासो मन्दस्मितं दर्पो गर्व[illegible] [illegible]नि तैः प्रतियुवतिमुखैर्बन्दीकृतप्रतिपक्षवधूमुखैः साधनैरमन्दमनल्पं मन्दाक्षं व्रीड[illegible] [illegible] प्राप्नुवन्ति सौदर्शनं तदक्षमेधमानानां धनाशां धनविषयवाञ्छां क्षपयतु । 'चक्रा[illegible] [illegible]मलक्ष्य[illegible]विबुधरिपु[illegible]पत्न्यः प्रकामं द्यूतक्रीडासु शब्दं श्रुतिपथकटुकं ह्यक्षमित्या[illegible]कलय्य । भीताः संत्यक्तसाराः सुरयुवतिमुखं हासगर्भं समीक्ष्य व्रीडाविद्धा तदक्षं क्षपयतु भवतामेधमानां धनाशाम् ॥' वर्धमानं च गर्वमित्यर्थः ॥

स्कन्धच्छिन्नं विशीर्णप्रसवपरिकरं अस्तपत्रोपमर्दं

संयत्पांसु तर्षातुरखगपरिषत्पीतरक्तोदकासु ।

अक्षं रक्षस्तरूणामशनिवदशनैः प्रापतन्मूर्ध्नि मूर्ध्नि

न्यान्स्वाश्लाघीश्चितुर्वः स्तबकितयशसे द्विषिणां शोषणाय ॥ ६३ ॥

तर्षातुरखगपरिषत्पीतरक्तोदकासु तृष्णापीडितपक्षिमृगपीतरक्तोदकासु संयत्पांसु युद्धपर्वसमवेषु रक्षस्तरूणां मूर्ध्नि मूर्ध्नि अशनिवद्दम्भोलिरिव स्कन्धच्छिन्नं स्कन्धा भग्नाः स्कन्धाः शाखादिकाः छिन्नाः यस्मिन् कर्मणि तत् । विशीर्णप्रसवपरिकरं विशीर्णा नष्टाः प्रसवाः पुष्पाणि फलानि च तेषां परिकराः समुदायाः विशीर्णाः शकलीकृताः प्रसवा गर्भपाताः परिकराः परिवारा यस्मिन्कर्मणि तत् । अस्तपत्रोपमर्दं अस्तो दस्तः पत्राणां पर्णानां वाहनानामुपमर्दो विनाशो यस्मिन्कर्मणि तत् । एतानि त्रीण्यपि पतनक्रियाविशेषणानि । अशनैः शीघ्रमापतत् अश्लाघीदश्लाघ्यं स्तबकितयशसे । अनेन कीर्तिप्रसूनोत्पत्तिहेतुर्दोहदविशेषो ध्वन्यते । द्विषिणां शोषणाय शत्रूणां दहनाय शोष्यात् ॥

दीक्षां सङ्ग्रामसत्रे महति कृतवतो दीप्तिभिः संहताभि-

र्जिह्वाले सप्तजिह्वे दनुजकुलहविर्जुह्वतो नेमिजुह्वा ।

वैकुण्ठास्त्रस्य कुण्डं महदिव विलसत्पिण्डिकावेदिमध्ये

दिश्याद्दिव्यर्द्धिदेश्यं पदमिह महतामक्षतोन्मेषमक्षम् ॥ ६४ ॥

महति सर्वोत्तरे सङ्ग्रामसत्रे युद्धयागे दीक्षां कुर्वतो दीक्षितस्य सतः संहताभिः संघीभूताभिर्दीप्तिभिर्जिह्वाले जिह्वावति सप्तजिह्वे वह्नौ दनुजकुलमेव हविर्हव्यं नेमिजुह्वा प्रधिरेव जुहूः स्रुग्विशेषस्तया जुह्वतस्त्यजतः । प्रक्षिपत इति यावत् । वैकुण्ठास्त्रस्य चक्रस्य पिण्डिका वेदिमध्ये नाभिवेदिकामध्यप्रदेशे महद्गम्भीरं कुण्डमिव विलसद्रमणीयम् अक्षतोन्मेषं अक्षतः प्रवृद्ध उन्मेषो विकासो यस्य तदक्षं भवतामिह लोके दिव्यर्द्धिदेश्यं स्वर्गसंभूतविभूतिकल्पं पदं दिश्यात् ॥

तुङ्गाद्दोरद्रिशृङ्गाद्दनुजविजयिनः स्पष्टदानोद्यमानां

शत्रुस्तम्बेरमाणां शिरसि निपततः स्रस्तमुक्तास्थिपुञ्जे ।

रक्तैरभ्यक्तमूर्तेर्विदलनगलितैर्व्यक्तवीरायितर्द्धे-

र्हर्यक्षस्यारिभङ्गं जनयतु जगतामीडितं क्रीडितं वः ॥ ६५ ॥

दनुजविजयिनः श्रीरङ्गिणस्तुङ्गादुन्नतात् । उदारादित्यर्थः । दोरद्रिशृङ्गाद्बाहुपर्वतशिखरात् । अग्रप्रदेशादित्यर्थः । तस्मात्स्पष्टदानोद्यमानां स्पष्टो दानस्य मदजलस्योद्यम उदयो येषां गजानां स्पष्टो दाने खण्डने उद्यम उद्योगविशेषो येषां शत्रूणां तेषां शत्रुस्तम्बेरमाणां प्रतीपमहीपद्विपानां स्रस्तमुक्तास्थिपुञ्जे मुक्तावद्धवलान्यस्थीनि तेषां पुञ्जः समूहः

स्रस्ता विगलिता मुक्तास्थिपुञ्जा यस्मात् तस्मिन् शिरसि निपततः विदलनगलितैर्वि- नेन शत्रुशिरःकपोलविपाटनेन गलितैर्नैरन्तर्येण निःसृतैः रक्तैः शोणितैरभ्यक्तमूर्तेर्वि- विग्रहस्य व्यक्तवीरायितर्द्धेः वीरायिता वीरवदाचरिता सा चासौ ऋद्धिश्चेति । व्यक्ता- रायितर्द्धिर्यस्य स तस्य हर्यक्षस्य हरिः सुदर्शनं श्रीरङ्गसंकल्पाकारकारित्वाद्धरिरित्युच्य- तस्य हर्यक्षस्य सिंहस्य च जगतामीडितं जगद्भिः स्तूयमानं क्रीडितं क्रीडाविनोदो ऽरिभङ्गं जनयतु ॥

उन्मीलत्पद्मरागं कटकमिव धृतं बाहुना यन्मुरारे-
दीप्तान्रश्मीन्दधानं नयनमिव यदुत्तारकं विष्टपस्य ।
चक्रेशार्कस्य यद्वा परिधिरभिदधद्दैत्यहत्यामिव द्रा-
गक्षं पक्षे पतित्वा परिघटयतु वस्तद्द्रढिष्ठां प्रतिष्ठाम् ॥ ६६

दीप्तान् रश्मीन् प्रकाशमानान् किरणान् दधानं सद्यदक्षं मुरारेर्बाहुना दक्षिणभुजद- नोन्मीलत्पद्मरागं उन्मीलन्तो देदीप्यमानाः पद्मरागाः शोणमणयो यस्मिंस्तत् शिल- रपार्श्वप्रदेशप्रद्योतमानरागा अर्धरागाः पार्श्वद्वयप्रकाशमानरागाः पूर्वापरभागयोः प्रदी- ङ्कुरवत्प्रकाशमानरागाः प्ररूढरागाः पूर्णरागाः एवं प्रकारेण चतुर्विधाः पद्मरागमणयः। रूढरागपद्मरागकीलितकटकमिव धृतमाकलितम्। यदक्षं दीप्तान् रश्मीन्दधानं सत् ता- रकसुन्नतकनीनिकं उत्तारयतीत्युत्तारकं रक्षकं च विष्टपस्य भुवनस्य नयनमिव नेत्रमिव रपायोपायमिति । यदक्षं दैत्यहत्यामभिदधद्बुवाणं चक्रेशार्कस्य चक्रप्रभुचण्डकिरणस्य रिधिर्वा परिवेप इव तदक्षं पक्षे पतित्वा युष्मत्पक्षपाती भवद्वो युष्माकं द्रढिष्ठां दृढतरा- शाश्वतीमिति यावत् । प्रतिष्ठां दृष्टादृष्टैश्वर्यसमृद्धितयावस्थानं द्राक् शीघ्रं परिघट- संयोजयतु ॥

क्रीडत्प्राक्रोडदंष्ट्राहतिदलितहिरण्याक्षवक्षःकपाट-
प्रादुर्भूतप्रभूतक्षतजसमुदितारुण्यमुद्रं समुद्रम् ।
उन्मीलत्किंशुकाभैरुपहसदमितैरंशुभिः संशयघ्नी-
मक्षं चक्रस्य दत्तामघशतशमनं दाशुषीं शेमुषीं वः ॥ ६७ ॥

प्रागाद्यश्चासौ क्रोडो वराहश्च । क्रीडंश्चासौ प्राक्क्रोडश्च । क्रीडत्प्राक्रोडविग्रह इत्यर्थः । ... दंष्ट्रा तया हतयः कुट्टनानि ताभिर्दलितं विदारितं हिरण्याक्षस्यासुरस्य वक्षो भुजा- ...लमेव कवाटं तच्च हिरण्याक्षवक्षःकवाटं च तस्मात्प्रादुर्भूतं निरर्गलनिर्गलितं प्रभूतं ...न्द्रं क्षतजं तेन समुदितं संजातमारुण्यं शोणिमा तदेव मुद्रा चिह्नं यस्य तं समुद्रम् । उन्मीलत्किंशुकाभैर्विलसत्पलाशकुसुमसंकाशैरमितैरनन्तैरंशुभिः किरणैरुपहसन् । चक्र- स्याक्षं कर्तृ अघशतशमनं दाशुषीं प्रदात्रीं संशयघ्नीं संशयोऽनवधारणज्ञानं तं हन्तीति संश- यघ्नी तां शेमुषीं मनीषां दत्तां दिशतु ॥

पद्मोल्लासप्रदं सञ्जनयति जगतीमेधमानप्रबोधां
यस्य च्छायासमाना लसति परिसरे रोहिणी तारकाख्या ।
नानाहेत्युद्गतत्वं प्रकटयति च यत्प्राप्तकृष्णप्रयाणं
त्रेधा भिन्नस्य धाम्नः समुदय इव वस्तत्पातु चक्राख्यमक्षम् ॥६८॥

यद्धाम स्वप्रकाशतया पद्मोल्लासप्रदं पद्मा श्रीरुक्मिणी तस्या उल्लास आनन्दस्तत्प्रदं पद्मानि कमलानि तेषामुल्लासो विकासस्तं प्रददातीति पद्मोल्लासप्रदं सञ्जगती लोकमेधमानप्रबोधामेधमानः प्रबोधः प्रज्ञा यस्याः सा तां जनयति प्रादुर्भावयति । सूर्यस्य प्रकाशकत्वात् सुदर्शनस्य ज्ञानतेजसोरुत्पत्तिस्थानत्वात् । उदयति रवौ चक्रे च सर्वे प्रवर्धमानप्रबोधा भवन्ति । यस्याश्च चन्द्रात्मतेजसश्च रोहिणी तारकाख्या आस्येन रोहिणीनक्षत्ररूपेण । अथवा रोहिणी अरुणा । 'रोहिणी वसुदेवस्य पत्न्यां नक्षत्रशोणयोः' इति निघण्टुः । यद्वा तारकेण प्रणवेन श्रेष्ठा । अक्षरमध्ये प्रणवः प्रणवमध्ये देवः । तस्मात्प्रणवसंबन्धित्वेन श्रेष्ठा । यद्वा तारकाख्या प्रणवानन्तरं तमःशब्दवाच्याहंकारादिनिर्जातं निरस्य पारतन्त्र्यादि प्रापयन्तीत्यर्थः । अत एवासमानं निःसमानं छाया कान्तिः परिसरे समीपे लसति । चन्द्रपक्षे तु तारकाख्या नक्षत्रश्रेष्ठा रोहिणी चन्द्रभार्या छायासमाना सूर्यभार्यासदृशी । अथवा रोहिणीनक्षत्राग्रप्रदेशवर्तिनी असमानच्छाया निरुपमचन्द्रिका परिसरे लसति । यदुक्तं कृशानुश्च कृष्णस्य प्रयाणं प्राप्तं कृष्णस्य प्रयाणं येन तत्तादृशं सत् नानाहेत्युद्गतत्वं नानायुधेभ्य उद्गतत्वम् । कृशानुपक्षे तु प्राप्तं नीलप्रायं वर्त्म येन तत् । तस्मादेव कृष्णवर्त्मेत्युच्यते । नानाविधाभिर्हेतिभिर्ज्वालाभिरुद्गतत्वं प्रकटयति । एवं त्रेधाभिन्नस्य धाम्नस्तेजसः समुदय इव स्थितं चक्रमक्षं वः पातु ॥

शोचिर्भिः पद्मरागद्रवसमसुषमैः शोभमानावकाशं
प्रत्यग्राशोकरागप्रतिभटवपुषा भूषितं पूरुषेण ।
अन्तः स्वच्छन्दमग्नोत्थितभृगुतनयं क्षत्रियाणां हताना-
मारब्धं शोणितौघैः सर इव भवतो दिव्यहेत्यक्षमव्यात् ॥६९॥

पद्मरागद्रवसमसुषमैः पद्मरागघर्षणसंजातरसेन सदृशी निरतिशया शोभा येषां तानि तैः शोचिर्भिः शोभमानावकाशं विमानमध्यप्रदेशं तत् प्रत्यग्राशोकरागप्रतिभटवपुषा विकसदशोककुसुमसंकाशविग्रहेणेत्यर्थः । पुरुषेण सुदर्शनपुरुषेण भूषितमलंकृतम् । अधिष्ठितमित्यर्थः । तथावस्थितम् । किमिव । हतानां क्षत्रियाणां शोणितौघैरारब्धम् । अन्तःस्वच्छन्दमग्नोत्थितभृगुतनयं अन्तःसरोमध्ये स्वच्छन्दमग्नः स्वेच्छामग्नो मज्जनानन्तरमुत्थितो भृगुतनयो यस्मिंस्तत्सर इव स्थितं दिव्यहेत्यक्षं भवतो युष्मानव्यात् । शोणमणिद्रवसपक्षप्रभाव्याप्तान्तरावकाशं परिदृश्यमानविकसदशोककुसुमसमारुण्यविग्रहेण पुरुषेणाधिष्ठितं तदानीं खण्डितक्षत्रियकण्ठगलनमुक्तैरनन्तरुधिरप्रवाहैर्विरचितं लीलानिमग्नोत्थितभृगुतनयसरोवरमिव स्थितमक्षं युष्मान्रक्षत्वित्यर्थः ॥

[illegible]: [illegible] तत्र दृष्टो व्योम विभ्राजमानं

प्रातस्त्यादित्यरोचिर्निभमिव भवतः पातु रथाङ्गमक्षम् ॥ ७२ ॥

[illegible] तेजसा [illegible] । [illegible] ॥ [illegible] प्रा- [illegible] प्रातःकालीनरविकिरणाभं विभ्राजमानं व्योमेव स्थितं रथाङ्गमक्षं भवतः पातु । [illegible] निकसितजपाप्रसूनगर्भदलरागमोदरान् किरणान्दधानं तदानीं शारद- नीरदपटलपरिष्कृत[illegible]विकिरणरञ्जितगगनतलमिव स्थितं प्रकाशमानं रथाङ्गा[illegible] तमक्षं [illegible]त्वित्यर्थः ॥

श्रीवाणीवाग्मृडान्यो विदधति भजनं शक्तयो यस्य दिक्षु

प्राह व्यूहं यदाद्यं प्रथममपि गुणं भारती पाञ्चरात्री ।

घोरां शान्तां च मूर्तिं प्रथयति पुरुषः प्राक्तनः प्रार्थनाभि-

र्भक्तानां यस्य मध्ये दिशतु तदनघामक्षमध्यक्षतां वः ॥ ७३ ॥

पाञ्चरात्री पञ्चरात्रसंबन्धिनी भारती कर्त्री यदक्षं कर्म आद्यं व्यूहं वासुदेवसंकर्षण- प्रद्युम्नानिरुद्धव्यूहरूपं प्रथममपि गुणं ज्ञानाख्यं गुणं आह । श्रीवाणीवाङ्मृडान्य एता वा- सुदेवादीनां शक्तयो दिक्षु प्राच्यादिषु स्थिताः सत्यो यस्य वासुदेवसंकर्षणप्रद्युम्नानिरुद्ध- भूतस्याक्षस्य भजनं सेवां विदधति कुर्वन्ति । अक्षस्य प्रथमगुणत्वं च कुत्रेत्याशङ्कमानं प्रति लिख्यते—'वासुदेवादिकं चक्रं व्यूहं प्राथमिकं विदुः । उभयोरपि तादात्म्यं ब्रह्मसंकल्प- भावतः ॥ अजडं स्वात्मसंबोधि निःसङ्गं सर्वगाहनम् । ज्ञानं नाम गुणं प्राहुः प्रथमं गुण- चिन्तकाः ॥ स्वरूपं ब्रह्मणस्तच्च गुणश्च परिकीर्तितः । जगत्प्रकृतिभावो यः सा शक्तिः परिगीयते ॥ कर्तृत्वं नाम यत्तस्य स्वातन्त्र्यपरिबृंहितम् । ऐश्वर्यं नाम तत्प्रोक्तं गुणतत्त्वा- र्थचिन्तकैः ॥ श्रमहानिस्तु या तस्य सततं कुर्वतो जगत् । बलं नाम गुणस्तस्य कथितं गुणचिन्तकैः ॥ तस्योपादानभावेन विकारविरहो हि यः । वीर्यं नाम गुणः सोऽयमच्युत- त्वापराह्वयः ॥ सहकार्यनपेक्षा या तत्तेजः समुदाहृतम् । एते शक्त्यादयः पञ्च गुणा ज्ञा- नस्य कीर्तिताः ॥ ज्ञानमेव परं रूपं ब्रह्मणः परमात्मनः । तदा तु चक्रमित्याहुर्ब्रह्मयाथा- त्म्यवेदिनः ॥' इत्यहिर्बुध्न्यसंहितायामुक्तस्याक्षस्य मध्यस्थितः प्राक्तनपुरुष आदिपुरुषो भ- क्तानां प्रार्थनाभिर्घोरां शान्तां च मूर्तिं प्रथयति । अस्यायमर्थः—यदा भक्ताः शत्रुनिर- सनं प्रार्थयन्ते तदा शत्रुविध्वंसनोग्रविग्रहो भवति । यदेष्टप्राप्तिमीहन्ते तदा प्रसन्नविग्रहो भवति । तदक्षं वो निर्दोषमध्यक्षतामाधिपत्यं दिशतु ॥

रक्षःपक्षेण रक्षन्क्षतममरगणं लक्ष्यवैलक्ष्यमाजौ

लक्ष्मीमक्षीयमाणां बलमथनभुजे वज्रशिक्षानपेक्षे ।

व्यापिनी कथ्यते । यत्तत्त्वबोधो यत्स्वरूपविषयप्रमितिर्निशितमतिभिर्नारदाद्यैरपि कर्तुं न शक्यः सोऽस्त्रराजो वो दुस्तरां दैवीं दैवकृतां मानुषीं मनुष्यकृतां च विपदं क्षिपतु । 'वाणी च पाञ्चरात्री यं कथयति वासुदेवसंकल्पम् । विभवेषु यस्य शक्ती रामप्रमुखास्तसंश्रयिणी ॥ संशक्यते न बोद्धुं यत्तत्त्वं नारदाद्यैश्च । दैवीं च मानुषीं च क्षिपतु स वधकनायको विपदम् ॥' इत्यर्थः ॥

रूढस्तारालवाले रुचिरदलचयः श्यामलैः शस्त्रजालै-
ज्वालाभिः सप्रवालः प्रकटितकुसुमो बद्धसंघैः स्फुलिङ्गैः ।
प्राप्तानां पादमूलं प्रकृतिमधुरया छायया तापहृद्वो
दत्तामुद्दोःप्रकाण्डः फलमभिलषितं विष्णुसंकल्पवृक्षः ॥ ७७ ॥

तारालवाले प्रणवरूपालवाले रूढः प्रादुर्भूतः । श्यामलैः शस्त्रजालैः कुन्तशार्ङ्गकृपाणाद्यायुधवृन्दै रुचिरदलचयः रुचिरो दलानां पर्णानां चयः समूहो यस्य सः । ज्वालाभिररुणकिरणविलासैः सप्रवालः सकिसलयः । बद्धसंघैर्बद्धो नद्धः संघः समूहो यैस्तैः स्फुलिङ्गैः पुङ्खानुपुङ्खं निःसरद्भिः कृशानुकणैः प्रकटितकुसुमः । उद्दोःप्रकाण्ड उद्दामानि दोष्ण्येव प्रकाण्डाः स्कन्धा यस्य सः । पादमूलं चरणाब्जसमीपं प्राप्तानां वृक्षस्य पादस्थानीयं मूलं प्राप्तानां प्रकृतिमधुरया स्वभावरमणीयया छायया कान्त्या अनातपेन तापहृत् सांसारिकतापं सूर्यकिरणतापं च हरतीति तापहृत् । विष्णुसंकल्पवृक्षः श्रीरङ्गिसंकल्पभूतकल्पवृक्षो वो युष्माकमभिलषितं दत्ताम् ॥

धाम्नामैरंमदानां निचयमिव चिरस्थायिनां द्वादशानां
मार्तण्डानां समूहं मह इव बहुलं रत्नभासामिवार्द्धम् ।
अर्चिःसंघातमेकीकृतमिव शिखिनां वाडवाग्रेसराणां
शङ्कन्ते यस्य रूपं स भवतु भवतां तेजसे चक्रराजः ॥ ७८ ॥

यस्य पुरुषस्य रूपं विग्रहं चिरस्थायिनामैरंमदानां वैद्युतानां धाम्नां निचयमिव समूहमिव । द्वादशानां मार्तण्डानां चण्डकिरणानां समूहं समूहीकृतं महत्तेज इव रत्नभासां पद्मरागमणिप्रभासमूहानां बहुलां महत्तरां समृद्धिमिव वाडवाग्रेसराणां वाडवानलादप्यधिकद्युतीनां शिखिनामेकीकृतमर्चिःसंघातमिव शङ्कन्ते विकल्पयन्ति स चक्रराजो भवतां तेजसे सकलजगद्धामप्रकाशाय भवतु ॥

उग्रप्रत्यग्रभुग्नभ्रुकुटि समुकुट कुण्डलस्पृष्टदंष्ट्रं
[illegible] ।
प्रत्यालीढस्थितं [illegible] प्रथयतु भवतां [illegible]
[illegible] रूपम् ॥ ७९ ॥

चक्रेशः सुदर्शनराजः उग्रंपश्यतीत्युग्रंपश्यानि अक्षीणि विलोचनानि यस्य तत्। उद्य-भ्रुकुटि उद्यन्ती भ्रुकुटी भ्रूभङ्गो यस्य तत्। समुकुटं मुकुटयुक्तम्। कुण्डलि कुण्डले अस्य स्त इति कुण्डलि। स्पष्टे दंष्ट्रे यस्य तत्। चण्डास्त्रैश्चण्डानि शत्रुखण्डनपण्डितानि अस्त्राणि येषां तैर्बाहुदण्डैर्लसद्रमणीयम्। अनलसमक्षौमलक्ष्योरुकाण्डं ज्वालावर्णेन क्षौमेन प्रत्यक्षप्रतीतिविषयावूरुकाण्डौ यस्य तत्। प्रत्यालीढस्थपादं प्रत्यालीढगतौ तिष्ठत इति प्रत्यालीढस्थौ पादौ यस्य तत्। पालनव्यग्रं जगद्रक्षणे ससंभ्रमम्। रूपं स्वकीयमाकारम्। अकालकालेरितभटविकटाटोपलोपाय अकालेऽनवसरे कालेन यमेन ईरिताः प्रेरिताश्च ते भटाश्च तेषां विकटाटोप उद्भटव्यापारकोलाहलस्तस्य लोपो नाशस्तस्मै भवतामग्रे पुरस्तात्प्रथयतु प्रकाशयतु॥

चक्रं कुन्तं कृपाणं परशुहुतवहावङ्कुशं दण्डशक्ती
शङ्खं कोदण्डपाशौ हलमुसलगदावज्रशूलांश्च हेतीन्।
दोर्भिः सव्यापसव्यैर्दधदतुलबलस्तम्भितारातिदर्पै-
र्व्यूहस्तेजोभिमानी नरकविजयिनो जृम्भतां संपदे वः॥ ८०॥

चक्रादिषोडशायुधानि अतुलबलस्तम्भितारातिदर्पैः निःसीमबलेन स्तम्भितो विनाशितो अरातिदर्पः प्रत्यर्थिपराक्रमो यैस्तानि तैः सव्यापसव्यैर्वामदक्षिणैर्दोर्भिर्भुजैर्दधत् नरकवि-जयिनस्तेजोभिमानी कृत्स्नं तेजो मदीयमिति योऽभिमनुते स तेजोभिमानी व्यूहोऽवतार-विशेषो वः संपदे ऐश्वर्याय विजृम्भतां परिस्फुरतु॥

पीतं केशे रिपोरप्यसृजि रथपथे(दे) संश्रितेऽप्युत्कटाक्षं
चन्द्राधःकारि यन्त्रे वपुषि च दलने मण्डले च स्वराङ्कम्।
हस्ते वक्त्रे च हेतिस्तबकितमसमं लोचने मोचने च
स्तादस्तोकाय धाम्ने सुरवरपरिषत्सेवितं दैवतं वः॥ ८१॥

पीतं केशे रिपोरप्यसृजि चिकुरनिचये शत्रुशोणितविषये च पीतं पीतवर्णं कृतपानं च। पीता गाव इतिवत्। रथपथे(दे) चक्रे संश्रिते समाश्रितविषये च उत्कटाक्षं उत्कटमतिगम्भीरमक्षं यस्य तत्। उत् उन्नता उदारा उत्करुणाः कटाक्षा यस्य तत्। यन्त्रे वपुषि च सौदर्शनयन्त्रे विग्रहे च चन्द्राधःकारि चन्द्रमधःकरोतीति चन्द्राधःकारि। प्र-थमं चन्द्रमण्डलं विलिख्य तन्मध्ये प्रणवं विरचय्य तदुपरि पुरुषः प्रतिष्ठाप्य इति चन्द्रा-धःकारित्वम्। मनोहरतया स्वप्रभया चन्द्रं निस्तेजस्कं करोतीति चन्द्राधःकारि। दलने मण्डले च शत्रुनिरसने सुदर्शनबिम्बे च स्वराङ्कं स्वरो विजयाह्लादजनितनिर्घोषोऽङ्को लाञ्छनं यस्य तत्। स्वरः प्रणवोऽङ्कश्चिह्नं यस्य तत्। हस्ते वक्त्रे च हेतिस्तबकितं हेतिभिः शस्त्रैः संजातस्तबकं हेतिभिर्वह्निज्वालाभिः स्तबकितं च। लोचने मोचने च नेत्रे शत्रुनिरासाय स्वमोचने चासमं विषमम्। अयुग्ममित्यर्थः। असदृशं च। सुरवरपरिषत्सेवितं सुरवरा

[illegible] क्रान्तलितमहीनकवालार्तशेषा-

[illegible] शेषाः प्रददतु भवतां प्रार्थितं प्रस्थितानि ॥ ८३ ॥

[illegible] पौनःपुन्येन कृतागता अभ्रमाला [illegible] शेषपङ्क्तिर्येषां तानि । अरेति । अरविवरेषु [illegible] निशाकरदिवाकरौ येषां तानि । ज्वालेति । ज्वालाजालैर्[illegible] [illegible] । अत एव स्फुरन्ती शीर्यन्ती उडुपटली नक्षत्रवृन्दं [illegible] [illegible] येषां तानि । चक्रेति । चक्रस्यान्तः प्रविष्टेनाक्रान्तः क्षुण्णश्चक्रानल- [illegible] चलितं कम्पितं महीनकवालं भूमण्डलं तेनार्तः पीडितः शेषोऽनन्तो [illegible] । अश्वत्थामाभिमस्य प्रस्थितानि प्रयाणानि भवतां प्रार्थितं प्रददतु ॥

शूलं त्यक्तात्मशीलं सृणिरणुकघृणिः पट्टिशः स्पष्टसादः
शक्तिः शालीनशक्तिः कुलिशमकुशलं कुण्ठधारः कुठारः ।
दण्डश्चण्डत्वशून्यो भवति तनु धनुर्यत्पुरस्तात्स वस्ता-
त्रस्ताशेषास्त्रवर्गो रथचरणपतिः कर्मणे शार्मणाय ॥ ८४ ॥

यत्पुरस्तात् यस्य पुरुषस्य पुरस्तात् पुरतः शूलं त्यक्तात्मशीलं त्यक्तमात्मशीलं शत्रु-संहारनैपुण्यरूपस्वभावो येन तत् । सृणिरङ्कुशः अणुकघृणिः अणुका नष्टा घृणयो यस्य सः । पट्टिश आयुधविशेषः स्पष्टसादः स्पष्टो व्यक्तः सादो विशरणं यस्य सः । शक्तिः शालीन-शक्तिः शालीना अधृष्टा शक्तिर्यस्याः सा । 'स्यादधृष्टस्तु शालीनः' इत्यमरः । कुलिशं वज्रमकुशलम् । कुठारः कुण्ठधारः । दण्डः प्रचण्डत्वशून्यः प्रचण्डत्वेन कार्येण शून्यो विनाकृतः । धनुश्चापं तनु क्षीणं भवति । त्रस्ताशेषास्त्रवर्गो रथचरणपतिर्वः शार्मणाय शर्मणो ब्रह्मानन्दस्य साधनं शार्मणं तस्मै कर्मणे स्तात् ॥

क्षुण्णाजानेयवृन्दं क्षुभितरथगणं सन्नसांनाह्ययूथं
क्ष्वेलासंरम्भहेलाकलकलविगलत्पूर्वगीर्वाणगर्वम् ।
कुर्वाणः सांपरायं रथचरणपतिः श्रेयसीं वः प्रशस्तिं
दुग्धां दुग्धाब्धिभासं भयविवशसुनासीरनासीरवर्ती ॥ ८५ ॥

भयविवशसुनासीरनासीरवर्ती। हे इन्द्र, भयं मा गाः अहमेव सर्वासुरान्भस्मीकरिष्य इति वदन् युद्धसंनद्धः पुरत एव धावतीत्यर्थः। रथचरणपतिः। क्षुण्णाजानेयवृन्दं क्षुण्ण अजानेयानां(अश्वविशेषाणां) वृन्दः समूहो यस्मिन्कर्मणि तत्।क्षुभितरथगणं क्षुभितो जर्जरीकृतः स्यन्दनसमूहो यस्मिन्कर्मणि तत् । सन्नसांनाह्ययूथं सन्नं विशीर्णं संनद्धानां यूथं यस्मिन्कर्मणि तत्। क्ष्वेलेति। क्ष्वेला विजयनिमित्तकोल्लासजनितसिंहनादास्तासां संरम्भाः संभ्रमास्त एव हेला रथेन रथभञ्जनं हयेन हयताडनमित्येवमादिकाः क्रीडास्तासां कलकलाः कोलाहलाश्च

अभिव्यक्तसौन्दर्यै । एतद्यन्त्रमध्यस्थितस्य सुदर्शनपुरुषस्य रक्तवर्णत्वेन रक्ताम्बरत्वेन रक्तकेशत्वेन रक्तनयनत्वेन च कोणार्णसरोजषट्कं कपिशगुणं भवति । किं चैतद्यन्त्रं कुङ्कुमागरुधातुनन्दनरसकल्प्यं तस्मादपि च कोणादि त्रिषट्कं कपिशगुणं भवति । किं च मन्त्रवाच्यसुदर्शनस्वामिरूपत्वेन तद्वाचकवर्णानां वर्णाधारत्वेन कोणानां च कोणसंबन्धित्वेन सरोजानां च कपिशगुणत्वं युक्तम् । श्रीवाणीपूर्विकाभिः । पूर्विकाशब्देन वाग् मृडानी च गृह्यते । विलसत आनन्दपरवशान् । अथवा शक्तिभिरुपलक्षितान् । विकसत आश्रितरक्षणोन्मुखान् । केशवादीन् द्वादशमूर्तीर्दधति वहति वासुदेवाद्युद्देशेन समष्टिभूतवासुदेवादीनां व्यष्टिभूतस्य केशवादित्रिकचतुष्टयस्य वासुदेवादिसमष्टिभूतश्रीवाणीवाङ्मृडानीनां व्यष्टिभूताः श्रीवाणीवाङ्मृडान्यः शक्तयः वासुदेवव्यष्टिभूतकेशवनारायणमाधवानां वासुदेवशक्तिः श्रीव्यष्टिभूतास्तिस्रः श्रियः प्रत्येकं शक्तयः संकर्षणव्यष्टिभूतगोविन्दविष्णुमधुसूदनानां संकर्षणशक्तिव्यष्टयस्तिस्रो वाण्यः प्रत्येकं शक्तयः। प्रद्युम्नव्यष्टिभूतत्रिविक्रमवामनश्रीधराणां समष्टिशक्तिव्यष्टयस्तिस्रो वाचः प्रत्येकं शक्तयः । अनिरुद्धव्यष्टिभूतहृषीकेशपद्मनाभदामोदराणामनिरुद्धशक्तिव्यष्टिभूतास्तिस्रो मृडान्यः प्रत्येकं शक्तयः । एवंप्रकारेण श्रीवाणीवाङ्मृडानीयुक्तान् केशवादीन्दधति । तारान्ते तारः प्रणवोऽन्तश्चरमसीमा यस्य यन्त्रस्य तस्मिन् । भूपुरादौ भूपुरं चतुष्कोणभूबिम्बमादौ बाह्ये यस्य यन्त्रस्य तत्तस्मिन् । अथवा साधकाः प्रथमभूपुरमधिश्रित्य पश्चात्सर्वलक्षणोपेतं वासमण्डपमधिगत्य तदनन्तरं पद्मसरोजानि क्रमेण संसेव्य ततः षडराणि प्रविश्य पश्चात्तद्गतमन्त्राक्षराण्यनुसंधाय ततः सुधाकरबिम्बं संपूज्य तदनन्तरं सुदर्शनगर्भे तारमादाय सुखिनो भवन्ति तस्माद्यस्य यन्त्रस्य भूपुरमाद्यं तारोऽन्ते तस्मिन् रथचरणगदाशार्ङ्गखड्गाङ्किताशे रथचरणादिभिरङ्किता आशाः प्राच्यादिदिशो यस्य यन्त्रस्य तस्मिन् । तन्त्रोदिते सुदर्शनप्रतिपादकतन्त्रोदिते यन्त्रे कृतपदं विरचितस्थानं लक्ष्मीसखस्य श्रीरङ्गिणो लक्ष्म असाधारणधर्मः स्फुरतु संनिधत्ताम् ।

दंष्ट्राकान्त्या कडारे कपटकिटितनोः कैटभारेरधस्ता-
दूर्ध्वं हास्येन विद्धे नरहरिवपुषो मण्डले वासवीये ।
प्राक्प्रत्यक्सांध्यसान्द्रच्छविभरभरिते व्योम्नि विद्योतमानो
दैतेयोत्पातशंसी रविरिव रहयत्वस्त्रराजो रुजं वः ॥ ९२ ॥

बहिःकोणेषु चतुर्षु तथान्तःस्थान्प्रकल्पयेत्। कोणाभ्यन्तरभावेषु तद्बीजं विन्यसे-त्पुनः॥ परितः सस्वरान्सर्वान्प्रातिलोम्येन चालिखेत्। सकारादि ककारान्तं विन्यसेत्प-रितस्तथा॥ विदर्भितं स्वनाम्नैव परितोऽन्लयुगं न्यसेत्। पाशेन वेष्टयेदेतदङ्कुशेन तथा पुनः॥ पुटितं भूपुरं तस्य बाह्ये कुर्यादतन्द्रितः। केशवादीन्मूर्तिमतः समन्तादस्य विन्य-सेत्॥ तप्तजाम्बूनदप्रख्यं पुण्डरीकायतेक्षणम्। अपारकरुणं पद्मशङ्खचक्रगदाधरम्॥ पी-ताम्बरधरं देवं वनमालाविभूषितम्। हारकेयूरकटककुण्डलैरुपशोभितम्॥ चतुर्बाहुमुदा-राङ्गं प्रसन्नवदनं विभुम्। प्रागादि विन्यसेद्देवं केशवं केशिनाशनम्॥ शङ्खचक्रगदापद्मधरं नीलाम्बुदच्छविम्। सर्वालंकारसंयुक्तं कुर्यान्नारायणं ततः॥ कौमोदकीचक्रशङ्खपद्मधारि-णमव्ययम्। देवमिन्दीवरश्यामं माधवं भावयेत्ततः॥ चक्रं कौमोदकीं पद्मं शङ्खराजवि-राजितम्। इन्दुबिम्बनिभं कुर्याद्गोविन्दममितौजसम्॥ गदाब्जशङ्खचक्राब्जभूषितं भूषणै-र्युतम्। विष्णुं विश्वपतिं कुर्यात्पद्मकिंजल्कसंनिभम्॥ चक्रशङ्खाम्बुजगदाधारिणं करुणानि-धिम्। रक्तपद्मदलप्रख्यं भावयेन्मधुसूदनम्॥ पद्मकौमोदकीचक्रशङ्खसेवितमीश्वरम्। उज्ज्व-लत्पावकप्रख्यं तत्कुर्वीत त्रिविक्रमम्॥ शङ्खचक्रगदापद्मधरं परमभूषितम्। तरुणादित्यसं-काशं वामनं भावयेत्ततः॥ पद्मचक्रगदाशङ्खधरं सद्गुणसागरम्। पुण्डरीकनिभं देवं श्रीधरं परिकल्पयेत्। गदासुदर्शनयुते पद्मशङ्खे च बिभ्रतम्। विद्युत्प्रभं हृषीकेशं कुर्वीत कमले-क्षणम्॥ शङ्खपद्मे तथा चक्रगदे बिभ्राणमुज्ज्वलम्। सहस्रादित्यसंकाशं पद्मनाभं तु कार-येत्॥ पद्मशङ्खगदाचक्रधरं बन्धूकसंनिभम्। भक्तैकसुलभं देवं दामोदरमथो न्यसेत्॥ एवं क्रमेण न्यस्यैतानेषां नामानि विन्यसेत्। नमोन्तान्यमुकं रक्ष रक्षेति च समन्ततः॥ यंशं रंपं तथा लंसं वंहं चेति द्वयद्वयम्। प्राच्यादिषु महादिक्षु प्रादक्षिण्येन विन्यसेत्॥ यशं रपं तथा लसं वहं चेति युगंयुगम्। ईशानादिषु कोणेषु विन्यसेदप्रदक्षिणम्॥ पाशेन तु समावेष्ट्य चाङ्कुशेनापि वेष्टयेत्। सर्वमेतत्सजीवेन लेखामनुभिरावृतम्॥ प्राच्यादिषु चतुर्दिक्षु विन्यसेद्विष्णुमव्ययम्। चक्रकौमोदकीशार्ङ्गखड्गयुक्तं यथाक्रमम्॥ साधारणं च सर्वेषां शङ्खचक्रवरायुधौ। आग्नेयादिषु कोणेषु हृषीकेशं ततो न्यसेत्॥ शङ्खं हलं च मुसलं शूलं तेषु च धारयेत्। त्रिकोणेष्वष्टसु तथा जनार्दनमथो न्यसेत्॥ दण्डं कुन्तं तथा शक्तिं पाशमङ्कुशमेव च। वज्रं तथैव परशुं तथा शतमुखानलम्॥ करेष्वमीषामेतानि विलिखेत्तु यथाक्रमम्। प्रत्येकपरिवारांस्तु तेषां पार्श्वे तु विन्यसेत्॥ वराहरूपिणं देवं श-ङ्खचक्रधरं वरम्। भूमौ च सहितं भूम्या संस्मरेत्पुरुषोत्तमम्॥ अम्बरे नारसिंहं तु चि-न्तयेदमितौजसम्। भीषणं घटितानेकभूषणं दारितासुरम्॥ प्राच्यां दिशि महाज्वाला-गतं चक्रं स्मरेत्पुनः। दक्षिणस्यां दिशि तथा स्मरेज्ज्वालागतां गदाम्॥ प्रतीच्यां शार्ङ्ग-मत्युग्रं ज्वालामध्यगतं स्मरेत्। उत्तरस्यां दिशि तथा स्मरेत्खड्गं सुदारुणम्॥' इति॥

कोणे क्वापि स्थितोऽपि त्रिभुवनविततश्चन्द्रधामापि रूक्षो
रुक्मच्छायोऽपि कृष्णाकृतिरनलमयोऽप्याश्रितत्राणकारी।

धारासारोऽपि दीप्तो दिनकररुचिरोऽप्युल्लसत्तारकश्री-
श्चक्रेशश्चित्रभूमा वितरतु विमतत्रासनं शासनं वः ॥ ९४ ॥

क्वापि कोणे स्थितोऽपि यन्त्रैकदेशे निवसन्नपि त्रिभुवनविततः त्रिभुवनेषु 'चरणं पवित्रं विततं पुराणम्' इति श्रुत्युक्तत्वेन प्रसिद्धः। क्वचित्कोणे स्थितस्य त्रिभुवनव्यासत्वं विरुद्धम्। रुक्मच्छायोऽपि सुवर्णकान्तिरपि कृष्णाकृतिः श्रीरङ्गराजाकृतिः। सुवर्णवर्णस्य नीलवर्णत्वं विरुद्धम् । अनलमयोऽप्याश्रयाशस्वरूपोऽपि आश्रितत्राणकारी भक्तरक्षाविधायी। आश्रयाशस्य स्वाश्रितरक्षणं विरुद्धम् । धारासारोऽपि धारायां कोट्यां सारोऽपि निशितोऽपि दीप्तः प्रज्वलितः । वर्षधाराविशेषस्य दीप्तत्वं विरुद्धम् । दिनकररुचिरोऽपि सूर्यप्रकाशोऽप्युल्लसत्तारकश्रीः प्रस्फुरत्प्रणवलक्ष्मीः । सूर्यतेजस उल्लसन्नक्षत्रलक्ष्मीत्वं विरुद्धम् । चित्रभूमा नानाप्रकारेण विरुद्धधर्माश्रयत्वप्रतीतेराश्चर्यमहिम्ना चक्रेशो वो युष्माकं विमतत्रासनं प्रत्यर्थिभयंकरं शासनमाज्ञां वितरतु प्रदिशतु । अनेन श्लोकेन यन्त्रमध्यस्थितपुरुषस्वरूपं न्यरूपि ॥

शुक्लः शक्र स्तवस्ते सह दहन कलां काल तेऽयं न कालः
किं वो रक्षांसि रक्षा तव फलतु पते यादसां पादसेवा ।
वायो हृद्योऽसि भर्तुस्त्यज धनद मदं सेव्यतां त्र्यम्बकेति
प्राहुर्यद्यन्त्रपालाः स दनुजविजयी हन्तु तन्द्रालुतां वः ॥ ९५ ॥

हे शक्र देवेन्द्र, ते स्तवः स्तोत्रं शुक्लः शब्दार्थगुणादिसर्वलक्षणसंपन्नतया निरतिशयभक्तियोगात्मतया च कृतं स्तोत्रं निर्मलम् । हे दहन पावक, कलामल्पकालं सह तिष्ठ पश्चाद्भवतः सेवावसरो भविष्यति। हे काल, ते तवायं न कालः नावसरः । हे रक्षांसि वो भवतां रक्षा किम्। सर्वरक्षकस्य भवत्कृतरक्षया किं प्रयोजनमित्यर्थः। हे यादसांपते वरुण, तव पादसेवा भवत्कर्तृका भगवच्चरणारविन्दसेवा फलतु । भवत्कृतसेवया भगवान्प्रसन्नो भूयादित्यर्थः। हे वायो भर्तुर्नायकस्य हृद्योऽसि हृदयंगमोऽसि। हे धनद कुबेर, मदं दुरहंकारं त्यज। हे त्र्यम्बक त्रिलोचन, चक्रेश्वरः सेव्यताम् । इत्यनेन प्रकारेण यद्यन्त्रपाला यस्य भगवतो यन्त्रं पालयन्तीति यन्त्रपालाः प्राहुः स दनुजविजयी वस्तन्द्रालुतां जाड्यं हन्तु । अनेन प्रकारेणैतद्यन्त्रमध्यस्थितपुरुषचरणसेवोन्मुखदिक्पालनिवहदेशनकृतो यन्त्रपालव्यापारः कथ्यते ॥

गायत्र्यर्णारचक्र इत्येतत्समारभ्य यस्मिन्विन्यस्त इत्याद्यवधिकचतुःश्लोक्यां सुदर्शनम-
मा व्यस्तारि। प्रथममनुसखस्मेरपत्रारविन्दे प्रथमश्चासौ मनुर्मन्त्रश्च प्रथममनुर्वासुदेवमन्त्रः
वासुदेवमन्त्रस्य प्रथमत्वं प्रथमव्यूहप्राथमिकवासुदेवप्रतिपादकत्वेन। प्रथममनोर्द्वादशाक्षर-
सखानि मित्राणि स्मेराणि विकसितानि च प्रथममनुसखस्मेरपत्राणि यस्यारविन्दस्यालक्ष-
णां प्रथममनुसखत्वं द्वादशसंख्यावत्तया वासुदेवद्वादशाक्षरमन्त्रवर्णगर्भत्वाच्च। प्रथममनु-
सखस्मेरपत्रारविन्दं यस्मिंश्चक्रे तत्तस्मिन्। वह्नेस्त्रिकोणं बिम्बं वहति कमलकर्णिकास्थाने
वह्नेर्मण्डलं दधाति। जयिजयाद्यष्टशक्तौ जयिनी च जया च जयिजये शक्ती आदिर्यासां ता
जयिजयादयः। आदिशब्दग्राह्याः शक्तयो मोहिनीह्लादिन्यजितामायापराजितासिद्धयः। ज-
यिजयादयोऽष्टौ शक्तयो यस्मिन् गायत्र्यर्णारचक्रे गायत्र्या वर्णानि चतुर्विंशत्यक्षराणि तान्ये-
वाराणि यस्य तद्गायत्र्यर्णारम्। अथवा गायत्र्यर्णाश्चतुर्विंशतिसंख्याकान्यक्षराणि यस्य चक्रस्य
तद्गायत्र्यर्णारं तच्चक्रं च तस्मिन्। अशोकमूले अशोकनामकवृक्षमूलभागे निषण्णा सना-
सीना। पदसविधलसद्भीमभीमाक्षभीमा। पदसविधे चरणसमीपे लसन्तौ प्रकाशमानौ
भीमौ भयंकरौ भीमाक्षसंज्ञकौ पुरुषौ ताभ्यां भीमात्युग्रा दिव्यास्त्रधामा दिव्यास्त्रं चक्रं
धाम स्थानं यस्याः सा। पुरुषहरिमयी नरसिंहमयी। अपूर्वा अभिनवा पुंसो मूर्तिर्विग्रहो वः
शोकं दुःखमस्य तु क्षिपतु। आचार्यप्रसादेन किंचिदवगतः सुदर्शननारसिंहयन्त्रचक्रोद्धा-
रक्रमः कथ्यते—यन्त्रापराङ्गमध्ये गायत्रीवर्णसंख्याक्षरसंबन्धरमणीयं नेमिवेष्टितं चक्रं
विलिख्य चक्रमध्ये द्वादशदलं कमलं विरचय्य दलेषु द्वादशाक्षरवासुदेवयन्त्राक्षराणि नि-
क्षिप्य तत्कमलकर्णिकास्थाने त्रिकोणमाग्नेयमण्डलं विलिख्य तत्प्रान्ते चाशोकशाखिनं
निधाय तन्मूले समासीनं परिकलितचतुश्चक्रचतुर्भुजविराजितं योगपट्टपरिवेष्टितदिव्याङ्गं
कालानलसंकाशं नृसिंहं प्रतिष्ठाप्य तच्चरणसमीपे भयंकरविग्रहौ भीमाक्षसंज्ञकौ पुरुषौ
विलिख्य चक्रस्य प्राग्भागे जयां चाग्नेये मोहिनीं याम्ये विजयां च नैरृते ह्लादिनीं च
पश्चादजितां वायव्ये मायां चोदग्भागेऽपराजितां च ईशाने सिद्धिं संस्मृत्य साधकः पूर्ण-
कामो भवेत्। उक्तार्थेऽहिर्बुध्न्यसंहितामुदाहरामः—'अपराङ्गेऽथ यन्त्रस्य मध्ये चक्राङ्गसं-
स्थितम्। चतुर्विंशत्यरं चक्रं सुनेमि रुचिराकृतिम्॥ गायत्रीवर्णसंख्याकान्यराण्यक्षरवन्ति
च। मध्ये चक्रं न्यसेत्पद्मं युक्तं द्वादशभिर्दलैः॥ दलेषु तेषु विलिखेद्वासुदेवमनुं बुधः।
चक्राब्जकर्णिकास्थाने न्यसेदाग्नेयमण्डलम्॥ तन्मध्ये योगपट्टेन पिनद्धाङ्गं सनातनम्। नार-
सिंहं चतुर्बाहुं चतुश्चक्रधरं परम्॥ समासीनमशोकस्य मूले कालानलद्युतिम्। सर्वाभरण-
संयुक्तं भक्तसर्वार्तिहारिणम्॥ अपरासंख्यकल्याणगुणपूर्णमहार्णवम्। भक्तानुकम्पिनं नित्यं
सर्वलोकैकनायकम्॥ एवं विलिख्य तत्पादपर्यन्ते चिन्तयेदुभौ। तदाज्ञाकारिणौ भीमौ
नीलनीरदविग्रहौ॥ उदग्रकायौ भीमाक्षौ भीमायुधधरौ वरौ। दंष्ट्राकरालवदनौ विन्यस्या-
रुणलोचनौ॥ चिन्तयेदथ चक्रस्य समन्तादष्टयोषितः। ऊर्ध्वमाबद्धकेशाढ्यास्तच्छक्तीः
प्राप्तयौवनाः॥ सर्वालंकारसंयुक्ता द्विभुजा माल्यधारिणः। प्राच्यां दिशि जयां देवीं वि-
जयां कृष्णरूपिणीम्॥ रक्तवर्णां तदा देवीं नैरृत्यां ह्लादिनीं तथा। अजितां पीतवर्णां तु

प्रतीच्यां संस्मरेत्परम् ॥ एवमेतन्महायन्त्रं महापातकनाशनम् । आयुरारोग्यधनदं पुत्रमित्रकलत्रदम् ॥ सर्वविघ्नोपशमनं सर्वदुष्टनिवारणम् । यो यदिच्छेदितो यन्त्रं तत्तदस्य प्रयच्छति ॥ मणिविद्रुममुक्ताढ्यं कुर्याद्यन्त्रं हिरण्मयम् । राजा चेद्राज्यमाप्नोति निष्कण्टकमनामयम् ॥ भूर्जपत्रे लिखित्वा तु कुङ्कुमैश्चन्दनेन तु । यो मर्त्यः शिरसा धत्ते तस्य स्यात्सर्वमीप्सितम् ॥ पिशाचोरगरक्षांसि क्षिप्रं नश्यन्ति तत्र वै । शिलाप्रतिष्ठां यः कुर्यादेतस्य जगतीतले । सर्वान्कामानिहावाप्य विष्णुलोके महीयते । लोहैर्वा रजतेनाथ यः कुर्यात्प्रतिमां बुधः । त्रिवर्गफलमाप्नोति निर्वाणमचिरात्पुनः ॥ कर्षणादिप्रतिष्ठान्तं कुर्यादायतनं च यः । स प्राप्नोति चतुर्दश्यां पुण्यल्लोँकानुत्तमान् ॥ प्रयाणे च सङ्ग्रामे वादे वा यः स्मरेदिदम् । विजयस्तस्य हस्तस्थो नात्र कार्या विचारणा ॥ अर्चयेद्यन्त्रिणं यो वै यन्त्रमेतदनुत्तमम् । तापत्रयविनिर्मुक्तो विष्णुलोके महीयते ॥' इत्यादि ॥

पाश्चात्याशोकपुष्पप्रकरनिपतितैः प्रातरागं परागैः
संध्यारोचिःसगन्धैः स्वपदशशधरं प्रेक्ष्य तारानुपक्षम् ।
पद्मानाबद्धकोपानिव सुरनिवहैरञ्जलीन्कल्पमानां-
श्चक्राधीशोऽभिनन्दन्प्रदिशतु सहसासुरमशोकतां वः ॥ ९७ ॥

पाश्चात्याशोकपुष्पप्रकरनिपतितैः पश्चाद्भागे स्थितः पाश्चात्यः स चासावशोकश्च तस्य पुष्पाणि तेषां प्रकराः समूहास्तेभ्यो निपतितास्तैः संध्यारोचिःसगन्धैः संध्याया रोचिर्दीप्तिः [illegible] इति यावत् । तस्याः सगन्धा सदृशानि । समाना इत्यर्थः । परागैः कुसुमरेणुभिः प्रातरागं समधिकलोहितानाम् । तारानुपक्षं [illegible] । स्वपदशशधरं [illegible] पदं स्थितिस्थानं [illegible] चन्द्रमण्डलं प्रेक्ष्य आबद्धकोपानिव [illegible] कुड्मलानिव स्थितान् । सुरनिवहैर्देवगणैः [illegible] संघटित [illegible] न्दन् संतुष्यन् । [illegible] र्थः । चक्राधीशो यो सुदर्शनः सहसा [illegible] श्लोको [illegible] ताम् । '[illegible] यशांसि च श्लोक' इत्यमरः । [illegible] पात् । [illegible]

[illegible]

वहुविधशाखोपशाखोपलक्षितवैभवस्य वेदस्य मूले 'यो वेदादौ स्वरः प्रोक्तः' इति सकल-वेदमूलतया श्रुतिप्रसिद्धे प्रणवे विहितं पदं स्थानं येन तत् । चक्रैश्चतुर्भिः सुदर्शनत्वादै-र्वैस्तत्सुदर्शनमाद्यं येषां तानि तैरस्त्रैः पाशाङ्कुशाब्जमुसलैर्धनुःशङ्खगदारूपैरायुधैरपि महि-तचतुर्द्विश्चतुर्वाहुदण्डम् महिताः पूजिताश्चत्वारो वाहुदण्डा द्विचतुर्वाहुदण्डा यस्य तत् । पश्चाद्भागेऽपरभागे पूर्वत्र पूर्वस्मिन्प्रदेशे स्फुटतरहरितामानुषं हरेः सिंहस्य भावो हरिता मनुष्यभावो मानुषं हरिता च मानुषं च हरितामानुषे स्फुटतरे हरितामानुषे यस्य तत् आसीनं स्थितं पुरोभागे समुत्थितं तद्भासमानं प्रकाशमानमेकं तत्त्वं वो युष्मान् जानुषाद् जनुषो जन्मन उद्भूतं जानुषं तस्माद्भयात्त्रायतां रक्षतु । अनेन श्लोकेन यन्त्रापराङ्गस्थित-नृसिंहस्वरूपं पुरोभागस्थितसुदर्शनपुरुषस्वरूपं च तयोरैक्यं च प्रतिपादितम् ॥

प्राणे दत्तप्रयाणे मुषितदिशि दृशि त्यक्तसारे शरीरे
मत्यां व्यामोहवत्यां सतमसि मनसि व्याहृते व्याहृते च ।
चक्रान्तर्वर्ति मृत्युप्रतिभयमुभयाकारचित्रं पवित्रं
तेजस्तत्तिष्ठतां वस्त्रिदशकुलधनं त्र्यीक्षणं तीक्ष्णदंष्ट्रम् ॥ ९९ ॥

प्राणे प्राणवायौ दत्तप्रयाणे प्राप्तनिर्गमे निष्क्रमणोन्मुखे सति दृशि नयनेन्द्रिये मुषि-तदृशि मुषिता अपहृता दृग्दर्शनं यस्याः सा तस्यापगतविषयग्रहणसामर्थ्यायां सत्याम् । अत्यन्तपरवश इत्यर्थः । मत्यां व्यामोहवत्यां भ्रान्तिमत्याम् । मनसि स्वान्ते सतमसि अ-न्धकारेण विलीने सति । मृत्युप्रतिभयं मृत्योर्भयंकरम् । 'भयंकरं प्रतिभयम्' इत्यमरः । उ-भयाकारचित्रं नराकारेण सिंहाकारेण च चित्रमाश्चर्यम् । त्रिदशकुलधनं त्रिदशकुलस्य देवसमूहस्यापद्धनम् । त्र्यीक्षणं त्रिलोचनम् । तीक्ष्णदंष्ट्रं निशितदंष्ट्राग्रम् । चक्रान्तर्वर्ति च-क्रमध्यसंचारि । पवित्रं 'चरणं पवित्रं' इति श्रुतिसिद्धं पवित्रसंज्ञकम् । तत्प्रसिद्धं तेजो वो युष्मभ्यं तिष्ठतां स्वरूपं प्रकाशयतु । 'प्रकाशनस्थेयाख्ययोश्च' इत्यात्मनेपदम् । अनेन श्लोकेन तद्यन्त्रमध्यवर्तिपुरुषः सर्वास्वापदासु प्राणिनां रक्षक इत्युक्तम् ॥

यस्मिन्विन्यस्य भारं विजयिनि भवतां जङ्गमस्थावराणां
लक्ष्मीनारायणाख्यं मिथुनमनुभवत्यत्युदारान्विहारान् ।
आरोग्यं भूतिमायुः कृतमिह वहुना यद्यदास्पदं व-
स्तत्तत्सद्यः समस्तं दिशतु स पुरुषो दिव्यहेत्यक्षवर्ती ॥१००॥

लक्ष्मीनारायणाख्यं लक्ष्मीश्च नारायणश्च लक्ष्मीनारायणं लक्ष्मीनारायणमित्याख्या संज्ञा यस्य तन्मिथुनमाद्यं मंयतं (?) भवतां भव[illegible]मधिष्यतां जङ्गमस्थावराणां चराचरात्मरूपे-णावस्थितानाम् । 'जगतां जङ्गमस्थावराणाम्' इति पाठे चरस्थिरात्मरूपेणावस्थितानां जगतामित्यर्थः । रक्षाविधायनेकप्रकारमिमं भारं विजयिन्यप्रतिहतपराक्रमे यस्मिन्सुदर्श-नपुरुषे विन्यस्य निक्षिप्य [illegible] विहारान्विनोदप्रपञ्चाननुभवति

निर्विशति दिव्यहेलक्षपर्वा सुदर्शनाख्यनरपदवंचारी पुन्य आरोग्यं नीरोगत्वं भूतिरै-श्वर्यमायुर्दीर्घकालजीवितं दिशतु । इहाधिताऽर्थप्रदानदीक्षितसुदर्शनस्तवविषये बहुना उक्तं बहुवचनेन बाहुल्येनालम् । बहुभिर्वचनैः किं प्रयोजनमित्यर्थः । यो युष्माकं यद्यदास्पदं मद्धृत्सुमनोरथगतं तत्तत्समस्तं वस्तु नित्यं दिशतु ददातु ॥

पद्यानां तत्त्वविद्याद्युमणिगिरिशविध्यग्निसंख्यावराणा-
मर्चिःष्वङ्क्षेषु नेम्यादिषु च परमतः पुंसि षड्विंशतिश्च ।
संघैः सौदर्शनं यः पठति कृतमिदं कूरनारायणेन
स्तोत्रं निर्विष्टभोगी भजति स परमां चक्रसायुज्यलक्ष्मीम् ॥१०१॥

इति श्रीकूरनारायणमुनिप्रणीतं सुदर्शनशतकं समाप्तम् ।

अर्चिःषु ज्वालासु चित्रने नेम्यादिष्वेषु च नेम्यरनाभ्यक्षसंख्यावयवेषु च तत्त्वविद्याद्यु-मणिगिरिशविध्यग्निसंख्यावराणां [illegible] च विद्याश्च द्युमणयश्च गिरिशाश्च [illegible] च तेषां संख्या । तत्त्वानि चतुर्विंशतिः विद्याश्चतुर्दश द्युमणयो द्वादश गिरिशा एकादश वि-[illegible] संख्या [illegible] संख्यावराणि । तत्र ज्वाला[illegible] पद्यानि [illegible] पद्यानि [illegible] नाम् । अतः पुंसि सुदर्शनपुरुषविषये षड्विंशतिः पद्यानाम् । संघैः [illegible] संघैः कूरनारायणेन [illegible] कृतं निर्मितमिदं सौदर्शनं स्तोत्रं यः पठति स पुरुषो निर्विष्टभोगः [illegible] परमां [illegible] भजति ।

इति श्रीसुदर्शन[illegible] ॥

श्रीविश्वेश्वरपण्डितप्रणीतं

कवीन्द्रकर्णाभरणम्

[illegible] ।

अभिमतकर्मारम्भणसमये विघ्नविघातार्थमानरिसमभीष्टदेवतानमस्कारं शिष्यशि
निबध्नन्नेव प्रतिजानीते—

हितहेतोर्महयित्वा हरिहरहेरम्बमिहिरहैमवतीः ।
विश्वेश्वरो वितनुते कवीन्द्रकर्णाभरणमेतत् ॥ १ ॥

हितेति ॥ 'निमित्तकारणहेतुषु सर्वासां प्रायदर्शनम्' इति हेतोरिति पञ्चमी
वा । हितार्थमित्यर्थः । हितं चात्र प्रारिप्सितसमाप्तिर्विघ्ननाशो वा । 'मह पूजायाम्' । '
मङ्गलमंगल्यं वरेण्यमनघं शुचिम् । नारायणं नमस्कृत्य सर्वकर्माणि कारयेत् ॥' इति वा
पुराणम् । 'अर्थः शंभुः शिवा वाणी' इति लिङ्गपुराणम् । 'आदित्यस्य सदा पूजां ति
स्वामिनस्तथा । महागणपतेश्चैव कुर्वन्सिद्धिमवाप्नुयात् ॥' इति याज्ञवल्क्यः । अन्यत्स्पष्ट

स्वग्रन्थस्य पूर्वग्रन्थैर्गतार्थत्वमभ्युपगम्याह—

विहिता महामहिमभिर्विद्यन्ते यद्यपि निबन्धाः ।
तदपि परिप्लवतायाः परिपाकोऽयं ममोदेति ॥ २ ॥

विहिता इति ॥ महामहिमभिर्विदग्धमुखमण्डनकारादिभिः । तथा च महानुभावकृ
ग्रन्थानां महत्त्वमर्थसिद्धमित्यर्थः । परिप्लवतां चाञ्चल्यम् । 'पारिप्लवपरिप्लवे' इत्यमरः ।
रिपाकः फलम् । तथा च चापलात्प्रवृत्तो न पर्यनुयोगयोग्य इत्यर्थः ॥

वस्तुतो न गतार्थत्वमित्याह—

यदभिहितं बहु महितं पूर्वाचार्यैर्विचार्यैव ।
अनुकुर्वन्किंचित्तद्बहुविद्भिर्नाहमुपहास्यः ॥ ३ ॥

नाम्नि नगरे वर्तत इति पर्वतीयेभ्यः श्रूयते. ग्रन्थाश्चानेन बहवः प्रणीताः, तन्मध्येऽस्मदव
तास्त्वेते—(१) अलंकारकौस्तुभः सटीकः, (२) अलंकारमुक्तावली, (३) आर्यासप्त
शती सटीका, (४) कवीन्द्रकर्णाभरणं सटीकम्, (५) काव्यतिलकम्, (६) काव्यर
त्नम्, (७) तर्ककुतूहलम्, (८) दीधितिप्रवेशः, (९) नवमालिका नाटिका, (१०)
नैषधीयकाव्यटीका, (११) मन्दारमञ्जरीकथा गद्यनिबद्धा, (१२) रसचन्द्रिका,
(१३) रसमञ्जरीटीका, (१४) रोमावलीशतकम्, (१५) लक्ष्मीविलासः, (१६)
वक्षोजशतकम्, (१७) शृङ्गारमञ्जरी सट्टकम्, (१८) षड्ऋतुवर्णनम्, (१९) सिद्धा
न्तसुधानिधिः, (२०) होलिकाशतकम्, (२१) केचन तान्त्रिकग्रन्थाः तत्र कवीन्द्र
कर्णाभरणं विदग्धमुखमण्डनानुसारि ततोऽपि चमत्कारि च. अस्य पुस्तकद्वयमस्माभिरा
सादितम्. तत्रैकमलवरमहाराजाश्रितपार्वतीयपण्डितलक्ष्मणदत्तपन्तसकाशात्पण्डितशिव
दत्तशर्मभिः परारिवर्षे समानीतमासीत्. अपरं चाधुना पञ्जाबदेशान्तर्वर्ति'भदौड'नगराधी
श'सर् सर्दार अतरसिंह साहेब के. सी. आय् ई.' इत्येतैर्लुधियानानगरस्थस्वकीयपुस्तका
लयात्प्रहितम्. एतत्पुस्तकद्वयमपि शुद्धमनतिप्राचीनं चास्मन्मुद्रणाधारतां गतमिति शिवम्.

यदिति ॥ बहु इति क्रियाविशेषणम्। तच्चाभिधानस्य प्रशंसायां वा बहुभिर्नेहितं पूजितमिति वा। न च 'मतिबुद्धिपूजार्थेभ्यश्च' इति वर्तमाने क्तप्रत्यये 'क्तस्य च वर्तमाने' इति षष्ठीप्रसक्तावृतीयैव दुर्लभा, षष्ठ्यां च 'क्तेन च पूजायाम्' इति समासनिषेधापत्तिरिति वाच्यम्। भूते क्तप्रत्ययव्याख्यानात्। शेषषष्ठीसमासो वा इत्यन्यत्र विस्तरः। किंचिदिति। क्वचिन्न्यूनं क्वचिदतिरिक्तमित्यर्थः। तथा च संक्षेपविस्तराभ्यां किंचिद्भावविच्छित्तिभ्यां न गतार्थत्वमित्यर्थः ॥

मन्दबुद्धिभिरनादरेऽप्यस्य न मम हानिरित्याह—

एतच्चेदनुगृह्यते सहृदयैः शुद्धप्रकाशोदयै-
स्तत्स्यादेतदुपेक्षकैरपि खलैर्नाविघ्नमुच्छृङ्खलैः।
शुभ्रांशोः शशिशेखरेण शकलं नीतं सदुत्तंसतां
किं स्वप्नेऽपि विधुंतुदेन कवलीकर्तुं क्वचित्पार्यते ॥ ४ ॥

एतदिति ॥ अनुगृह्यते उपादेयत्वप्रकारकज्ञानविषयं क्रियते। सहृदयैः सदसद्विवेचनसमर्थैः। तत्रासामर्थ्यमाह—शुद्धेति। शुद्धः संशयविपर्ययरहितः प्रकाशस्य तत्तज्ज्ञानविषयार्थस्य उदयो ज्ञानं येषां तैरित्यर्थः ॥ प्रकाश्यते प्रतिपाद्यते इति प्रकाश[illegible]वादोऽर्थः। कर्मणि घञो व्याख्यानात्। उदय उत्कृष्टं ज्ञानम्, उत्कर्षश्च संशयविपर्ययराहित्यम्। तेन शुद्धपदेन न गतार्थत्वम्। अत एव खलानां तद्राहित्यमूहनीयम् उत्कृष्टत्वमित्युक्तम् ॥

वक्ष्यमाणजातीरभिधत्ते—

व्यस्तं समस्तं द्विः पूर्वं विशिष्टं च परम्परम्।
एकालापं प्रभिन्नं च भेद्यभेदकमूर्जितम् ॥ ५ ॥
सालंकारकौतुकप्रश्नोत्तरपृष्टपूर्वकप्रश्नम्।
भग्नादिमध्यचरमोत्तरं कथितनिह्नुतिविषमम् ॥ ६ ॥
वृत्तं नामाख्यातं तार्किं सौत्रं च शाब्दिकार्थीयं ॥ ६
वर्णाक्षरच्युतकादर्थान्यापादाश्चोत्तरं परतः ॥ ९ ॥
चक्राब्जचक्रपदं गोमूत्री सर्वतोभद्रम्।

परादाहरति—

मेघ्येगुनेन समुपेत्य शिखण्डी कुत्र ताण्डवमखण्डितमाधात् ।
ना क जनितेन जयोऽगाद्बभ्रुवाहननिरूपितभङ्गम् ॥

हि   गाङ्गेयसंग

से शिखण्डिनो मयूरस्य नृत्यवर्णनाद्विरोधः । अर्जुनद्रुपदपुत्रयोर्विवक्षित
शिखण्डिनः स्त्रीपूर्वत्वात्तत्र भीष्मेण बाणानामक्षेपणात्तद्व्यवहितेनार्जु
स्पष्टम् । तत्रैव तज्जनितपातकवशाद्वसूनां शापेन गङ्गाशापेन च बभ्रु
णाश्वमेधहयरक्षायां स हत इत्यश्वमेधपर्वणि स्पष्टं श्रीमहाभारते ॥

व

चन्द्र तं ब्रूहि यत्र निःशङ्का हंसा अपि सयोषितः ।
दृक्षा सहस्रपत्रयुक्तेऽपि किं च भङ्गोऽस्ति सर्वदा ॥

पद्माकर

स्त्रीणां योषित्साहित्याद्विरोधः । पक्षिणामनुपादानात्परिहारः । पत्रभङ्ग
परत्वाभिप्रायेण विरोधः । दलतरङ्गपरत्वेन परिहारः । उभयत्रापि स
योत्तरमिति लक्षणसमन्वयः ॥ इति समस्तजातिः ॥

नस्तयोर्लक्षणमाह—

नस्तं यत्तत्पदभङ्गविभेदाद्द्विधोत्तरं भवति ।
नम् :समस्तमेतत्समस्तपदमुत्तरद्वितयम् ॥ १२ ॥

इति दच्छेदेन नानोत्तरं भवति तद्विन्यस्तम् । यत्रखण्डमेव समासपदमका
जैनि ति तद्विःसमस्तमित्यर्थः । अत्राप्यवान्तरभेदस्याप्रयोजकत्वात् ॥

रति—

ऽ कुर्वन्ति तरुण्यो विलासभरमन्थरास्तरुणान् ।
। कुमुदवान्धवान्तर्विकसति सुरभौ समेते का ॥

मदयन्तिकालता ।

॥ 'मदयन्ति' इत्युत्तरम् ॥ 'चन्द्रस्याभ्यन्तरे का' इत्यत्र 'काल
[illegible] ॥ 'दम्भते व' [illegible] मदयन्तिका [illegible]

ईषत्तारा सुभ्राजनाः । किंनिद्रुमतिमत्त्वाज्ज्ञया पुनरनेन कदाचिदपि प्रियेण दर्शनाय ॥ श्लोको व्यस्तपदभङ्गः ॥

इति द्विःसमस्तव्यस्तजातिः ॥

द्विःसमस्तद्विर्व्यस्तमुदाहरति—

मधौ परभृता कीदृक्कौशल्या वद कीदृशी ।
कीदृग्वराङ्गनादृष्टिः कीदृशी कुनदी शरत् ॥

सुतरामानन्दितारा ।

मधाविति ॥ वसन्ते परभृता कोकिला सुतो जनितो रामानन्दी स्त्रीमनोहरस्तारो व्यक्तशब्दो यया तादृशी भवति । सुतेन रामेण आनन्दिता रावणादिवधेन तोषिता आरा देवा यस्यास्तादृशी कौशल्या भवति । इति द्वौ समस्तपदच्छेदौ । सुतराम् अत्यर्थमानन्दिनी आनन्दयुक्ता आनन्दजनिका वा तारा अक्षिकनीनिका यस्यास्तादृशी युवतिदृग्भवति ॥ क्षुद्रनदी सुतरा सुखेन तरीतुं शक्या भवति शरच्च मा लक्ष्मीस्तयानन्दिन्य उल्लासशीलास्तारा नक्षत्राणि यत्र तादृग्भवति ॥ इति द्वौ व्यस्तपदच्छेदौ ॥

कीदृक्तनुर्वरतनोर्भवभूतिराह
किं नाटकं न कवयोऽविदधुर्मधौ काम् ।
साध्वी कियत्त्वनिति का कुरुते हरिं किं
कां वा स तिष्ठति महद्गहनं च कीदृक् ॥

मालतीमाधवम् ।

मालतीपुष्पस्य मां लक्ष्मीं धुनोति अवहेलयति तादृशं मालतीमाधवं कामिनीगात्रम् । 'धूञ् कम्पने' 'ॠदोरप्' इत्यप्प्रत्ययः । मालतीमाधवसंज्ञं नाटकं भवभूतिः कविः कृतवान् । इति द्वौ समस्तपदच्छेदौ । मालतीं जातिं वसन्ते कवयो न वर्णयन्ति 'नियमाच्च जात्यादेः' इति कल्पलतायाम् । आधवं पतिजीवनपर्यन्तं पतिव्रता जीवति । मा लक्ष्मीर्विष्णुम् अलति भूषयति । सोऽपि ई लक्ष्मीं भूषयति ॥ आ समन्ताद् धवा वृक्षविशेषा यत्र तादृशं महावनं भवति । इति द्वौ व्यस्तपदच्छेदौ ॥

इति द्विःसमस्तद्विर्व्यस्तजातिः ॥

एकालापकलक्षणमाह—

यत्रैकस्मिन्समस्ते पदे स्पष्टमेवार्थद्वयं प्रतीयते तदेकालापकम् ॥ नन्वेतत्तेनैव गतार्थमत आह—द्विःसमस्तेति । तद्विशेष एवायं भेदः । अर्थस्य सदृशा प्रतीत्यप्रतीतिभ्यामेव वैलक्षण्यस्योक्तत्वादित्यर्थः ॥

उदाहरति—

कीदृग्बभूव वैदेहीविवाहे भृगुनन्दनः ।
कामिन्याः क्रीडमानायाः कीदृशः कन्दुकः करे ॥

रामास्तनाकारः ।

रामेण दाशरथिना अस्तः प्रतिषिद्धो नाकारः स्वर्गगमनं यस्य तादृक् । तदीयवैष्णवधनुराकर्षणेन जामदग्न्यस्य स्वर्गतेर्निषेधात् ॥ 'ऋ गतौ' इत्यस्य भावे घञि आर इति रूपम् । रामायास्तरुण्याः स्तनाकृतिः कन्दुको भवति । इति द्वौ समस्तपदच्छेदौ ।

इत्येकालापकम् ॥

प्रभिन्नकमाह—

सति शब्दार्थयोर्भेदे वचनस्य सुपां तथा ।
लिङ्गस्य च भिदा यत्र तद्वदन्ति प्रभिन्नकम् ॥ १६ ॥

यत्र शब्दार्थयोर्भिन्नत्वे सति विभक्तिवचनलिङ्गानां भेदस्तत्प्रभिन्नकमित्यर्थः ॥ तत्र शब्दार्थवचनभिन्नमुदाहरति—

माद्यत्परभृता साम्यं कुत्र वा कलयन्ति काः ।
मधुरोऽप्यभिधानेन मनसा कीदृशः खलः ॥

गिरिसारसदृशः ।

माद्यदिति ॥ सारसं कमलं तत्तुल्या दृशो यासाम् । यद्वा सारसः पक्षिविशेषः तस्य दृशाविव दृशौ यासां ता इत्यर्थः । गिरि वाण्यां मत्तकोकिलासाम्यं धारयन्ति । इति व्यस्तपदच्छेदः ॥ मधुरवचनोऽपि दुर्जनो मनसा गिरिसारस्य लोहस्य सदृशो भवति काठिन्यात् । इति समस्तपदच्छेदः ॥दृश इत्याद्ये प्रथमाया बहुवचनान्तम्। सदृश इत्येकवचनमिति भेदः॥

मुहुरार्तजनरुजाकृत्पृच्छति कः संपदां क्षयकृत् ।
पद्माकरा जलधरावसानसमये भवन्ति कीदृक्षाः ॥

बहुधार्तराष्ट्रशकुनयः ।

बहुधा वारंवारं आर्तान्दीनान् राष्ट्रं तत्स्थाञ्जनांश्च श्यति तनूकरोति इति बहुधार्तराष्ट्रशः । 'शो तनूकरणे' । 'आतश्चोपसर्गे' इति कप्रत्ययः । तस्य संबुद्धिः ॥ कुत्सितो नयः संपन्नाशहेतुः । इति व्यस्तपदच्छेदः ॥ बहवो धार्तराष्ट्राः शकुनयो हंसविशेषा येषु तादृशाः

शरदि तडागा भवन्ति । इति समस्तपदच्छेदः ॥ कुनय इत्येकवचनान्तम् । शकुनय इति बहुवचनान्तम् ॥

इति वचनभिन्नम् ॥

प्रजा राजन्वती कीदृग्दैत्यसेना हरेः कथम् ।
कान्यायुवद्विट्द्रोण्यादयो निशि कथं क्रुधा ॥

सुखापविजितारयः ।

शोभनं स्वं द्रव्यं यस्यास्तादृक् सुराजा प्रजा भवति ॥ दैत्यसेना हरेरिन्द्रस्य पविना वज्रेण जिता भवति । 'कुलिशं भिदुरं पविः' इत्यमरः ॥ अरं शीघ्रं यान्ति गच्छन्ति तानरयः शीघ्रगतीन्वायुसदृशानाहुः । 'या प्रापणे' क्विप् । द्वितीयाबहुवचने 'आतो धातोः' इत्याकारलोपः । इति व्यस्तपदच्छेदः ॥ द्रौणिकृपकृतवर्माणः सुप्ते निद्रायां विजिता अरयो धृष्टद्युम्नादयो यैस्तादृशा इति सौप्तिकपर्वणि स्पष्टम् ॥ 'सुविनिर्दुर्भ्यः सुपि—' इति कृतसंप्रसारणस्य सुपेर्निर्देशात्र षत्वम् ॥ इति समस्तपदच्छेदः ॥ अरय इति प्रथमान्तं द्वितीयान्तं चेति भेदः ॥

कीदृक्कुरङ्गनयना मनसिजमाहूय नृपः क्व सक्तः स्यात् ।
सैनापत्यमवाप्य द्रुह्यति कस्मै पुरा स्कन्दः ॥

वराङ्गीतनुजनये ।

वराङ्गी रम्यदेहा वधूर्भवति । तनुज अङ्गजेति कामसंबुद्धिः ॥ राजा नये नीतौ सक्तो भवेत् । इति व्यस्तपदच्छेदः । वराङ्ग्यास्तनुतः शरीराच्चनिर्यस्य स तस्मै वराङ्गीतनुजनये गुहो द्रुह्यति । वराङ्गीवज्राङ्गौ तारकासुरस्य मातापितरौ इति स्पष्टं मत्स्यपुराणे । इति समस्तपदच्छेदः ॥ नय इति सप्तमी । जनये इति चतुर्थी ॥

इति विभक्तिभिन्नम् ॥

का वदान्यस्य संबुद्धिः किं वायोरपि चञ्चलम् ।
बालोऽपि भरतः प्रोक्तः कीदृशः काश्यपाश्रमे ॥

सर्वदमनः ।

सर्वं बहु ददातीति सर्वद इति दातृसंबुद्धिः ॥ मनो वातापेक्षयापि चञ्चलम् ॥ इति व्यस्तपदच्छेदः ॥ काश्यपस्य कण्वस्याश्रमे बालोऽपि भरतः सर्वान्दमयतीति सर्वदमनतया

गजविशेषा मन्दा मन्दसंज्ञाः । 'भद्रो मन्द्रो मृगश्चेति विज्ञेयास्त्रिविधा गजाः' इति हलायुधः ॥ कदर्या रायं द्रव्यम् अवन्ति रक्षन्ति दानाद्यभावात् । अरीणां समूह आरम् नाविक आतरं गृह्णाति । 'आतरस्तरपण्यं स्यात्' इत्यमरः । सत्या सत्यभामा मारस प्रद्युम्नस्य मातरं रुक्मिणीं विरुध्य स्पर्धयित्वा मन्दाराय पारिजाताय स्पृहयामास । आतरमिति पुंलिङ्गम्, मातरमिति स्त्रीलिङ्गम् ॥

इति लिङ्गभिन्नम् ॥

नन्दनचैत्ररथे कथमाहुय सलिलं च शैलं च ।
को लोकश्रयणीयः केभ्यः स्पृहयन्ति रसवन्तः ॥

दिव्यतरुणीपयोधरेभ्यः ।

दिव्या अमानुषास्तरवो वृक्षा ययोस्ते दिव्यतरुणी इन्द्रधनदयोरुद्याने । पय इति जलस्य, धर इति पर्वतस्य संबुद्धिः । इभ्यो लोकानां सेव्यः 'इभ्य आढ्यो धनी स्वामी' इत्यमरः । दिव्यानां रम्याणां तरुणीनां पयोधरेभ्यः स्तनेभ्यो रसिका स्पृहयन्ति । 'स्पृहेरीप्सितः' इति (संप्रदानत्वे) चतुर्थी ॥ इभ्य इति प्रथमैकवचनम्, पयोधरेभ्य इति चतुर्थीबहुवचनम् ॥

का शीधुपसंबुद्धिर्मणिपूर्वा काधरे वरवधूनाम् ।
कासां ततिर्घनभवा कामाहुः कामिनीमनधिवेद्याम् ॥

मधुरतमालापाम् ।

मधुनि मद्ये रत इति सुरापसंबुद्धिः ॥ मणिपूर्वा माला मणिमाला दन्तव्रणशेषस्तरुणीनां बिम्बोष्ठे विभाति । 'मणिमाला स्मृता हारे स्त्रीणां दन्तक्षतान्तरे' इति विश्वः । अपां जलानां ततिः पङ्क्तिर्मेघजन्या । मधुरतम आलापो यस्यास्तादृशीं स्त्रियं अनधिवेद्यां सपत्नीविवाहानर्हां वदन्ति । 'आज्ञासंपादिनीं दक्षां वीरसूं प्रियवादिनीम् । त्यजन्दाप्यस्तृतीयांशमद्रव्यो भरणं स्त्रियाः ॥' इति याज्ञवल्क्योक्तेः ॥ 'अपाम्' इति षष्ठीबहुवचनान्तम्, 'मधुरतमालापाम्' इति द्वितीयैकवचनान्तम् ॥

इति वचनविभक्तिभिन्नम् ॥

मदनमिव रतिः प्रियं मृगाक्षी स च परिपृच्छति तां सतीमिवेदम् ।
बकुलसुमनसः कथं हसन्त्यः किमभिदधाति वधूः प्रियं व्रजन्तम् ॥

कामिन्यास्यसुरभयः ।

कामिनि प्रियतमे इति संबुद्धिः । आस्यमर्थात् त्वदीयं तद्वत् सुरभयः सुगन्धयो बकुलानां सुमनसो भवन्ति इति नायकेनोत्तरं दत्तम् । 'स्त्रियः सुमनसः पुष्पम्' इत्यमरः ॥ हे कामिन्, असुर्मत्प्राणाभिन्नस्त्वम् अभयो मदुपेक्षया स्नेहभङ्गेन वा प्रसक्तं यद्भयं तद्रहितः

कत्वात्। पापवताम् इह एतज्जन्मन्येव रतिः पारलौकिकानिष्टसाधनप्रवृत्तेः । अयसो हस्य प्रतिमा सूर्मीत्युच्यते । 'सूर्मी स्थूणायःप्रतिमा' इत्यमरः । 'सूर्मी ज्वलन्तीम त्स्त्रीमयीं गुरुतल्पगः' इति स्मृतिः ॥ शरद्दिवसाः तमालोपमं तमालवन्नीलं विहाय येषु तादृशा भवन्तीति भावः ॥

शारदेन्दुकला कीदृक्कीदृशी मत्तकाशिनी ।
धत्ते सरस्वान्काः क्षारा निदाघतपनः कथम् ॥

सदाभासुरतापः ।

शरच्चन्द्रकला कीदृशी । सती विशिष्टा आभा कान्तिर्यस्यास्तथा । शोभनं रतं य तदभिलाषित्वात् । समुद्रः क्षारा अपो धत्ते । ग्रीष्मसूर्यः सदा नित्यं भासुरोऽतिशय तापो यस्य तथा भवति । अत्र 'अपः' इति स्त्रीलिङ्गद्वितीयाबहुवचनम् 'आपः स्त्रीभ वार्वारि' इत्युक्तेः । 'तापः' इति पुंलिङ्गप्रथमैकवचनम् ॥

इति शब्दार्थवचनविभक्तिलिङ्गभिन्नम् ॥

अखण्डेऽपि पदे श्लिष्टे केचिदाहुः प्रभिन्नकम् ।
तच्चमत्कारविरहादभियुक्तैर्न गृह्यते ॥ १७ ॥

अखण्डकपदे नानार्थकपदे इत्यर्थः ॥

तच्च यथा—

संसप्तकगणः कीदृग्महाभारतसंगरे ।
कथं पयोदसमयो वरवर्णिनि वर्ण्यताम् ॥

संगतार्जुनशिलीमुखः ।

'संसप्तकास्तु समयात्संग्रामादनिवर्तिनः' इत्यमरः । संगता अर्जुनस्य शिलीमुखा य यस्मिन्सः । यद्वा संगतोऽर्जुनो यैस्ते संगतार्जुनाः तादृशाः शिलीमुखा यस्य तथा । अ षष्ठीतत्पुरुषोत्तरपदो बहुव्रीहिः, द्वितीये बहुव्रीहिपूर्वपद इति विशेषः । पक्षे संगता अर्जुनवृक्षसंयुक्ताः शिलीमुखा भ्रमरा यत्र तथा ॥ 'अलिबाणौ शिलीमुखौ' इति विश्व अत्रार्जुनशिलीमुखौ नानार्थौ ॥

कथं सकामो वामोरूवदनं वद वीक्षते ।
कीदृङ्निदाघसमये सुखयत्यनुलेपनम् ॥

चन्द्रवत् ।

कामुको युवतिवदनं चन्द्रवत् चन्द्रसदृशं पश्यति । ग्रीष्मकाले चन्द्रयुक्तं सकर्पूरं अ नुलेपनं सुखदं भवति ॥

तस्मादुक्तवाक्येषु ध्रुवा शब्दार्थयोर्भिदा ।
कामचारस्तु लिङ्गादिभेदे व्यस्तादिभेदगः ॥ १८ ॥

[illegible]
कीदृक्कूजति [illegible] ॥

[illegible] ।

[illegible]

कामोद्रेचकमेचकीकृतदिशो वृन्दैर्वृता विद्युता-
मत्यूर्जस्वलगर्जिताः प्रसुवते किं नाम धाराधराः ।
कस्याकथ्यत शब्दशासनकृता शक्तिः सवर्णग्रहे
तारुण्यान्वितया सरोरुहदृशा यानेन को निर्जितः ॥

वारणः ।

कामस्योद्रेचका उद्दीपका मेचकीकृता नीलीकृता दिशो यैः । ततो द्वयोः कर्मधारयः । एवंविधा मेघा वार् जलं जनयन्ति । 'आपः स्त्री भूम्नि वार्वारि' इत्यमरः । वारिशब्दसाहचर्यो वाःशब्दः क्लीबे तेन 'स्वमोर्नपुंसकात्' इति द्वितीयैकवचनस्य लुक् ॥ शब्दशास्त्रकारेण पाणिनिना 'अणः' 'अण्' इति प्रत्याहारस्य शक्तिरुक्ता 'अणुदित्सवर्णस्य चाप्रत्ययः' इत्युक्तत्वात् । यौवनाढ्यया कान्तया यानेन गमनेन वारणो हस्ती जितस्तिरस्कृतः ॥

इत्यूर्जितजातिः ॥

सालङ्कारजातिं लक्षयति—

अलंकारवता यत्तु वाक्येन परिपृच्छ्यते ।
तदुत्तरं बहुविदः सालंकारं प्रचक्षते ॥ ३ ॥

उदाहरति—

कस्माद्वोदयति त्वदीयवदनामोदि प्रिये पङ्कजं
किं वा संवृणते तवैव कबरीभारानुकारा घनाः ।
त्वद्बिम्बाधरवन्नितान्तमधुरं संस्वाद्यमानं मुदा
किं तावद्विषयान्तराच्च हृदयं व्यावर्तयेत्कामिनाम् ॥

कादम्बरम् ।

अवध्या भवति । वनान्ते तन्नामकस्थानविशेषेऽर्जुनेन । गाण्डीवेन श्रीमता अर्जुनेन लाञ्छमाना मदवारणा मत्तगजा यत्र तादृशी युधिष्ठिरसेना इत्यर्थः ॥

किमिच्छन्ति बुधाः खं किं किं कुराज्यं जयन्त्यरीन् ।
केन किं मधुवृत्तिः स्याद्वसन्ते कीदृशं वनम् ॥

मलयमरुदावलितरसालम् ।

विवेकिनो मे शिवे लयम् इच्छन्ति । मुक्तिमिति यावत् । मुक्तान्तराणां दुःखसंवलितत्वेनानुपादेयत्वात् । खमाकाशं न रुणद्धि अतः गतिरोधकं नास्ति काठिन्याभावात् । कुराज्यम् आ समन्तात् बल्यः करा यत्र तद् बहुकरं भवति तरसा बलेन शत्रूनभिभवन्ति जयन्ति वीराः । अलीनां समूह आलं तन्मधुमात्रजीवनं भवति । मलयमरुता दक्षिणानलेन आवलिता वेष्टिता रसाला आम्रा यत्र तादृशं मधावुपवनं भवति ॥

इति सर्वतोमुखजातिः ॥

पृष्टोत्तरजातिं लक्षयति—

स्यात्प्रश्नश्चोत्तरयोर्यत्र वर्णश्रुत्यैकरूपता ।
तत्पृष्टोत्तरमित्याहुर्जगदुत्तरबुद्धयः ॥ ५ ॥

वर्णश्रुत्यैकरूपत्वम् । अर्थत ऐकरूप्ये प्रश्नोत्तरभावानुपपत्तेः ॥

उदाहरति—

कोविदो निधिराख्यातः कोपकृष्टो भवेत्पुमान् ।
इति प्रश्नेऽनुरूपं यदुत्तरं तदुदीर्यताम् ॥

विदो ज्ञानस्य निधिः कः इति प्रश्ने कोविदः पण्डित इत्येवोत्तरम् । अपकृष्टो हीनः क इति प्रश्ने कोपकृट इति । क्रोधाधीन इत्यर्थः ॥

किम्पाकं प्राप्य वैरस्यं फलमाकलयत्यलम् ।
ब्रूहि काञ्चनमालां च कां धत्ते सस्पृहं जनः ॥

पाकं प्राप्य किं फलं विरसं भवति इत्यत्र किम्पाकम् इत्युत्तरम् । इन्द्रवारुणीफलस्य परिणामे विकृतत्वात् । 'द्विहीनं प्रसवे सर्वम्' इति क्लीबत्वम् ॥ कांचन कामपि लोकोत्तरां कां मालां जनो लोकः सस्पृहं स्पृहापूर्वकं धत्ते इत्यत्र काञ्चनमालां सुवर्णमालामिति षष्ठीसमासः ॥

इति पृष्टोत्तरसमजातिः ॥

पृष्टप्रश्नजातिं लक्षयति—

यत्प्रश्नश्चोत्तरं च स्याद्विभिन्नप्रतियोगिकम् ।
जगदुत्कृष्टमतिभिः पृष्टप्रश्नं तदुच्यते ॥ ६ ॥

किंचिदुत्तरापेक्षया प्रश्नः किंचित्प्रश्नापेक्षयोत्तरं च यद्भवति तत्पृष्टप्रश्नम् ॥

उदाहरति—

अनिरुद्धरतेत्यस्मिन्नुत्तरे प्रश्न उच्यताम् ।
किंपचानेप्सिता केति प्रश्ने चोत्तरमुच्यताम् ॥

कोपावृत्तिः ।

उषाया बाणपुत्र्या वृत्तिः का इत्युत्तरे 'अनिरुद्धरता' इति प्रश्नः । कृपणस्याभिमता का इति प्रश्ने कोपावृत्तिः इत्युत्तरम् । कोपस्य द्रव्यसंचयस्य आवृत्तिः पौनःपुन्यं इत्यर्थः ॥

अन्तरतमोऽन्तगत इत्युत्तरयोग्यं वद प्रश्नम् ।
सुरभिसमयेतिसौरभशिखरगतो ब्रूहि कूजति कः ॥

कोकिलः ।

अकि अक्प्रत्याहारे इति निर्धारणसप्तमी लो लकारस्य संबन्धी क इति प्रश्ने अन्तगतोऽन्तरतमः इत्युत्तरम् । अक्प्रत्याहारे लृकारस्य चरमत्वात् । स्थानेन स एव लकारस्यान्तरतम इत्यर्थः । वसन्ते आम्रविटपारूढः कः कूजति इति प्रश्ने च कोकिलः परभृत इत्युत्तरम् ॥

इति पृष्टप्रश्नजातिः ॥

भग्नोत्तराद्युत्तरयोर्मध्यान्तोत्तरयोस्तथा ।
स्पष्टं निगदमात्रेण स्वरूपमिति बुध्यताम् ॥ ७ ॥

उदाहरति—

ज्ञायन्ते कुत्र विद्वांसस्तदाभासाश्च कथ्यताम् ।
कीदृग्वीरकुलं हन्ति रिपून्सदसि धीनिधे ॥

पण्डिताः पण्डितंमन्याश्च कुत्र विविच्यन्ते इति प्रश्ने सदसि विद्वत्सभायामित्युत्तरम् । कीदृशं वीरकुलं रिपून् हन्ति इत्यत्र सदसि वियमानखड्गमिति ॥

गोकुले क्रीडता भङ्गः कस्याक्रियत चक्रिणा ।
खरादयो विनेशुस्ते प्रेषां प्राप्य कुतोऽनसः ॥

गोकुले विहरता श्रीकृष्णेन अनसः शकटस्य भङ्गः कृतः । अनसश्छिन्ननासायाः शूर्पणखायाः सकाशात् प्रेषां प्रेरणां प्राप्य खरादयो नष्टाः । रामेण हता इत्यर्थः ॥

प्रहितः कीदृग्विहितो जगाम [illegible]मेण मारुतिर्लङ्काम् ।
रज्ज्वादिव्यतिरेकैस्तोय न [illegible] ॥

रामेण प्रहितः प्रेषित[illegible] पक्षे प्रहि[illegible] कूप[illegible] प्रहि कूप [illegible] इत्यमर । अत्र श्लोकादिगतं प्रहितः इति पदमु[illegible]

कुरवः कीदृगारम्भृतरङ्गस्तागि भाति जलान्तात् ॥

भीमं प्राप्य विलीनाः सहोदराः के शतं ब्रूहि ॥

कुत्सितो रवो यस्य कुरवः गः । तारतम्यापेक्षागतकुत्सितेन आगमनात् । कुरवो दुर्योधनादयः । 'कुर्वादिभ्यो ण्यः' 'तद्राजस्य–' इति बहुषु लुक् ।

इत्याद्युत्तरजातिः ॥

कीदृशं बिभ्रति शान्तं विदुषा वद विद्युतम् ।

कां वा कनकलेखाभां कलयन्ति बलाहकाः ॥

विदा ज्ञानेन युतं विद्युतम् । उत्कृष्टज्ञानवदित्यर्थः । पक्षे विद्युतं तडितमित्यर्थः । न-स्याद्यन्तपदस्य सर्वापेक्षयासंभवात्पूर्वभागस्य श्लोकमध्यवर्तित्वेन विलक्षणीयः । उत्तरार्धयभागापेक्षया प्रथमोपस्थितत्वात् ॥

पुमानहृष्टवृत्तिर्यः कीदृग्बालवधूमतः ।

कुतोऽनुमिन्वते व्याप्तिवेदिनो जातवेदसम् ॥

बालाया वध्वा अहृष्टवृत्तिः पुरुषो मत इष्टः । 'विश्रब्धायाः स्त्रियाः काले कार्यं निरीक्षणम् । अन्यथा क्रियमाणं तत्तदुद्वेगाय जायते ॥' इति कामशास्त्रोक्तेः । व्याप्ति-पक्षधर्मताया अप्युपलक्षणम् । अलघावहुलाद् धूमतो धूमात् ॥

इति मध्योत्तरजातिः ॥

जनमेजयेन जुह्वांबभूविरे जातवेदसि मखे के ।

प्रभुरपि कीदृग्जेतुं नैवोत्सहते महीमहयः ॥

अहयः सर्पाः, पक्षे अश्वहीनः । 'यस्याश्वास्तस्य मेदिनी' इत्युक्तेः ॥

स्पृहयन्तः कमप्यर्थं निवसन्ति वनेषु के ।

पथि द्रुमो घनच्छायः कथं पान्थेषु तापसाः ॥

तापसास्तपस्विनः । तापं स्यति नाशयति तापसाः । 'षोऽन्तकर्मणि' क्विप् ॥

इत्यन्तोत्तरजातिः ॥

कथितापह्नुतिं लक्षयति—

यत्रेतरवाक्यार्थान्वययोग्यार्थकपदेनोक्तम् ।

भात्युत्तरं न सहसा सा कथितापह्नुतिः कथिता ॥ ८ ॥

सुगमम् ॥

उदाहरति—

श्वसितं धृतमिदमधरं किं विदधद्विधुवदनयेदम् ।

दुरितवतां का वृत्तिर्विजयित्वं मनसिजस्य कथम् ॥

अधरं किं विदधत् श्वसितं धृतम् इति प्रश्नः, विधुवदनया नायिकया इत्यर्थप्रतीतेरुत्तरानवभासः । विधुवत् कम्पयत् इत्युत्तरं क्लेशगम्यम् । दुरितवतां का वृत्तिः । इत्यत्र 'अनया नीतिहीना' इत्युत्तरम् । कामस्य विजयित्वं कथम् इत्यत्र 'ईदम्' इत्युत्तरम् । लक्ष्मीखण्डकमित्यर्थः । 'सकामासक्तचित्तानां कान्तामुखविलोकने । गलन्ति गलिताधृणां यौवनेन सह श्रियः ॥' इति नीतिशास्त्रोक्तेः ॥

पापात्का क्रियते सद्भिरुदीरयत भीरवः ।
आकाशस्य गुणः को वा वीरेभ्यः के च बिभ्यति ॥

पापात् सद्भिर्भीर्भयं क्रियते ॥ रवः शब्दो गगनगुणः ॥ वीरेभ्यो भीरवः कातरास्त्रस्यन्ति ॥

इति कथितापह्नुतिः ॥

विषमजातिं लक्षयति—

भङ्गे दुरूहता स्याद्यत्र तदाचक्षते विषमम् ।
तद्वृत्तनामकं स्यात्प्रश्ने यत्रोत्तरं वृत्तम् ॥ ९ ॥

उदाहरति—

कीदृक्कृतं दैत्यकुलं केशवेनेति कथ्यताम् ।
कस्मात्स पिकः कान्ते पुष्पानेहसि कूजति ॥

रसातलमतम् ।

रसातले मतम् इच्छा ॥ पक्षे अतं तकाररहितं रसातलशब्दं रसालम् इति यावत् ॥ रसातलशब्दोपस्थितौ पुनरर्थबोधो बोध्यः ॥

शिथिलैरलकैर्बध्वा किमाकलयतीह किम् ।
आचार्येभ्योऽपि पितरं कीदृशं धार्मिका विदुः ॥

मालिन्यमलिकम् ।

अलिकं ललाटम् अलकैर्मालिन्यं प्राप्नोति ॥ पक्षे अलिकं लिकारहीनम् मालिन्यपदे लिकारत्यागे मान्यमित्यर्थः । 'उपाध्यायान्दशाचार्य आचार्याणां शतं पिता । सहस्रं तु पितॄन्माता गौरवेणातिरिच्यते ॥' इति वचनात् ॥

कुजावान्यावागमः कः प्राज्ञा का स्यान्मत्यज्ञानम् ।
आह्वानार्थे [illegible] कः स्यान्माध्या गान्या [illegible] किं स्यात् ॥

[illegible] ।

[illegible]

[illegible] ॥ [illegible] ॥ [illegible] इति [illegible] ॥

[illegible] ।
[illegible] ॥

[illegible] ।

[illegible] ॥

नामाख्यातजातिं लक्षयति —

यत्र स्यात्सुप्तिङन्तानां तुल्या सम्बन्धकल्पना ।
तन्नामाख्यातमित्युक्तं लोकविख्यातबुद्धिभिः ॥ १० ॥

उदाहरति—

गावोऽतितृष्णा दधतीह किमिन्द्रियं रूपप्रकाशहेतुः ।
वीरोऽनुयुङ्क्ते सुहृदं रिपूणामहं कुलं संयति किं करोमि ॥

तृणेक्षि ।

तृणे गावः सतृष्णाः ॥ अक्षि चक्षुरिन्द्रियं रूपप्रकाशहेतुः ॥ 'वैरिकुलं युद्धेऽहं किं करोमि' इति वीरेण पृष्टे 'तृणेक्षि' मारयसि इत्युत्तरम् ॥ 'तृह हिंसायाम्' सिप् श्नम् 'तृणह इम्' 'हो ढः' 'षढोः कः सि' इति कत्वं 'आदेशप्रत्यययोः' इति षत्वम् ॥

देशे कीदृशि यागो दिवसकरो भवति महसां किम् ।
संबुद्धिवाचकं किं सन्तः किं कुरुथ परवृद्धौ ॥

समेधामहे ।

समे देशे यागः 'समे यजेत' इति वचनात् ॥ सूर्यः तेजसां धाम स्थानम् ॥ 'हे' इति संबुद्ध्यर्थे ॥ 'समेधामहे' वर्धामहे । परवृद्धिमत्सराभावात् ॥

इति लट् ॥

दोषाणां सत्कविः को वा कोऽश्वमेधे विसृज्यते ।
चन्दनानिलनिर्धूतचूतानां धूलयः कथम् ॥

उदयुः ।

उज्झति त्यजतीति उद् दोषाणामिति कर्मणि षष्ठी ॥ 'ययुरश्वोऽश्वमेधीयः' इत्यमरः ॥ उदयुः उत्तस्थुः 'या प्रापणे' उत्पूर्वस्य लिटि प्रथमपुरुषे बहुवचने रूपम् ॥

कीदृग्जनमनो निन्द्यं गौरीमातरमाहृय ।
परिरिप्सुः प्रियतमो विधुमुख्या व्यधायि किम् ॥

अनुमेने ।

न विद्यते नुः शिवो यत्र तद् अनु तद्विषयकभक्तिहीनं मनो निन्द्यम् ॥ 'मेने' इति हिमाचलभार्यासंबुद्धिः ॥ आलिङ्गितुमिच्छन् कान्तः प्रियो नायिकया सुन्दर्या दयितया अनुमेने अनुमतः संमत्या गृहीतः । तत्प्रतिकूलाननुष्ठानात् ॥ कर्मणि लिट् ॥

इति लिट् ॥

दयोदयार्द्रैरपि दीनवृन्दैर्विधीयते का वद कुत्र वीरैः ।
वधूकुचौ काञ्चनकुम्भतुल्यौ करेण कान्तेन कथं विधेयौ ॥

अनुभावितारौ ।

अरौ वैरिणि अनुभाविता प्रभावलम् । तत्र दयाया अनर्हत्वात् ॥ पक्षे अनुभावितारौ प्रत्यक्षविषयौ करिष्येते कर्मणि लुट् 'स्यसिच्सीयुट्तासिषु–' इति चिण्वद्भावः ॥

कान्तेन दत्तावधिरम्बुजाक्षी संतप्यते कीदृशि नाम तस्मिन् ।
प्रोत्साहितो जाम्बवदादिभिर्वा किमब्धिमुद्दिश्य जगौ हनूमान् ।

विलङ्घिताहे

विलङ्घितम् अहरवधिदिनं येन तादृशे कान्ते सति संतप्यते 'राजाहःसखिभ्यष्टच्' । अवधिदिने नायकानागमने तस्या दुःखोदयात् ॥ पक्षे विलङ्घिताहे विलङ्घयिष्यामि ॥ लुडात्मनेपद उत्तमपुरुषैकवचने रूपम् ॥

इति लुट् ॥

कथं मनोभू रम्भोरुभुवनेषु विजृम्भते ।
किं वदन्ति नटं वीक्ष्य भूमिकाग्रहणक्षमम् ॥

अनुकरिष्यति ।

अनुकाः कामुका रिपवो मुनयो यत्र । (रेफादिरपि) 'विद्याविदग्धमतयो रिपवः' इति प्रयोगादिति चन्द्रिकायाम् । 'स्यादपौ रिपिरित्यपि' इति द्विरूपकोशश्च । इति अत्यन्तमिति कामुकविशेषणम् ॥ पक्षे अनुकार्यम् रामादि अनुकरिष्यति । इति लृट् ॥

विपश्चितां संसदि जायते को गमिः क्व वा छत्वविधौ प्रयुक्तः ।
सद्यः समासाद्य रसेन सज्जा वीणा विधेया वद किं प्रवीणैः ॥

वादयिष्यन्ते ।

विद्वत्सदसि वादे [illegible]

नायिकायलक्तं तनु कुर्याम् ॥ अलक्तकतादात्म्याध्यवसितस्याधरस्य 'याव' इति संबुद्धिः । 'यावोऽलक्तो द्रुमामयः' इत्यमरः ॥ 'परेणानधिगम्यं हि यद्रहो वर्जितस्ववत् । तप्तं च तद्रहश्चेति तप्तरहसं विदुः' इति वोपदेवः ॥ 'अन्ववतप्ताद्रहसः' इत्यकारः समासान्तः ॥ तनुयाव आलिङ्गनादि कुर्याव । 'तनु विस्तारे' विधि लिङ् उत्तमपुरुषद्विवचने रूपम् ॥

दरिद्रभवनं कीदृगनर्हं जेतुमाह्वय ।
नवावतीर्णतारुण्यां वधूं कान्तः किमिच्छति ॥

अवस्वजेय ।

अवसु द्रव्यहीनम् ॥ अजेय जेतुमनर्हम् । 'क्षय्यजय्यौ शक्यार्थे' इति शक्यार्थे यान्तादेशनिपातनादनर्हमित्युक्तम् । 'अर्हे कृत्यतृचश्च' इत्यर्हार्थे यत् ॥ पक्षे अवस्वजेय आलिङ्गेयम् । लिङुत्तमैकवचने रूपम् ॥

इति लिङ् ॥

कस्माद्धूर्जटिचापात्त्रिपुरवधे निरगमद्धरिः कीदृक् ।
शृण्वत्स्वन्तेवासिषु शास्त्रार्थं च व्यधुः किमाचार्याः ॥

अगादिषुः ।

अगात् पर्वतरूपात् रुद्रचापाद् इषुर्बाणरूपः सन् हरिर्निर्जगाम ॥ पक्षे अगादिषुः उक्तवन्तः इति लुङि प्रथमपुरुषबहुवचने रूपम् ॥

नाटकश्रीर्न कीदृक्स्यात्कथं विरहवाञ्जनः ।
केशवेन कृतौ विद्धि कथं च मधुकैटभौ ॥

अमारिषाताम् ।

अमारिषा सूत्रधाररहिता नाटकरीतिर्न स्यात् । 'सूत्रधारस्तु मारिषः' इत्यमरः । नान्द्याश्चावश्यकत्वात्, तस्याश्च सूत्रधारपाठ्यत्वात् । तदुक्तम्—'यद्यप्यङ्गानि भूयांसि पूर्वरङ्गस्य नाटके । तथाप्यवश्यं कर्तव्या नान्दी विघ्नोपशान्तये । सूत्रधारः पठेदेनां मध्यमं स्वरमाश्रितः' ॥ आ अत्यन्तं ताम्यतीत्याताम् । 'तमु ग्लानौ' क्विप् 'अनुनासिकस्य क्विझलोः' इति दीर्घः ॥ पक्षे अमारिषातां हतौ । कर्मणि लुङ्प्रथमपुरुषद्विवचने रूपम् ॥

इति लुङ् ॥

उपस्थितेऽपि पात्रे किं कार्यं खलसंगतम् ।
यदि च [illegible] प्रा[illegible] किं [illegible]धान्यः प्रियमुखम् ॥

[illegible]न्यम् ।

[illegible]

स्वादयिष्याम् । 'लिङ्निमित्ते लृङ् क्रियातिपत्तौ' इति लृङ् । एतेन प्राणनाथसंयुक्तो न प्रियासुरापानाभाव इत्यर्थः ॥

कुत्र कृत्वा मनस्तार्क्ष्यं ययाचे विनता सुतान् ।
अकरिष्यः किमात्मानं यदद्रक्ष्यः प्रियं प्रिये ॥

अदास्ये ।

अदास्ये दास्याभावे मनः कृत्वा विनता गरुडं सुतं ययाचे 'दुहियाचिरुधिप्रच्छि-' इति भाष्योक्तेर्द्विकर्मकत्वम् ॥ यद्यहं प्रियम् अद्रक्ष्यं तदात्मानम् अदास्ये । दासो लृटि उत्तमैकवचने रूपम् ॥ तथा च प्रियदर्शनाभावप्रयुक्तो मत्कर्तृकस्वात्मसमर्पणाभाव इत्यर्थः ॥ अत्र सर्वत्र लकारेषु पदद्वयं श्लोकभेदेनोदाहृतम् ॥ लेट् लकारस्तु च्छान्दसत्वान्नोदाहृत इत्यवसेयम् ॥

इति नामाख्यातजातिः ॥

तार्कादिजातिं लक्षयति—

तार्करीत्या भवेत्तार्कं सौत्रं सूत्रमयोत्तरम् ।
शाब्दं तु शब्दसंज्ञोत्थं शास्त्रीयं शास्त्रदिकृतम् ॥ ११ ॥

उदाहरति—

कीदृक्शैलान्तरं न स्यान्निशि व्योम्नि विभाति किम् ।
अभावे ग्राहकं मानं किं वा तौतातिता विदुः ॥

अनुपलम्भम् ।

पर्वताभ्यन्तरम् अनुपलं पाषाणात्यन्ताभाववन्न भवति ॥ रात्रौ भं नक्षत्रं भाति ॥ 'अनुपलम्भाख्यमभावरूपं प्रमाणं घटाद्यभावग्राहकम् 'न त्विन्द्रियं संनिकर्षाभावात्' इति भाट्टा वदन्ति ॥

माता कुपुत्रं कृत मा स्म किं कं भजन्ति भीता न जनप्रियाः के ।
के नाम ते येऽभ्युपयन्ति बुद्ध्याकारानुमेयं बहिरर्थजातम् ॥

सौत्रान्तिकाः ।

जननी कुत्सितं पुत्रं मा स्म सौत् मा जनयतु ॥ तकारस्य 'अनचि च' इति द्वित्वेऽत्रं छेदः । त्रायते इति त्राः, तं त्रातारं रक्षकं भीता भजन्ते ॥ तिका हिंसका जनप्रिया न भवन्ति ॥ ज्ञानानां घटाद्याकारकत्वानुपपत्त्या घटादिरनुमेयः इति सौत्रान्तिकानां मतम् । साकारवादित्वात् ॥

इति तार्कजातिः ॥

दृष्टप्रियप्रतिकृतिं तच्चाक्षुषविरहितं निगाद सखी ।
सूत्राणि वद कथं वा कृष्णद्वैपायनस्य मुनेः ॥
शब्दादेव प्रमितोऽनुकृतेस्तस्य च समाकर्षात् ।
दर्शयति चोत्तराच्चेदाविर्भूतस्वरूपस्तु ॥

शब्दादेव शब्दमात्रेण त्वया स ज्ञातः । तस्यानुकृतेः प्रतिमायाः समाकर्षादानयनात्प्रमितः । चित्रे दृष्ट इत्यर्थः । 'श्रवणं तु भवेत्तत्र दूतबन्दिसखीमुखात् । इन्द्रजाले च चित्रे च साक्षात्स्वप्ने च दर्शनम् ॥' इति दर्पणः । साक्षाद्दर्शनं कदा स्यादत आह—दर्शयति चेति । आविर्भूतं संनिकृष्टं स्वरूपं यस्य तादृशस्तु यदि दर्शयति । आत्मानमिति शेषः । चकारः 'तर्हि' इत्यर्थे । उत्तरात् । त्वदीयमनुत्तरमाकर्ण्येत्यर्थः । 'शास्त्राणि चेत्प्रमाणं स्युः' इतिवदसंदेहे संदेहः । तथा चातः परं त्वदीयवचनमात्राकाङ्क्षी तदाकर्णनोत्तरमेव भवदीयचाक्षुषविषयो भविष्यतीति भावः ॥ 'शब्दादेव प्रमितः' इति सूत्रस्य 'अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति' इति वाक्यं ब्रह्मपरम् । 'ईशानो भूतभव्यस्य' इति शब्दादित्यर्थः ॥ 'अनुकृतेस्तस्य च' इति सूत्रस्य 'न तत्र सूर्यो भाति न चन्द्रतारकम्, नेमा विद्युतो भान्ति कुतोऽयमग्निः । तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति' ॥ इत्यत्र 'भारूपः सत्यसंकल्पः' इति श्रुत्यन्तरप्रसिद्धेन ब्रह्मणो भानेन सूर्यादीनां भानमुपपाद्यम् ॥ ननु अनुमानस्य सजातीयविषयकत्वात्तद्बलेन सूर्यादीनां भासकमप्रसिद्धं तेजोन्तरकल्पनमित्यर्थः ॥ 'समाकर्षात्' इति सूत्रस्य 'सदेव सौम्येदमग्र आसीत्' इत्यत्र सतः कारणत्वमुक्तम् 'असद्वा इदमग्र आसीत्' इत्यत्र त्वसतः इति विरोधशङ्कायाम् 'असदेवेदमग्र आसीत्' इत्यनन्तरम् 'तत्सदासीत्' इत्यसतःसमाकर्षणादेकस्यैव सत्त्वासत्त्वोभयविरोधादनभिव्यक्त्यपेक्षयैवासत्त्वोक्तिरित्यादिरर्थः ॥ 'उत्तराच्चेदाविर्भूतस्वरूपस्तु' इति सूत्रस्य 'य एषोऽक्षिणि दृश्यते स्वप्नेन हीयमानश्चरति' इत्यादि प्राजापत्यवाक्यरूपादुत्तराद्दहरो जीव एवेति चेत् नैवम् । यतोऽयमवस्थावासनाविर्भूतब्रह्मतादशायामत्र वाक्ये तात्पर्येण उक्तः अतो दहरवाक्यं ब्रह्मपरमेवेत्यर्थः ॥ बुद्धौ ज्ञाने तद्धियमानं स्वानुरागविषय इति यावत् ॥

स्वाभिमतेन प्रणयेऽनुपजनिते वा क्षते किं स्यात् ।
पृच्छत्यन्तर्वाणिः पाणिनिसूत्राणि कीदृंशि ॥
पूर्वत्रासिद्धं वावसान आदेः परस्य वा यौ तौ ।
सत्सख्युरसंबुद्धावुपसर्गस्यायतौ चरति ॥

प्रशस्तः सखा सत्सख्युस्तस्य 'अम्र स्यायानुरसः' इति समासान्तः पूर्वत्र पूर्वम् अवसाने अन्ते वा असिद्धं सत् स्वविषयकानुरागहीनं मदनुरागं वा इति यावत् ॥ आदेः पूर्वकालीनस्य परस्योत्तरकालीनस्य वा उपसर्गस्य दुःखस्य आयतौ दीर्घौ तावनुभूयमानौ आयौ लाभौ चरति करोति । स्वाभिमतस्यालाभे पूर्वमेव दुःखं भवति विच्छेदे तु तत्संगमो-

त्तरमिति भावः ॥ यथा च प्रणयभङ्गो न भवति तथा वर्तितव्यमिति सुहृदाचरिता रीतिरिति तात्पर्यम् ॥ 'पूर्वत्रासिद्धम्' इत्यस्य सपादसप्ताध्यायीं प्रति त्रिपाद्यसिद्धा इत्यर्थः ॥ 'वावसाने' इत्यस्य अवसाने झलां चरो वा स्युः ॥ 'आदेः परस्य' इत्यस्य परस्य यद्विहितं तत्तस्यादेर्बोध्यम् ॥ 'वा यौ' इत्यस्य ल्युप्रत्यये परे अजेर्वीभावो वा स्यात् ॥ 'तौ सत्' इत्यस्य शतृशानचौ तत्संज्ञौ स्तः ॥ 'सख्युरसंबुद्धौ' इत्यस्य सखिशब्दात्परं संबुद्धिभिन्नं सर्वनामस्थानं णित्कार्यकृत् स्यात् ॥ 'उपसर्गस्यायतौ' इत्यस्य अये धातौ परे उपसर्गस्य रेफस्य लत्वं स्यात् ॥ 'चरति' इत्यस्य तेन चरतीत्यर्थे ठक्प्रत्ययो भवतीत्यर्थः ॥

इति सौत्रजातिः ॥

सर्वादेरस्ति का संज्ञा किं प्रसङ्गार्थकं पदम् ।
स्वादीनां वचनानां च पञ्चानां नाम कथ्यताम् ॥

सर्वनामस्थानम् ।

सर्वादीनां सर्वनामसंज्ञा 'सर्वादीनि सर्वनामानि' इति सूत्रात् ॥ स्थानपदं प्रसङ्गार्थम् 'स्थानेऽन्तरतमः' इत्यादौ तथा व्याख्यानात् 'दर्भाणां स्थाने शरैः प्रस्तरितव्यम्' इति दर्शनात् ॥ सु औ जस् अम् औट् इति पञ्चानां सर्वनामस्थानसंज्ञा 'सुडनपुंसकस्य' इति सूत्रेण तद्विधानात् ॥ अत्र व्यस्ते समस्ते च शब्दसंज्ञैवेति बोध्यम् ॥

प्रतिषेधविकल्पे किं किं शसादौ हलादिके ।
किमजादौ च का क्षुद्ररीतिः किं वद सद्व्रतम् ॥

विभाषापदम्भम् ।

प्रतिषेधविकल्पार्थकं विभाषापदं 'नवेति विभाषा' इति सूत्रात् ॥ शसादौ हलादिविभक्तौ परतः पदसंज्ञा ॥ तत्रैवाजादौ भसंज्ञा ॥ 'स्वादिष्वसर्वनामस्थाने' इति पदसंज्ञायाः 'यचि भम्' इति भसंज्ञायाश्च विधानात् । अचि भत्वविधाने चार्थात्पदसंज्ञाया हलादौ परतः पर्यवसानात् । 'आ कडारादेका संज्ञा' इति वचनात् ॥ क्षुद्ररीतिः—विरुद्धा भाषा यस्यास्तथा पूर्वापरैकवाक्यत्वाभावात् ॥ अपगतो दम्भो धर्मच्छलो यत्र तादृक् सतां व्रतमित्यर्थः ॥

इति शाब्दजातिः ॥

दह्यमानं वनं कीदृक् प्रशंसन्ति तार्किकम् ।
विशिष्टधीहेतुतया बुधैः किमनुमीयते ॥

निर्विकल्पकम् ।

निर्गता वयः पक्षिणो यस्मात् ॥ कल्पकं युक्त्युद्भावनसमर्थम् ॥ विशिष्टज्ञानहेतुतया निर्विकल्पकं ज्ञानमनुमीयते 'गौरिति विशिष्टज्ञानं विशेषणज्ञानजन्यम्, विशिष्टज्ञानत्वाद् दण्डीति ज्ञानवदित्यर्थः ॥

भूमिः का राजवासार्हा वाद्यं वीणादिकं च किम् ।
कां नाडीं मनसि प्राप्ते सुषुप्तिर्जायते दशा ॥

पुरीततम् ।

पुरी नगरी राजस्थित्यर्हा ॥ 'ततं वीणादिकं वाद्यम्' इत्यमरः ॥ पुरीतत्संज्ञां नाडीं मनसि प्राप्ते सुषुप्त्यवस्था 'प्रत्यवरुह्य पुरीतति शेते' इति बृहदारण्यकश्रुतेः ॥

इति शास्त्रजातिः ॥

किमव्ययादौ पठितं दुःसहा का विवस्वतः ।
धर्मेऽस्त्यधिकृतिः कस्य को वैरी चन्द्रसूर्ययोः ॥

स्वर्भानुः ।

अव्ययादौ स्वःपदं पठितम् । 'स्वरादिनिपातमव्ययम्' इति सूत्रात् ॥ सूर्यस्य भा दुःसहा ॥ नृशब्दस्य ङसि 'ऋत उत्' इत्युकारैकादेशे कृते रपरत्वे 'रात्सस्य' इति सलोपे विसर्गे च 'नुः' इति रूपम् । मनुष्यस्य धर्मेऽधिकारः 'मनुष्याणां च धर्मः' इति पराशरोक्तेः ॥ 'तमस्तु राहुः स्वर्भानुः' इत्यमरः ॥

का कामधुक्प्रिया का वा विष्णोर्विश्वं बिभर्ति का ।
विघ्नानामधिपः कश्च प्रणामात्सर्वकामदः ॥

गौरीभूः ।

गौर्धेनुः ॥ ई लक्ष्मीः ॥ भूर्भूमिः गौरीतो भवतीति गौरीभूः—'विनायकः कर्मविघ्नसिद्ध्यर्थं विनियोजितः । गणानामाधिपत्ये च रुद्रेण ब्रह्मणा तथा । विष्णुना ऋषिभिर्देवैर्विनियुक्तो गणेश्वरः ॥' इति याज्ञवल्क्यः ॥

इति वर्णोत्तरजातिः ॥

हरिणा किं कृता दैत्याः कः कामस्य सखा ऋतुः ।
रात्रिमात्रविकासिन्यस्तारा अन्यत्र किं व्यधुः ।

अहन्यन्तमधुः ।

अहन्यन्त हताः लङि प्रथमबहुवचने रूपम् ॥ मधुर्वसन्तः ॥ अहनि दिने अन्तं नाशम् अधुर्धृतवत्यः सूर्यतेजोभिभूतानां दर्शनाभावात् ॥

किमकृत सुरभौ पिकोऽर्च्यमानो भवति कथं वहुदः किमम्बुयानम् ।
स्पृहयति तरुणीजनश्च कस्मै नवसुदृशं किमु निर्यतीमकार्षीः ॥

अरौत्समुत्तरीये ॥

पिको वसन्ते अरौत् चुकूज । 'रु शब्दे' लङ् । 'उतो वृद्धिर्लुकि हलि' इति वृद्धिः ॥

याच्यमानो दाता रमुत् प्रीतियुक्तो भवति ॥ तरी नौर्जलयानम् ॥ ई लक्ष्मीं याति प्रोति ईयाः तस्मै इये । 'आतो धातोः' इत्याकारलोपः । रम्यायेलार्थः ॥ निर्गच्छन्तीं नवोढाम् उत्तरीये प्रावारे अरीत्राम् अहं रुद्धवान् । 'रुधिर् आवरणे' लुङुत्तमैकवचने रूपम् ॥

इति वाक्योत्तरजातिः ॥

इति श्रीविश्वेश्वरपण्डितविरचिते कवीन्द्रकर्णाभरणे द्वितीयः परिच्छेदः ।

तृतीयः परिच्छेदः ।

श्लोकोत्तरादिजातिं लक्षयति—

> श्लोकोत्तरं तदाहुः श्लोको यत्रोत्तरं भवति ।
> अर्धं वा पादो वा यत्र तु खण्डोत्तरं तत्स्यात् ॥ १ ॥

लक्षणं स्पष्टार्थम् ॥

उदाहरति—

> ईशं किं विदधे श्रुतं च हरिणा किं पारिजातः कृतः
> कानन्ता मदनस्य काः सुमनसः सन्किं विधत्ते धनम् ।
> तान्तं किं मतुवर्थिके क विबुधा पापं व्रतैः किं कृतं
> को विष्णोः शयनं चिरं कथमभूद्भीष्मः प्रसादात्पितुः ॥
> कुर्वे किं विबुधान्किमस्ति गगने शारद्वतं चाहृय
> स्यात्को नाम विभागवान्पुररिपोरामन्त्रणं कथ्यताम् ।
> किं वा सामनि वृष्टिकामनिधनं संकीर्तितं सौभरे
> हृत्कीदृक्सुकृते सतां भगवती कात्यायनी स्तूयताम् ॥
> महावाहारिगीर्वाणारातिभङ्गविचक्षणे ।
> सिन्धुराननमातस्त्वं कृपयानुग्रहीष्यसि ॥

ईशं मह पूजय ॥ श्रुतमधीतम् अव रक्ष । यतः—'ब्रह्महत्यासमं ज्ञेयमधीतस्य विनाशनम्' इति स्मृतेः ॥ हरिणा पारिजातः स्वर्गाद् अहारि अपहृतः ॥ गीर्वाणी अनन्ता ॥ पुष्पाणि कामस्य बाणाः ॥ साधुर्धनं राति ददाति ॥ तकारान्तं मत्वर्थे परे भं भसंज्ञम् 'तसौ मत्वर्थे' इति वचनात् ॥ विबुधा देवा गवि सुरभौ स्वर्गे वा भवन्ति ॥ व्रतैश्चान्द्रायणादिभिः पापं चक्षणे नाशितम् । 'क्षणु हिंसायाम्' कर्मणि लिट् ॥ विष्णोः सिन्धुः शयनस्थानम् ॥ भीष्मः पितृप्रसादात् चिरम् आन जीवितवान् ॥ विबुधान् नम वन्दस्व ॥ गगने अतस्त्वम् अनन्तत्वम् अस्ति । 'तसु उपक्षये' भावे क्विप् । नञ्बहुव्रीहौ भावे त्वप्रत्ययः ॥ कृपेति शारद्वतसंबुद्धिः ॥ यान् गच्छन् विभागवान्स्यात् । कर्मणो विभागहेतु-

वक्तव्या रजनी कथं भवति को मन्त्रोऽर्थतः पादवा-
न्कः कान्ताकुचवद्गजस्य समरो रामायणे कीदृशः ॥

मालिनीतनयोदाराजिह्मगाचितमर्कटः ।

मा ज्ञानं विषयहीना न भवति । विषयनिरूप्यत्वनियमात् ॥ सहसि मार्गशीर्षे सूर्यः अलिनि वृश्चिकराशौ तिष्ठति ॥ इतनयो गतनीतिः प्रभुर्निन्द्यः ॥ दाराः स्त्रियः कामस्य शस्त्रं विजयहेतुत्वात् ॥ युवतिदृष्टिर्जिह्मगा वक्रा ॥ अचि परे इको यण्स्यात् 'इको यणचि' इति वचनात् रात्रिपर्यायस्तमाशब्दः ॥ अर्थतः पादवान्मन्त्र ऋक् । तेषामृग्मात्रार्थवशेन पादव्यवस्था' इति जैमिनिसूत्रात् । 'तमा ऋक्' इत्यत्र गुणे तमर्क्' इति रूपम् ॥ गजस्य कटः कुम्भः स्त्रीकुचतुल्यः ॥ 'तमर्क् कटः' इत्यत्र 'झरो झरि सवर्णे' इति कलोपः । मर्कटपक्षे द्वित्वं वा । मालिन्यास्तनयोऽतिकायसंज्ञो रावणपुत्रस्तस्याजिह्मगैर्बाणैराचिता व्याप्ता मर्कटा वानरा यत्र तादृशो रामायणसंग्रामः । 'तनयं विद्धि मालिन्यास्तति-येति यं विदुः' इति लङ्काकाण्डम् ॥

किं कृत्वा पिशुनान्सुखं वहति किं रामः कुतो वा जग-
त्स्योदेतीत्युदितो हरिः किमवदत्कीदृग्वियोगे वधूः ।
कात्युल्लासवती मतिर्भवति वा मोक्षाभिलाषी कथं
कीदृग्वावसिते निदाघसमये कुत्राम्बुदो दृश्यते ॥

विहायसीरंमदभामतिभासुरभूककुप् ।

दुर्जनान् विहाय त्यक्त्वा सुखं भवति ॥बलदेवः सीरं हलं धारयति ॥ 'जगत् कस्मा-दुद्भवति' इति पृष्टे ईश्वरो 'मत्, मत्तः सकाशात्' इति वदति ॥ जन्यानां शास्त्रावुत्पत्तौ च हेतुत्वात् ॥ विरहिणी वधूः अभा कान्तिहीना ॥ 'प्रज्ञा नवनवोल्लासशालिनी प्रतिभा मता' ॥ सुरभूः स्वर्गः तस्यां कं सुखं तत्र कुप्यतीति सुरभूककुप् । तद्विषयकरागाभाव-वानित्यर्थः ॥ ग्रीष्मावसाने च 'मेघज्योतिरिरंमदः' इत्यमरः । इरंमदो विद्युत् तस्य भा कान्त्या प्रतिभासुरा शोभमाना भूर्भूमिः ककुभो दिशश्च येन तादृशो मेघो विहायसि आ-काशे दृश्यते इति योज्यम् ॥

इत्यर्धोत्तरम् ॥

पुष्पवन्तौ कथं कुत्र पृदाकुपदमुच्यते ।
वदेन्द्रवारुणी कीदृक्कीदृशी वरवर्णिनी ॥

बहुभावहावमधुरा ।

'एकयोक्त्या पुष्पवन्तौ दिवाकरनिशाकरौ' इत्यमरः । बहुभौ अनेककिरणौ ॥ पृदाकु-पदम् अहौ वर्तते 'सर्पः पृदाकुर्भुजगो भुजंगोऽहिर्भुजंगमः' इत्यमरः । तद्वाचकत्वात् ॥ इ

सुधाधारासुमाधुर्यं सुमनोभासुमार्दवम्।
स्तनश्रीराश्रिताहार्यं प्रियायाभासतेनवम्॥

'सु' इति मातृसंबुद्धिः। सूशब्दे तु 'अम्बार्थनद्योर्ह्रस्वः'॥ 'धेट् पाने' 'डुधाञ् धारणपोषणयोः' इति द्वयं 'धा धा' इति 'दाधा घ्वदाप्' इति सूत्रे धा इति द्वयोरुपादानात्। रासु द्रव्येषु लोकस्येच्छा। 'अर्थरैविभवा अपि' इत्यमरः। 'रायो हलि' इत्यात्वम्॥ हे बुधाः खलत्वम् माधुर्मा धारयेयुः। 'माङि लुङ्'॥ यं यच्छब्दंतच्छब्दसाकाङ्क्षं प्राहुः। यच्छब्दानुकरणे अनुकार्यानुकरणयोर्भेदविवक्षायामनुकरणस्यानुकार्येणार्थवत्त्वात्प्रातिपदिकसंज्ञायां त्यदाद्यत्वे च यमिति यच्छब्दपरं बोध्यम्॥ 'सुम' इति पुष्पसंबुद्धिः॥ 'नो' इति पदं निषेधार्थकम्॥ भां प्रभां सूते भासु 'सत्सू—' इति क्विप् 'ह्रस्वो नपुंसके प्रातिपदिकस्य' इति ह्रस्वः॥ 'मा' इति अट आटश्च निषेधकम् 'न माङ्योगे' इति निषेधात्॥ ऋकारस्य 'अर्' इति गुणः 'उरण्रपरः' इति सूत्रैकवाक्यतया ऋकारस्य गुणे विधीयमाने 'अर्' इत्यस्य प्रवृत्तेः॥ 'प्रसङ्गावस्थायामेव रपरत्वम्' इति सिद्धान्तात्॥ सिंहो दवं वनम् आश्रयते। 'दवदावौ वनानले' इत्यमरः॥ सुकृते स्त वर्तध्वम्। अस्तेर्लोटि मध्यमपुरुषबहुवचने रूपम्॥ न श्रीर्गतश्रीको द्विजद्विट्। 'गतश्रीर्गणकान्द्वेष्टि गतायुश्च चिकित्सकान्। गतश्रीश्च गतायुश्च ब्राह्मणान्द्वेष्टि भारत॥' इत्युक्तेः॥ कुण्डभेदे राश्रिता त्रिकोणतास्ति। रपदस्याग्निवाचकत्वादग्निपदेन त्रित्वस्योपादानात्। अश्रिः कोणः॥ खलसौहृदमहार्यं कल्पितं हार्यमस्थिरं वा॥ वधूः प्रियाय स्पृहयति॥ वर्षारजनिः अभा नक्षत्रहीना॥ क्रूरव्रतं सते सज्जनाय अनवं रक्षाहीनम्। अवधातोर्घञर्थे कः। यद्वा नवः स्तुतिः 'णु स्तुतौ' इत्यस्मादप्। तद्रहितमित्यर्थः॥ नायिकावर्णनश्लोकार्थः—प्रियाया माधुर्यं सुधाधारासु भासते अमृतसदृशमित्यर्थः॥ मार्दवं मृदोर्भावः 'इगन्ताच्च लघुपूर्वात्' इत्यण्॥ सुमनसां पुष्पाणां मालतीनां वा भासु। भासत इत्यस्यानुषङ्गः॥ स्तनलक्ष्मीरहार्यं पर्वतमाश्रितेति सर्वत्र निदर्शनालंकारः॥ 'अहार्यधरपर्वताः' इत्यमरः। नवं विजातीयमिति माधुर्ये मार्दवे च विशेषणम्॥

इति चक्रबन्धजातिः॥

पद्मबन्धजातिं लक्षयति—

प्रत्येकं वर्णद्वयघटिताष्टदलं भवेत्पद्मम्।
प्रत्येकोत्तरवान्त्यं प्रथमोदितकर्णिकावर्णम्॥ २॥

उदाहरति—

का आर्वीद्धरिरम्ति दैत्यहृदि का प्राप्ते वदान्येर्थिनः
कीदृक्षा जन उत्तमो भवति क कीदृक्शुचौ सूर्यभा।

स्यात्कीदृग्जननी दशास्यनगरी कस्मिन्गिरौ वर्तते
तीरे तावदपारवारविषये पाथोनिधेः कीदृशी ॥
हंसं कीदृशमाहुराह सुविनिर्दुर्भ्यः परं कं मुनि-
र्मूर्धन्यं सुकृतं नरं चरति कं कीरं विदुः कीदृशम् ।
गान्धारीपितरं कमाकलयसे किं रेवतीमानसं
का योगिन्यपि चाविवेश जनकं विद्या गुरुभ्यः कथम् ॥

सुरभीः सुरायः सुतपाः सुवेले ।
सुपिसं सुखगं सुवलं सुलभा ॥

हरिः सुरभीर्गा आवीदरक्षत् ॥ दैत्यहृदि सुरसंबन्धिनी भीरस्ति वैरित्वात् ॥ दातरि मिलिते सति अर्थिनः शोभना रायो येषां ते सुरायो भवन्ति । आढ्या इति यावत् । उत्तमो जनः शोभनो रायो दानं यस्य तादृशो भवति 'रा दाने' इत्यस्माद्भावे घञ् । 'आतो युक् चिण्कृतोः' इति युक् । यद्वा कर्मणि घञ् । उत्तमवस्तुदाता इत्यर्थः ॥ शुचावाषाढे सूर्यप्रभा सुतपा सुतरां तपस्तापो यस्याम् । घञर्थे कः । सुतरां तपतीत्यच्प्रत्ययो वा ॥ सुतं पुत्रं पातीति सुतपा तादृशी जननी स्यात् ॥ लङ्का सुवेले त्रिकूटाचलेऽस्ति । 'पारावारे परार्वाची तीरे पात्रं तदन्तरम्' इत्यमरः । शोभना वेला समुद्रमर्यादा यत्र तादृशे । तद्द्रूपेऽपि मर्यादासत्त्वात् ॥ सुष्ठु पेसति गच्छतीति सुपीस्तं सुपिसम् । रम्यगतित्वात् ॥ पाणिनिमुनिः सु वि नि दुर् एभ्यः उपसर्गेभ्यः परस्य सुपेः कृतसंप्रसारणस्य स्वपधातोः सकारं मूर्धन्यमाहेति विपरिणामः 'सुविनिर्दुर्भ्यः सुपिसूतिसमाः' इति षत्वविधानात् ॥ पुण्यं स्वाश्रयपुरुषं सुखगं सुखप्राप्तं करोति । शुकं शोभनं खगं पक्षिणं प्राहुः ॥ गान्धार्याः पितरं सुबलसंज्ञं वेद्मि । रेवत्याश्चित्तं शोभनो रागविषयो बलो यत्र तादृशं स्यात् ॥ सुलभासंज्ञा योगिनी जनकम् आविवेशेति मोक्षधर्मे स्पष्टम् । विद्या गुरुसकाशात्सुलभा सुप्रापेत्यर्थः ॥

इति पद्मबन्धजातिः ॥

काकपदजातिं गोमूत्रिकाजातिं च लक्षयति—

त्रितयान्वयि पार्श्वाक्षरयुगं त्रिशाखं तु काकपदम् ।
मिलितसमविषमवर्णा गोमूत्री विलिखितोर्ध्वाधः ॥ ४ ॥

काकपदजातिमुदाहरति—

तर्केषु व्यवधानमद्य किमु कुत्र कान्दीक्ष्य मीमांसका-
स्तत्तद्भावविपर्यय कथमय पश्यन्त्यलीन्कीदृशान् ।

कीदृक्षः पुरुषोऽतिनीतिनिपुणैः कुत्र स्थाप्यते
किं जन्यो वद को युधिष्ठिरसदोनुतिर्विशेषो महान् ॥

समवायतः समयकृतः समयाहितः ।

मीमांसकान् समवायात् नतो गच्छतात्दनङ्गीकारिणो नीक्ष्य तं तर्कं तु समवाः सैः रम् अगाः । युक्तिभिः समवायपदार्थं स्थापितवानित्यर्थः ॥ आगूरणा सैतदर्थंतत्वः 'तत्तद्भावानां सुखदुःखादीनां विपर्ययः कथम्' इत्यत्र 'समयेन कृतं' इत्युत्तरम् ॥ तं तुल्यं यकृत् कालखण्डं येषां तादृशान्कालकर्णान् पश्यामि । 'कालखण्डयकृती तु समे इमे' इत्यमरः ॥ हित आप्तः पुरुषो नीतिज्ञैः समया समीपे स्थाप्यते । यो युधिष्ठिरसभाहितैः दानविशेषः स मयेन दानवविशेषेण आहितो जनितः । सभापर्वणीदं स्पष्टम् ॥

इति काकपदजातिः ॥

गोमूत्रीजातिमुदाहरति—

अन्तस्थाः परतः कुतो जगदिदं कीदृक्सता कीदृशा
भाव्यं मौनिनमाह्वय प्रियतमं का किं विधत्तेऽङ्गना ।
संबुद्धिः क गुहस्य वा जनकता किं युष्मदस्मन्ङसे-
र्वर्गाद्यक्षरतो भवन्ति वद के वर्णाः परे पञ्चमे ॥
धीरिन्द्रस्य जितस्य दानवगणैः कीदृग्दिवं किं व्यधा-
द्विन्यस्तान्तरकारकं भवति वा किं वर्णमिष्वर्थकम् ।
कानिन्दुस्तिथिरस्ति च क हृदयं कृष्णौ कथं भूभृतां
छन्दोधर्भवति श्रुते क सुरभौ ब्रूते वियुक्ता च किम् ॥

माद्यत्परभृतालापकमनीयातिसौरभे ।
अद्यमारजिता तापश्रममायामसौलभे ॥

अन्तस्था यरलवा माद् मकारात् परतो भवन्ति ॥ जगत्सर्वं यद् गमनशीलम् । नश्वरमिति यावत् ॥ साधुना परान्बिभर्ति पालयति परभृत् तादृशेन भाव्यम् ॥ अलाप वचनहीनेति मौनिसंबुद्धिः ॥ कमनी कामुकी स्त्री प्रियं याति ॥ सौ प्रथमैकवचने संबुद्धिसंज्ञा । 'एकवचनं संबुद्धिः' इति वचनात् ॥ रो वह्निः भं चेति समाहारद्वन्द्वः । अग्निकृत्तिकयोर्गुहजनकत्वात् ॥ युष्मदस्मदोः परस्य ङसेः 'अत्' इत्यादेशः । 'पञ्चम्या अत्' इति सूत्रात् ॥ वर्गेषु आद्यान्यक्षराणि चत्वारि कादीनि तेभ्यः पञ्चमे ङकारादौ वर्णे परे सति ककारादिभ्यः परतो यमास्तत्संज्ञा वर्णा भवन्ति । यथा—पलिक्क्निः चख्ख्नतुरित्यादि । यथा चौदव्रजिसंज्ञस्याचार्यस्य सूत्रम्—'अनन्त्यस्यान्त्यसंयोगे मध्ये यमः पूर्वस्य गुणः' इति ॥ गुणोऽवयव इत्यर्थः ॥ रजिर्नृपविशेषः तातः पितृत्वेन विषयः कर्तव्यो यस्यां

तादृशी इन्द्रस्य मतिः दिवं स्वर्गम् आप लेभे। रजेरिन्द्रत्वं प्रतिज्ञाय तेन दैत्यान्घातयित्वा ततोऽहं रजेः पुत्रोऽस्मीत्युक्त्वा इन्द्रेणात्मपदं लब्धम् इति हरिवंशे स्पष्टम्—'रजेः पञ्चशतं पुत्रान्हत्वा चेन्द्रोऽलभत्पदम्' ॥ शं पदं शकाररेफयोरन्तराले वकारदाने 'श्वरः' इति भवति ॥ अमा तिथिश्चन्द्रहीना ॥ हृदयं यां लक्ष्म्याम् अस्ति। ईशब्दस्य सप्तम्येकवचने रूपम् ॥ कृष्णौ वासुदेवार्जुनौ राज्ञाम् असौ क्षेपकौ। 'असु क्षेपणे' इत्यस्य अस्यत इत्यसौ। नाराकौ इति यावत्। अस्यतेः पचाद्यच् ॥ लशब्दो लघुपर्यायः भशब्द आदिगुरुर्भगणार्थः। तच्चोपलक्षणं गणान्तराणाम्। समाहारद्वन्द्वः। तज्ज्ञानेन छन्दसां ज्ञानात् ॥ अथ विरहिणीवाक्यार्थः—मायन्तो मत्ताः परभृताः कोकिलास्तेषामालापेन कमनीया मनोहरा अतिसौरभा आम्रवृक्षा यस्मिन् एतादृशे अद्य वसन्तदिने मारेण कामेन जिता अभिभूता असौ अहं तापो ज्वरः श्रमः खेदस्तयोर्मायां तद्रूपां मायां वा लेभे। प्राप्नोमीत्यर्थः॥

इति गोमूत्रीजातिः ॥

सर्वतोभद्रजातिं लक्षयति—

एकेन द्वाभ्यां वा सर्वैर्वा सर्वदिग्गतैर्वर्णैः।
यत्रोत्तराणि दुष्करमिदमुदितं सर्वतोभद्रम् ॥ ५ ॥

उदाहरति—

कः शब्दः काव्यकर्तुः क जगदनुगतं कः क्षरत्यर्थधातुः
क स्याद्रेफस्य लोपः प्रतिकृतिविषयः कुत्र कः प्रत्ययः स्यात्।
कोः कः स्यादक्षशब्देऽभिमुखय विहगं कीदृशौ कंसकृष्णौ
केन स्याद्वा तरीतर्यपि च लुकि शपः कौ च गत्यर्थधातू ॥
क स्याच्छब्दः खगेति प्रसवमय इषुः कस्य कोऽस्य च्विर्योगे
कस्यापृक्तस्य लोपः प्रभवति क कृतः कश्च शब्दार्थधातुः।
वह्निर्की काह्व त्वं कमविमकि मतौ कौ तुरीयाद्वितीयौ
को वोकारस्य यण् दिक्कथमनुपहिता पुण्यतोया सरित्का ॥

काबेरी।

काव्यं करोतीति काव 'तत्करोति-' इति ण्यन्तात्क्विप् यकारस्य संयोगान्तलोप इत्यन्यत्र विस्तरः ॥ ए विष्णौ जगदनुस्यूतम्। 'सर्वत्रासौ समस्तं च वसत्यत्रेति वै यतः। ततोऽसौ वासुदेवेति विद्वद्भिः परिपठ्यते' इति स्मरणात्। री इति धातु क्षरणे। [illegible]

पङ्क्तिर्मधौ हसति किंप्रतियोगिकेयं
का भासते विजयभाजि सदैव पुंसि ।

तारवी ।

तरूणामियं तारवी वृक्षप्रतियोगिका पङ्क्तिः ॥ वीरता वीरत्वम् ॥

विद्वन्कया कुशलवौ समसाविषातां
वर्णेन कोभयविधेन सदृग्भवान्या ॥

सीतया ।

सीतया जानक्या कुशलवाख्यौ पुत्रौ प्रसूतौ ॥ अक्षरेण रूपेण च सा भवानीतुल्या या अतसी उमापदवाच्यत्वान्नीलवर्णत्वाच्च । 'अतसी स्यादुमा क्षुमा' इत्यमरः ॥

कथय सखे किमवस्था शंवरभवने रतिरवात्सीत् ।
प्रियया व्यथते च कथं भवति क तरीतुकामो वा ॥

विमदना ।

कामवियुक्ता रतिः शंवरगृहे अवात्सीत् वसति स्म ॥ मध्याक्षरद्वयत्यागे 'विना' इति पदम् । तद्विपरीत्ये 'नावि' इति लिङ्गम् ॥ प्रियया दयितया कथं व्यथते विगतमदो ना पुरुषः नपुंसकत्वात् ॥ तरीतुकामो मुमुक्षुर्वा विमदना विगतमदो ना पुरुषः ॥

कीदृशी दयितादेहवीरुत्कोन्मादकारिणी ।
केषु वा सत्सु पुरुषो दुर्विधो नाभिधीयते ॥

सुकुमारा ।

सुकुमारा कोमलस्पर्शा ॥ मध्याक्षरद्वयत्यागे 'सुरा' इति ॥ तद्विपरीत्ये 'रासु' इति पदे लिङ्गम् । द्रव्येषु इत्यर्थः ॥

इति गतप्रत्यागतजातिः ॥

वर्धमानाक्षरहीयमानाक्षरजाती लक्षयति—

आदौ मध्येऽन्ते वा यत्रैकद्वित्रवर्णानाम् ।
वृद्धिर्वा हानिर्वा तद्भेदद्वयमनुगतार्थम् ॥ ७ ॥

पूर्वपूर्ववर्णसहितेनोत्तरवर्णेन यदुत्तरं तद्वर्धमानाक्षरम् ॥ पूर्वपूर्ववर्णं विहाय तदुत्तरवर्णेन यदुत्तरं तद्धीयमानाक्षरमित्यर्थः ॥

वीतिहोत्रभवः को वा भोज्या का सद्भिः कृता ।
मधुपैः किं वरवधूवदनाभं निपीयते ॥

राजीवम् ।

'राः स्मृतः स्वर्णवित्तयोः' इति विश्वः ॥ 'अग्नेरपत्यं प्रथमं हिरण्यम्' इति श्रुतिः ॥ राजी कटुरसा दध्ना सह भुज्यते ॥ राजीवं पद्मम् ॥ उत्तरोत्तरं वर्णवृद्धिः स्पष्टैव ॥

किं वा पदं विकल्पार्थे बालासंबोधनं वद ।
मथद्भिरब्धिं विबुधैः को नेत्रं मन्दरे कृतः ॥

वासुकिः ।

विकल्पार्थकं वापदम् ॥ 'वासु' इति बालासंबुद्धिः । 'बाला वासूः' इत्यमरः ॥ वासुकिः सर्पभेदः ॥ 'मन्थानं मन्दरं कृत्वा नेत्रं कृत्वा तु वासुकिम्' इति पुराणम् ॥

विद्ययास्ति सह कोऽत्र विरोधी का मुनेरपि मनो मदयन्ति ।
दिङ्मुखः स भृशमीर्ष्यति कस्मै काव्यमाहुरमृतप्रतिमं किम् ॥

रामायणम् ।

रा द्रव्यम् ॥ रामाः स्त्रियः ॥ रामाय दाशरथये ॥ रामायणं वाल्मीकिकाव्यम् ॥

संबोधय सुखं गीतिः कीदृशी बर्हमाह्वय ।
चतुर्भिरेकवाक्यत्वं प्राप्तैः श्लोकैः किमुच्यते ॥

कलापकम् ।

'क' इति सुखसंबुद्धिः ॥ गीतिः कलाविशेषः ॥ 'कलाप' इति बर्हसंबुद्धिः ॥ श्लोकचतुष्टयस्यैकवाक्यत्वे काव्येषु 'कलापकम्' इति प्रसिद्धिः ॥

मनुष्यस्य सखे तावत्संबुद्धिरभिधीयताम् ।
द्वौ वर्णावादितो दत्त्वा बलिमच्छलयच्च कः ॥

वामनः ।

नृशब्दस्य 'ह्रस्वस्य गुणः' इति गुणे कृते 'नः' इति संबुद्धिः ॥ वामनो बलिं वञ्चितवान् इति प्रसिद्धम् ॥

गिरीशेन जिगीषुः कः प्रसह्य निरदह्यत ।
आद्यवर्णोत्तरं वर्णौ द्वौ दत्त्वा तमसूत कः ॥

मधुसूदनः ।

मदनो हरेण दग्धः ॥ मकारोत्तरं 'धुसू' इति वर्णद्वये दत्ते 'मधुसूदनः' इति शब्दः ॥ तद्वाच्यो नारायणो मदनं प्रद्युम्नं सुतमुत्पादितवान् ॥

ब्राह्मणेन समागम्य प्राज्ञाः किमनुयुञ्जते ।
वर्णद्वयविवृध्द्यान्ते लवः किं नाकरोद्रने ॥

कुशलङ्घनम् ।

---

१. 'रावणः' इत्यपि पाठः.

'राः स्मृतः स्वर्णविभवयोः' इति विश्वः ॥ 'अहिरग्न्या प्रथमं द्विजानाम्' इति श्रुतिः ॥ राजी कद्रुसुता दशा मह भुजगे ॥ राजीवं पद्मम् ॥ उरगेन्द्रः [illegible] ॥

किं वा पद्मं विकल्पार्थं बालासंबोधनं नग ।
मथद्भिरब्धिं विबुधैः को नेत्रं मन्दरे कृतः ॥

वासुकिः ।

विकल्पार्थकं वापदम् ॥ 'वासु' इति बालासंबुद्धिः । 'बाला वासूः' इत्यमरः ॥ वासुकिः सर्पभेदः ॥ 'मन्थानं मन्दरं कृत्वा नेत्रं कृत्वा तु वासुकिम्' इति पुराणम् ॥

विचयास्ति राहु कोऽत्र विरोधी का मुनेरपि मनो मदयन्ति ।
दिङ्मुखः स भृशगीर्ष्यति कस्मै काव्यमाहुरमृतप्रतिमं किम् ॥

रामायणम् ।

रा द्रव्यम् ॥ रामाः स्त्रियः ॥ रामाय दाशरथये ॥ रामायणं वाल्मीकिकाव्यम् ॥

संबोधय सुखं गीतिः कीदृशी बर्हमाह्वय ।
चतुर्भिरेकवाक्यत्वं प्राप्तैः श्लोकैः किमुच्यते ॥

कलापकम् ।

'क' इति सुखसंबुद्धिः ॥ गीतिः कलाविशेषः ॥ 'कलाप' इति बर्हसंबुद्धिः ॥ श्लोकचतुष्टयस्यैकवाक्यत्वे काव्येषु 'कलापकम्' इति प्रसिद्धिः ॥

मनुष्यस्य सखे तावत्संबुद्धिरभिधीयताम् ।
द्वौ वर्णावादितो दत्त्वा बलिमच्छलयच्च कः ॥

वामनः ।

नृशब्दस्य 'ह्रस्वस्य गुणः' इति गुणे कृते 'नः' इति संबुद्धिः ॥ वामनो बलिं वञ्चितवान् इति प्रसिद्धम् ॥

गिरीशेन जिगीषुः कः प्रसह्य निरदह्यत ।
आद्यवर्णोत्तरं वर्णौ द्वौ दत्त्वा तमसूत कः ॥

मधुसूदनः ।

मदनो हरेण दग्धः ॥ मकारोत्तरं 'धुसू' इति वर्णद्वये दत्ते 'मधुसूदनः' इति शब्दः तद्वाच्यो नारायणो मदनं प्रद्युम्नं सुतमुत्पादितवान् ॥

ब्राह्मणेन समागम्य प्राज्ञाः किमनुयुञ्जते ।
वर्णद्वयविवृद्ध्यान्ते लवः किं नाकरोद्वने ॥

कुशलङ्घनम् ।

१. 'रावणः' इत्यपि पाठः.

'राः स्मृतः स्वर्णवित्तगोः' इति विश्वः ॥ 'अग्नेरपत्यं प्रथमं हिरण्यम्' इति श्रुतिः ॥ राजी कटुरसा दभ्रा सह भुज्यते ॥ राजीवं पद्मम् ॥ उत्तरोत्तरं वर्णवृद्धिः स्पष्टा ॥

किं वा पदं विकल्पार्थे बालासंबोधनं वद ।
मथद्भिरब्धिं विबुधैः को नेत्रं मन्दरे कृतः ॥

वासुकिः ।

विकल्पार्थकं वापदम् ॥ 'वासु' इति बालासंबुद्धिः । 'बाला वासूः' इत्यमरः ॥ वासुकिः सर्पभेदः ॥ 'मन्थानं मन्दरं कृत्वा नेत्रं कृत्वा तु वासुकिम्' इति पुराणम् ॥

विषयाऽस्ति सह कोऽत्र विरोधी का मुनेरपि मनो मदयन्ति ।
दिङ्मुखः स भृशमीर्ष्यति कस्मै काव्यमाहुरमृतप्रतिमं किम् ॥

रामायणम् ।

रा द्रव्यम् ॥ रामाः स्त्रियः ॥ रामाय दाशरथये ॥ रामायणं वाल्मीकिकाव्यम् ॥

संबोधय सुखं गीतिः कीदृशी बर्हमाह्वय ।
चतुर्भिरेकवाक्यत्वं प्राप्तैः श्लोकैः किमुच्यते ॥

कलापकम् ।

'क' इति सुखसंबुद्धिः ॥ गीतिः कलाविशेषः ॥ 'कलाप' इति बर्हसंबुद्धिः ॥ श्लोकचतुष्टयस्यैकवाक्यत्वे काव्येषु 'कलापकम्' इति प्रसिद्धिः ॥

मनुष्यस्य सखे तावत्संबुद्धिरभिधीयताम् ।
द्वौ वर्णावादितो दत्त्वा बलिमच्छलयच्च कः ॥

वामनः ।

नृशब्दस्य 'ह्रस्वस्य गुणः' इति गुणे कृते 'नः' इति संबुद्धिः ॥ वामनो बलिं वञ्चितवान् इति प्रसिद्धम् ॥

गिरीशेन जिगीषुः कः प्रसह्य निरदह्यत ।
आद्यवर्णोत्तरं वर्णौ द्वौ दत्त्वा तमसूत कः ॥

मधुसूदनः ।

मदनो हरेण दग्धः ॥ मकारोत्तरं 'धुसू' इति वर्णद्वये दत्ते 'मधुसूदनः' इति शब्दः ॥ तद्वाच्यो नारायणो मदनं प्रद्युम्नं सुतमुत्पादितवान् ॥

ब्राह्मणेन समागम्य प्राज्ञाः किमनुयुञ्जते ।
वर्णद्वयविवृद्ध्यान्ते लवः किं नाकरोद्वने ॥

कुशलङ्घनम् ।

१. 'रावणः' इत्यपि पाठः.

चामीकरं सुवर्णम्। 'सर्वेषामेव दानानां सुवर्णं दक्षिणेष्यते' इति स्मृतेः॥ मध्याक्षर-द्वयत्यागे चारं प्रेषयन्ति॥

राजराज नलिन्याः किं भीमोऽहार्षीत्प्रियेरितः।
कुत्रैकाचस्तृतीयादिरुदात्तान्त्याक्षरैर्विना॥

सौगन्धिकम्।

द्रौपद्या प्रेरितो भीमः कुबेरपुष्करिणीतः सौगन्धिकं पुष्पमहार्षीत् इति वनपर्वणि स्पष्टम्॥ अन्त्याक्षरत्रयत्यागे सौ सुप्रत्यये परे य एकाच् ततः परा तृतीयादिविभक्तिरुदात्ता भवति 'सावेकाचस्तृतीयादिर्विभक्तिः' इति सूत्रात्॥ साविति प्रथमैकवचनस्य ग्रहणमिति केचित्॥ सप्तमीबहुवचनस्येत्यन्ये॥

अश्वमेधहयपालनोद्यतं को जघान जनकं रणाङ्गणे।
किं कया स्वहृदयं करोति वा स्त्री विना प्रथममन्त्यमक्षरम्॥

बभ्रुवाहनः।

बभ्रुवाहनसंज्ञोऽर्जुनस्य पुत्रश्चित्राङ्गदायां शेषकन्यायामुत्पन्नः। तेनार्जुनो हत इति महाभारतेऽश्वमेधपर्वणि स्पष्टम्॥ पक्षे प्रथमान्त्योभयाक्षरत्यागेन 'भ्रुवा-आह' इति पदमवशिष्टम्। कामिनी सुचतुरा सविभ्रमया भ्रुवा स्वमभिप्रायमनुरागं स्वानुरक्ताय 'त्वयैवं मयैवं कर्तव्यम्' इति भ्रुवा आह सूचयति लक्षयतीत्यर्थः॥

इति हीयमानाक्षरजातिः॥

शृङ्खलाजातिं लक्षयति—

पूर्वान्तिमचरमादिमवर्णोपादानहानाभ्याम्।
स्याच्छृङ्खला भवेत्सा क्वचिदेकान्तरितभावेऽपि॥ ८॥

उदाहरति—

आमन्त्रयस्व धनुरल्पमनेहसं च
जानक्यसौत्कमथ कः सुरभिः सरस्य।
कीदृक्तथोक्षसु जनादरणीयताभा-
क्सन्तश्च किं विजहति प्रतिभानशालिन्॥

चापलवन्धुर्यः।

'चाप' इति धनुष, 'पल' इति अल्पकालस्य संबुद्धिः॥ सीता लवम् अर्थाद् उत्पादयामास॥ सुरभिर्वसन्तः कामस्य बन्धुः सुहृत्॥ धुर्यो धूर्वहनसमर्थ उक्षा जनोपादेयः॥ चापलस्य चञ्चलताया बन्धुः [illegible] सन्तस्त्यजन्ति॥

संबुद्धिः वद दुर्वहस्य मदनो युक्तः कया भार्यया
　को शस्तो मतिमन्धनव्यसनयोः पीतं च संबोधय ।
किं तन्वन्ति पिका वसन्तसमये लोकोत्तरोल्लासया
　मेधाविप्रविरुद्धया च निगमैः किं वा कया प्राप्यते ॥

भारत्यागौरवम् ।

'भार' इति दुर्वहसंबुद्धिः ॥ रत्या भार्यया युक्तः कंदर्पः ॥ धनस्य दानं त्यागः, व्यसनस्य निद्रादेः त्यागः परिहारः ॥ 'गौर' इति पीतसंबुद्धिः ॥ रवं शब्दं कुर्वन्ति ॥ लोकोत्तरया वेदाविरुद्धया च भारत्या सरस्वत्या गौरवम् उत्कर्षः प्राप्यते। तथा च स्मृतिः—'आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना । यस्तर्केणानुसंधत्ते स धर्मं वेद नेतरः ॥'

इति शृङ्खलाजातिः ॥

का भासतेऽतिदयिता नलकूबरस्य
　दृष्ट्वा विशिष्टगुणमाहुरमत्सराः किम् ।
पश्यन्ति नेह पुरुषाः क्षयभाजि कस्यां
　का प्राप्यते रयवता भरतस्थितिः का ॥

रम्भाविहिता ।

रम्भा नामाप्सरा नलकूबरस्य प्रिया इत्युत्तरकाण्डे स्पष्टम् ॥ उत्कृष्टगुणं पुरुषं दृष्ट्वा मत्सरहीना भाहि शोभस्व इत्याहुरभिनन्दनार्थम् ॥ गवि चक्षुरिन्द्रिये क्षीणे रूपं न पश्यन्ति साधनाभावात् ॥ विता पक्षित्वं वेगवता प्राप्यते तत्सादृश्यात् ॥ रङ्गेनाट्यभूमौ भाविहितम् इष्टं यस्याम् । नाट्यप्रयोगेण भरतानां नटानामुत्कर्षात् ॥ अन्यैकान्तरत्वं स्पष्टम् ॥

ज्यायोगं वहति शरः क मोक्षकाले
　कीदृक्षं भवति रजो बलैरुदस्तम् ।
कीदृग्वा हरति वधूर्मनः क वह्नेः
　सारथ्यं न भवति कीदृशे स्तने श्रीः ॥

पुंनखेवारिते ।

मोक्षसमये बाणः पुङ्खावच्छेदेन ज्यासंयोगं प्राप्नोति ॥ अश्वादिभिरुत्थापितं रजः खम् आकाशम् ईर्ते गच्छति तच्छीलं खेरि भवति ॥ नवा युवतिर्वधूर्मनोहरा । वाते अग्निसारथ्यं तदुद्दीपने हेतुत्वात् ॥ पुंसः पुरुषस्य नखे निपिद्धे सति स्तने श्रीः शोभा न भवति । नायकनखक्षताङ्कितस्यैव तस्य शोभोदयात् ॥

इत्येकान्तरितशृङ्खलाजातिः ॥

नागपाशं लक्षयति—

अनुलोमविलोमाभ्यां मिश्रितैर्मध्यगाक्षरैः ।
वाच्यते मध्यमारभ्य नागपाशोऽयमुच्यते ॥ ९ ॥

उदाहरति—

कया विना यौवनमस्ति वन्ध्यं स्नानावतीर्णा दयिता कथं स्यात् ।
सविभ्रमावेल्लितया दृशा वा वधूः प्रियं पश्यति कीदृशाक्षैः ॥

कालसारसदृशा ।

आद्यवर्णद्वयं त्यक्त्वा सारसदृशा कमलनेत्रया विना तारुण्यं व्यर्थम् ॥ अन्त्यवर्णद्वयं त्यक्त्वा विपरीतवाचने 'सरसालका' इति भवति । सरसा आर्द्रा अलका यस्याः ॥ कालसारः कृष्णमृगः तद्दृष्टितुल्यया दृशा पश्यति इत्यर्थः ॥ अत्र सारस-सरसापदयोर्नागपाशाकारत्वं स्पष्टम् ॥

प्रियतम सदृशं स्यात्केशपाशेन किं मे
भवति भवनभूमिर्भोगिनां भव्यकृत्का ।
प्रसरति विहितायां कैश्च पाञ्चालिकायां
विततिरिह हि कस्यां शीघ्रमेवाभिधेहि ॥

कारुभीरुचामरम् ।

हे भीरु, चामरं तव केशकलापेन तुल्यम् इत्याद्यवर्णद्वयत्यागेन चामरपर्यन्तमर्थः । अन्त्यवर्णद्वयत्यागेन विपरीतवाचने 'चारुभीरुका' इति चारवो रम्या भीरुकाः कामिन्यो यत्रेति समासान्तः कप्रत्ययः ॥ कारुभिः शिल्पिभिर्निर्मितायां पाञ्चालिकायां पुत्रिकायाम् अरं शीघ्रं रुचां कान्तीनां विततिरुदेति ॥ पूर्वं व्यस्तसमस्तम् । इदं समस्तव्यस्तमिति विशेषः ॥

भाषाभेदादर्थभेदे चित्रमित्यभिधीयते ।
तदैक्ये त्वर्थभेदो यः स न युक्तो विभाजकः ॥ १० ॥

भाषाभेदो भाषाविभाजकोपाधिर्यः संस्कृतत्वादिस्तदवच्छिन्नप्रतियोगिताकः । अन्यथा संस्कृतघटोभयभेदस्य संस्कृतेऽपि सत्त्वादतिप्रसङ्गात् ॥ नन्वेकस्यामपि भाषायां पदच्छेदेनार्थद्वयप्रतीतावपि चित्रव्यवहारो विदग्धमुखमण्डनादौ दृष्ट इत्यत आह—तदैक्ये त्विति॥ भाषायामभिन्नायां योऽर्थभेदः स तु चित्रविरूपभेदघटको न भवति पूर्वोक्तभेदानां चित्र एवान्तर्भावापत्तेः एतन्निर्मुक्तभेदान्तरविलयप्रसङ्गादित्यर्थः ॥

दुर्योधनादीन्विनिर्जित्य उदीरितो गन्धर्वराजः किमवोचदर्जुनम् ।
पिये पउत्थम्मि सहीहि पुच्छिदे वरांगणाये भण किं भणिज्जई ॥
अहमुज्झामि ।

घोषयात्रायां चित्ररथेन गन्धर्वेण दुर्योधनादयो बद्ध्वा गृहीताः, ततोऽर्जुनेन मोचिता इत्यारण्यके पर्वणि स्पष्टम् ॥ अहमुज्झामि त्यजामि इति चित्ररथस्यार्जुनं प्रत्युक्तिः ॥ प्रिये प्रस्थिते सखीभिः पृष्टया वराङ्गनया भण किं भण्यते ॥ हे सखि, अहमसौ मुञ्चामि मुञ्चामि तद्विरहवेदनयेत्यर्थः ॥

कः पिकदयितः कीदृङ्नगरं कीदृङ्मृगेषु शबरकुलम् ।
सहिआहि किं कहिज्जइ अज्जाभसरेहिँ अनुसरिज्जन्ती ॥
माकन्दोट्टमुत्तंसेहि ।

माकन्द आम्रतरुः पिकप्रियः ॥ 'स्यादट्टः क्षौममस्त्रियाम्' इत्यमरः । अट्टेन अट्टे वा मुदेऽन्न रम्यत्वात् । तं सं बन्धम् ईहते तंसेहि 'तसि बन्धने' बन्धेच्छावदित्यर्थः ॥ सखीभिः किं कथ्यते । 'अज्जा नवयुवत्याम्' इति देशी । 'भ्रमरैरनुसियमाणा नववधूः सखीभिः किं कथ्यते' इति प्रश्ने 'मा नीलोत्पलमुत्तंसय' इति । कंदोट्टं नीलोत्पले देशी । तदवतंसीकरणे तन्मधुलुब्धा भ्रमरास्त्वामायासयन्ति ॥ तत्परित्यागे तु सुस्था भविष्यसि इत्यर्थः ॥

उक्तौ जातिविशेषाणामशेषाणां क्षमेत कः ।
यन्नेहाभिहितं स्यात्तन्महामतिभिरुह्यताम् ॥ ११ ॥

इति श्रीविश्वेश्वरपण्डितविरचिते कवीन्द्रकर्णाभरणे तृतीयः परिच्छेदः ।

चतुर्थः परिच्छेदः ।

श्लेषे सति विशेष्यस्यानभिधानं प्रहेलिका ।
अर्थे श्लिष्टे भवत्यार्थी शब्दे शाब्दीति कथ्यते ॥ १ ॥

श्लेष इति शब्दार्थोभयश्लेषपरम् ॥

अप्यन्यतो जिगमिषन्प्रसभं निरुद्धो
रागातिभूमिविभवेन विभाव्यमानः ।
एणीदृशा गुरुजनस्य समक्षमेव
सव्रीडयैव परितः परिरभ्यते कः ॥
रक्तोत्तरासङ्गः ।

प्रावारोऽङ्गात्पतितः सन् समालभ्यते । रागातिशयेन गुरुषु पश्यत्सु लज्जया श्लिष्यते च अङ्गावरकत्वाद् प्रसभनिरोधकत्वादिकं नायकसाधारण्यमिति नायकनिष्ठत्वेन चमत्का

रका ये धर्माः प्रसिद्धास्तद्रूपत्वगुणेनोत्तरीयप्रतीतिरिति । आर्यागम् ॥ न च रागेति श्ले-षवत्त्वाच्छब्दशक्तिमूलकत्वमप्यत्रेति वाच्यम् । उत्कण्ठेच्छाप्रदर्शनस्य रागेत्यादिविशे-षणार्थतया रागपदेनोभयत्रापीच्छाया एव विवक्षिततया आकर्षणस्याविवक्षितत्वात् । आर-ण्यस्य प्रकृतानुपयोगित्वात् । 'द्वौ प्रावारोत्तरासङ्गौ' इत्यमरः ॥

किसलयललितां मलिनामलिनामावलिभिरुल्लसन्मुकुलाम् ।
कामवलोक्य विलोचनमपसरति न जातु सरसानाम् ॥

कान्ताम् ।

किसलयादिपदानां मुखवृत्त्या लतान्वितार्थत्वात् अधरादौ तेषां साध्यवसानवृत्त्यैव प्रवृत्तिः । अतो लतायां सिद्धानामर्थानां स्पष्टत्वम् तात्पर्यविषयतया मुख्यस्य कान्तारूपस्यार्थस्य गोप्यत्वमिति बोध्यम् ॥

विविक्तरूपा सुतरामसूर्यंपश्या प्रिया संपदि या बभूव ।
वीर त्वदीयद्विपतामिदानीं सैव प्रिया भाति दधत्यसुंका ॥

सुन्दरी ।

विविक्तत्वरम्यत्वे निर्जनत्वं च सूर्यदर्शनराहित्यं गुप्तत्वम् । सूर्यकिरणसंयोगाभावाच्च दधती आधारभूता असुंका सुंशब्दरहिता दरीति यावत् ॥

वनान्तवृत्तिरपि सन्यः सदालयमध्यगः ।
अन्त्यस्पर्शादियुक्तोऽपि यः स्पृश्यः सोऽभिधीयताम् ॥

मलयपवनः ।

वनान्तवृत्तेरालयमध्यगत्वं विरुद्धम् । 'मलयपवन' इति शब्दस्य वनशब्दान्तवृत्तित्वात्, लयशब्दस्य मध्यगत्वाच्च तत्परिहारः ॥ अन्त्यश्चण्डालादिः तत्स्पर्शिनः स्पर्शयोग्यत्वमिति विरोधः । अन्त्यस्पर्शो मकारः 'कादयो मावसानाः स्पर्शाः' इत्युक्तेः । तदादित्वं स्पर्शनप्रत्यक्षविषयत्वं चेति तत्परिहारः ॥

इति शाब्दीजातिः ॥

गुणे कृते विभ्रति येऽत्र वृद्धिं भागस्य हारेण भजन्ति नाशम् ।
गतिं लभन्ते विपरीतरूपां के द्विर्वधात्सत्कृतिमाश्रयन्ति ॥

अङ्काः ।

गुणनेन अङ्कानां वृद्धिः, भागहरणे हानिः, वामतो गतिः, द्विगुणनं कृतिः 'समद्विघातः कृतिरुच्यते' इत्युक्तेः 'गुणविधौ वृद्धिः, ताडनादिवृत्तौ सत्कारः' इति विरोधः । 'भागहरणे हानिर्विपरीता' इत्यत्राशक्तिमूलकत्वम् ॥

---

१. 'वृत्तिं भागाभ्युपेताश्च' इति पाठः.

अवधीरितापराधे स्वापराधानङ्गीकारिणि । निबन्धने हेतुः । 'प्रश्नोऽनुयोगः पृच्छा च' इत्यमरः । हीरकप्रत्युप्तपद्मरागाभरणदानेन नायिकान्तरदन्तव्रणविशिष्टाधरत्वं नायकस्योक्तम् ॥

इति हृद्यजातिः ॥

गूढजातिमुदाहरति—

गन्धसमवायिवहतद्विलक्षणस्पर्शशब्दगुणपूज्याः ।
साजात्येऽन्यस्पर्शौ यत्तनवः सोऽवताद्भवतः ॥

गन्धसमवायिवहौ क्रमेण पृथिवीवायू । तयोरनुष्णाशीतस्पर्शतया तद्विलक्षणशीतोष्णस्पर्शवत्त्वेन जलतेजसी उक्ते शब्दगुणमाकाशम् शब्दपूज्यो यजमानः सर्वजीवात्मा मीमांसकानां शब्दस्यैव देवतात्वात् । एकजातीयत्वे सति भिन्नस्पर्शौ इति सूर्याचन्द्रौ तेजस्वित्वेन साजात्यात् उष्णशीतस्पर्शवत्त्वाच्च । यद्यपि तेजस्त्वाच्चन्द्रस्याप्युष्णस्पर्शवत्त्वं तथापि जलावयवस्पर्शेन तदभिभवाल्लोकदृष्ट्यैवमुक्तम् ॥ तस्मादष्टमूर्तित्वादीश्वरस्य लाभः ॥

स्वजनकजन्याभावोपजनकजननीयपुरनिहन्तृसखः ।
यं तनयं समजनयत्तद्वलितनयैर्जगद्विजितम् ॥

स्वस्य जनकं निमित्तं तत्प्रतियोगिको जन्याभावो ध्वंसः । तस्योपजनको वह्निः आश्रयाशत्वात् तन्निमित्तेन्धनदाहहेतुत्वं तस्य जननीयं हिरण्यं तस्य पुरं हिरण्यपुरं निवातकवचसंज्ञानां दैत्यानामावासः तस्य निहन्तार्जुनः तत्सखः कृष्णः स कामं पुत्रमजनयत् । तस्य वलितनयैर्बाणैरित्यर्थः । अत्र कामरूपोऽर्थो गूढः ॥

गोधुक्सख्यङ्ङुक्षद्रुद्वन्द्वध्रुग्घतिच्छिदघ्न्यानाम् ।
योऽजर्घद्विड्धक्त्वं पप्वण्किध्वे न तं कस्मात् ॥

गोदुहः सख्यञ्चः सखायो यस्य, उक्षा अरिष्टवृषभः द्रुद्वन्द्वं यमलार्जुनसंज्ञं तं द्रुह्यतीति उक्षद्रुद्वन्द्वध्रुक् । अघ्न्यानां गवां हतिच्छिद् रक्षकः । द्विषः शत्रून्दहति तस्य भावो द्विड्धक्त्वम् अजर्धत् आचकाङ्क्ष । 'गृधु अभिकाङ्क्षायाम्' यङ्लुकि लङ् प्रथमपुरुषैकवचनेरूपम् । तं श्रीकृष्णं कस्माद् न पप्वण्किध्वे न गता नाश्रिता इति यावत् ॥ आपन्नान्प्रत्युक्तिः । 'ष्वष्क गतौ' इत्यस्य लिटि मध्यमपुरुषबहुवचने रूपम् ॥

पातातुराणां बोधैक्यमयो धुर्यासिसूः सताम् ।
दलितैनःसमुदयः पातु वो मधुसूदनः ॥

आतुराणाम् आपन्नानां पाता बोधो ज्ञानं तदभिन्नः वेदान्तिमते नित्यज्ञानरूपत्वात् सतां सत्त्वेन भासमानानां धुरि अग्रे आसि, प्रासिस्ता सूते इत्यासिसूः व्यावहारिकसत्तावत्प्रपञ्चापेक्षया अधिकसत्ताकत्वात् ब्रह्मणस्तस्य पारमार्थिकत्वात् । प्राणा वै सत्यं तेषामेष सत्यम् इति श्रुतेः ॥ अत्र मधुसूदनपदस्य पूर्वपादत्रयं व्यर्थं इति बोध्यम् ॥

[illegible] ॥ पक्षे— [illegible] ॥

इति [illegible]जातिः ॥

मानभारमसहन्त्या पुरा या [illegible] ।
प्रेम[illegible] [illegible] ॥

[illegible] ॥ पक्षे— [illegible] ॥ [illegible] ॥ एवम् '[illegible]' [illegible] ॥
[illegible], पक्षे—[illegible] ॥

गमयति नक्षत्रादीनिन्द्रियार्थांश्च सर्वा-
न्दवयति हिमरश्मिं जीविताशां च सद्यः ।
नयनमपि मुहूर्तं वर्णयत्यश्रुसारं
दयितममवियोगः स्मेरपङ्केरुहाक्ष्याः ॥

गुरुनिधानरति गमयति दुर्भेदत्वात्। पक्षे—गमयत्करोति निरानन्दत्वोपभुक्तत्वात्॥ दवयति वनाग्निवत्करोति । पक्षे—दूरीकरोति । 'णाविष्ठवत्प्रातिपदिकस्य' इत्यतिदेशाद्दूर-दरशब्दयोरेकं रूपम् ॥ नेत्रं वर्णयति अश्रुपातात्। मुहूर्तं वर्णवत्करोति दुरतिक्रमत्वात् ॥

इति ध्वर्थजातिः ॥

आकुलयति कुचमुकुलं चुम्बति बिम्बाधरं दृशौ स्पृशति ।
दयिततमः किमधिगतोनहि सहचरि विभ्रमन्भ्रमरः ॥

कुचाकुलीकरणादीनां नायकधर्मत्वं स्पष्टम् । कमलकोषादिभ्रमान्मधुकरजन्यतम् ॥

परमार्थभावरम्यदृगशेषदृश्येष्वनादरं वहति ।
किं मिलिता नवयुवतिर्नहि रीतिस्त्वौपनिषदानाम् ॥

परमार्थो नारोपितो नायकनिष्ठो भावोऽनुरागः तेन रम्या दृग्यस्याः । एतेन कान्तादृष्टिरुक्ता ॥ दृश्येषु चन्द्रादिष्वनादरः तदधिकगुणवत्त्वात् ॥ औपनिषदा वेदान्तिनः । परमार्थभावः पारमार्थिकी सत्ता तेन रम्या दृक् ब्रह्म यत्र । दृश्या घटादयः पदार्थास्तत्रानादरः स्वातन्त्र्येण सत्ता विरहः । व्यावहारिकसत्ताभ्युपगमात् । अधिष्ठानभूतचित्सत्तयैवान्यत्र सत्ताप्रतीतिरित्यर्थः ॥

इत्यपह्नुतिजातिः ॥

बिन्दुमतीं लक्षयति—

बिन्दूनेव हलां स्थाने स्वरान्प्रकृतिवल्लिखेत् ।
तद्बिन्दुमदिति प्राहुरन्ये बिन्दुमतीति च ॥ ३ ॥

सहकारादिभिः शोभित इति प्रतीतिः ॥ स्मेराः सहकारा यासु तादृश्यो दिशः अभितः समन्तादिति तात्पर्यम् ॥

इति कर्तृगुप्तम् ॥

वनितासूनसमये सुभग त्वद्विनाकृता।
जहाति हन्यमानेयमनन्यजशिलीमुखैः ॥

सूनसमये वसन्ते इति प्रतीतिः। 'वसन्तः पुष्पसमयः' इत्यमरः ॥ असमये असून् प्राणान् जहातीति तात्पर्यम्। 'कुसुमेषुरनन्यजः' इत्यमरः। अनेन दशमदशाया जातप्रायत्वं वर्णितम् ॥

तारकाकुन्दमुकुलकदम्बककरम्बिताम्।
भासाजिततमालाभां तमांसि विदधुस्तमाम् ॥

विदधुस्तमाम् अत्यन्तं विदधुरिति प्रतीतिः। तमां रात्रिम् इति तात्पर्यम् ॥

इति कर्मगुप्तम् ॥

विजृम्भतेऽसौ सुरभौ कोकिलस्याशुचारुता।
मन्त्रेणाथर्वणेनेव प्रतापः पुष्पधन्वनः ॥

आशु शीघ्रं कोकिलस्य चारुतेति प्रतीतिः। अशुचा शोकरहितया उल्लासयुक्तयेति यावत्। रुता शब्देनेति तात्पर्यम् 'रु शब्दे' इत्यस्माद्भावे क्विप् ॥

यां गीतिं तव वदनात्सुतनु पिबामः सुधामधुराम्।
मघवापि न तां त्रिदिवे लभते हाहापि वशगेन ॥

'हाहा' इत्यव्ययमिति प्रतीतिः। गन्धर्वविशेषेणेति तात्पर्यम्। हाहाशब्दस्य तृतीयैकवचने तथैव रूपात् ॥

इति करणगुप्तम् ॥

मग्नापि वारवनिता मदनोदन्वत्यनन्तरायेऽसौ।
लावण्यशालिनमपि स्वात्मानमशङ्कमर्पयति ॥

'अन्तरायेण रहिते अनन्तराये' प्रति सप्तम्यन्तं 'मदनोदन्वति' इत्यस्य विशेषणमिति प्रतीतिः। अनन्तो भूयान् रा द्रव्यं यस्य सोऽनन्तराः तस्मै अनन्तराये बहुद्रव्याय पुरुषाय स्वात्मानं ददातीति तात्पर्यम् ॥

बाले निदाघमध्याह्ने ब्रध्नदीधितिदग्धया।
स्पृहा गजतया तेने महासरसयातपे ॥

'महासरसया' इति तृतीयान्तमिति प्रतीतिः। महासरसे तडागाय स्पृहा तेने इति तात्पर्यम्। 'स्पृहेरीप्सितः' इति संप्रदानसंज्ञा ॥ 'लोपः शाकल्यस्य' इति पक्षे यकारलोपाभावः ॥

इति संप्रदानगुप्तम् ॥

त्वय्यसाधारणस्नेहो देवरेणदृशो मम।
त्वं तु जायाभयप्राया नायासं तनुषे मृषा॥

'देवरेण' इति तृतीयान्तमिति प्रतीतिः। देवृशब्दस्य संबोधने 'ह्रस्वस्य गुणः' इति गुणे कृते 'देवर्' इति तात्पर्यम्। 'स्वामिनो देवृदेवरौ' इत्यमरः॥ 'एणदृशो मम' इत्य भेदान्वयः॥

त्वां प्रेक्ष्य नरसामान्यं वहति प्रणयं वधूः।
तव साधारणी तत्र वृत्तिरित्यतिकौतुकम्॥

नरसामान्यं पुरुषान्तरसाधारणमिति प्रतीतिः। 'नर्' इति मनुष्यसंबुद्धौ असाधारणप्रणयमिति तात्पर्यम्। नृशब्दस्य संबुद्धौ 'नर्' इति रूपम्॥

इत्यामन्त्रितगुप्तम्॥

अयं वहति हे तन्वि सुरभिर्मालयो मरुत्।
रोलम्बानां कदम्बेन यो भाति तमसावृतः॥

'तमसा' इति पृथक्पदम् इति प्रतीतिः॥ 'ओजःसहोम्भस्तमसस्तृतीयायाः' इति समासेऽप्यलुक्। 'तमसावृतः' इति समासे तात्पर्यम्॥

धनायावैभवं प्राप्य सखे किं बहु खिद्यसे।
मौक्तिकानि गृहे पद्मरागाभ्यामावृतानि ते॥

'अवैभवमसामर्थ्यं प्राप्य धनाय धनार्थम्' इति प्रतीतिः॥ धनाया धनेच्छा तस्या वैभवमिति तात्पर्यम्। 'अशनायोदन्यधनाया—' इति क्यजन्तादकारः प्रत्ययः।

इति समासगुप्तम्॥

स्मरतापच्छिदमिदंविम्बाधरसुधारसम्।
समिद्धं दधतो धर्मं धयन्त्यभ्यधिकं बुधाः॥

'इदम्' इति पृथक् क्लीबमिति प्रतीतिः॥अस्या विम्बाधर इदंविम्बाधर इति तात्पर्यम्॥

कमनीयं मधुसमयो मधुरतमः प्रियतमो दूरे।
मदयति हृदयं मदनः को वेद विजृम्भितानि विधेः॥

'कमनीयं रमणीयमिति क्लीबे रूपमिति प्रतीतिः॥ 'इयं कमनी कामुका' इति तात्पर्यम्। 'कमनः कामुकोऽभिकः' इत्यमरः॥

इति लिङ्गगुप्तम्॥

विभ्रमसंभवभूमिः स्पृहणीया गुणगणैरगणनीयैः।
मानिन्यमुंकारं धिनोति मदनोत्सवे दधती॥

उदाहरति—

सदाधनंजयालीकयुतो जगति गोगतिः ।
विदितासमबाणारिः पुरारिरवताद्धराम् ॥

सदा नित्यं धनंजयो वह्निर्येन तादृशेन अलीकेन युतः गोगतिः वृषवाहनत्वात् ॥ विदितः ख्यातोऽसमबाणः कामस्तस्य वैरीति शिवपक्षेऽर्थः ॥ पुरारिपदे पकारत्यागे तत्स्थाने मकारदाने च मुरारिर्विष्णुरित्यर्थः ॥ धनंजयोऽर्जुनस्तस्यालीकं मित्रं तस्मायुतः पृथग्भूतत्वात्सत्वात् 'यु मिश्रणामिश्रणयोः' इत्युक्तेः । गोगतिर्भूभारापहारकत्वात् । ख्यातोऽसमो निरुपमो बाणो दैत्यविशेषस्तस्यारिरित्यर्थः ॥

शंबरारातिविजयी वाहिनीदयितालिकः ।
वामदेवो विजयते सतारापतिलक्ष्मणः ॥

शंबराराति: कामः तस्य विजेता । वाहिनी नदी तद्दयितम् अलिकं ललाटं यस्य गङ्गालंकृतमस्तकत्वात् । तारापतिरूपेण लक्ष्मणेन चिह्नेन सहितः । इन्दुमौलित्वात् ॥ वामदेवपदे आद्यवकारत्यागे तत्स्थाने रेफदाने च रामदेवः श्रीराम इत्यर्थः ॥ शं वज्रं राति वैरिभ्यो ददाति शंवर इन्द्रस्तस्याराति: अर्थाद्रावणस्तस्य विजयी । वाहिनीदयिते समुद्रे आलिः सेतुर्यस्य । तारापतिः सुग्रीवः, लक्ष्मणः सौमित्रिस्ताभ्यां सहितः ॥ तत्रैव ककारदाने कामदेव इत्यर्थः ॥ शंबररूपस्यारातेर्विजयी तद्वधकर्तृत्वात् । वाहिनीसेनारूपा दयितानां स्त्रीणामालिर्यस्य तत्सहायेन जगद्विजेतृत्वात् । चन्द्ररूपेण लक्ष्मणेन चिह्नेन सहितः तस्य कामोद्दीपकत्वात् ॥

इति च्युतदत्ताक्षरजातिः ॥

श्रीमन्महीमहिततत्तदसीमधीम-
न्मूर्धन्यताकलितसंगतधन्यताकः ।
लक्ष्मीधरो यमुदसूत मुदं प्रसूतां
विश्वेश्वरस्य कृतिरस्य चिरस्य लोके ॥

इति श्रीमत्पदवाक्यप्रमाणपारावारपारीणविद्वद्धुरंधरश्रीविश्वेश्वरकृतौ कवीन्द्रकर्णाभरणे स्वोपज्ञव्याख्यासहिते चतुर्थः परिच्छेदः समाप्तः ॥

समाप्तोऽयं ग्रन्थः ।

---

१. 'कलन' इति पुस्तकान्तरपाठः.

आधिव्याधिवियोगात्मीयविपत्कलहदीर्घदारिद्यैः ।
जन्मानन्तरमपि यः क्लेशः किं शक्यते वक्तुम् ॥ १२ ॥

नरपशुविहंगतिर्यग्योनीनां चतुरशीतिलक्षाणाम् ।
कर्मनिबद्धो जीवः परिभ्रमन्यातना भुङ्क्ते ॥ १३ ॥

चरमस्तत्र नृदेहस्तत्राजन्मान्वयोत्पत्तिः ।
स्वकुलाचारविचारः श्रुतिप्रचारश्च तत्रापि ॥ १४ ॥

आत्मानात्मविवेको देहस्य विनाशिनाज्ञानम् ।
एवं सति स्वमायुः प्राज्ञैरपि नीयते मिथ्या ॥ १५ ॥

आयुःक्षणलवमात्रं न लभ्यते हेमकोटिभिः क्वापि ।
तच्चेद्गच्छति सर्वं मृषा ततः काधिका हानिः ॥ १६ ॥

नरदेहातिक्रमणात्प्राप्तौ पश्वादिदेहानाम् ।
स्वतनोरप्यज्ञाने परमार्थस्यात्र का वार्ता ॥ १७ ॥

सततं प्रवाह्यमानैर्वृषभैरश्वैः खरैर्गजैर्महिषैः ।
हा कष्टं क्षुत्क्षामैर्भ्रान्तैर्नो शक्यते वक्तुम् ॥ १८ ॥

रुधिरत्रिधातुमज्जामेदोमांसास्थिसंहतिर्देहः ।
स बहिस्त्वचा पिनद्धस्तस्मान्नो भक्ष्यते काकैः ॥ १९ ॥

नासाग्राद्वदनाद्वा कफं मलं पायुतो विसृजन् ।
स्वयमेवैति जुगुप्सामन्तः प्रसृतं च नो वेत्ति ॥ २० ॥

पथि पतितमस्थि दृष्ट्वा स्पर्शभयादन्यमार्गतो याति ।
नो पश्यति निजदेहं चास्थिसहस्रावृतं परितः ॥ २१ ॥

केशावधि नखराग्रादिदमन्तः पूतिगन्धसंपूर्णम् ।
बहिरपि जानंश्चन्दनकर्पूराद्यैर्विलेपयति ॥ २२ ॥

यत्नादस्य पिधत्ते स्वाभाविकदोषसंघातम् ।
औपाधिकगुणनिवहं प्रकाशयञ्श्लाघते मूढः ॥ २३ ॥

क्षतमुत्पन्नं देहे यदि न प्रक्षाल्यते त्रिदिनम् ।
तत्रोत्पतन्ति बहवः क्रिमयो दुर्गन्धिसंकीर्णाः ॥ २४ ॥

श्रवणाद्योऽप्युपाया मृषा भवेयुस्तृतीयेऽपि ॥ ३६ ॥
तस्मात्युपायस्त्वाह्वितीयपक्षोऽप्यपुत्रस्य ।
पुत्रेष्ट्यादिकयागप्रवृत्तये वेदवादोऽयम् ॥ ३७ ॥
नानाशरीरकष्टैर्धनव्ययैः साध्यते पुत्रः ।
उत्पन्नमात्रपुत्रे जीवितचिन्ता गरीयसी तस्य ॥ ३८ ॥
जीवन्नपि किं मूर्खः प्राज्ञः किं वा सुशीलभाग्भविता ।
जारश्चौरः पिशुनः पतितो द्यूतप्रियः क्रूरः ॥ ३९ ॥
पितृमातृबन्धुघाती मनसः खेदाय जायते पुत्रः ।
चिन्तयति तातनिधनं पुत्रो द्रव्याद्यधीशताहेतोः ॥ ४० ॥
सर्वगुणैरुपपन्नः पुत्रः कस्यापि कुत्रचिद्भवति ।
सोऽल्पायू रुग्णो वा ह्यनपत्यो वा तथापि खेदाय ॥ ४१ ॥
पुत्रात्सद्गतिरिति चेत्तदपि प्रायोऽस्ति युक्त्यसहम् ।
इत्थं शरीरकष्टैर्दुःखं संप्रार्थ्यते मूढैः ॥ ४२ ॥
पितृमातृबन्धुभगिनीपितृव्यजामातृमुख्यानाम् ।
मार्गस्थानामिव युतिरनेकयोनिभ्रमात्क्षणिका ॥ ४३ ॥
दैवं यावद्विपुलं यावत्प्रचुरः परोपकारश्च ।
तावत्सर्वे सुहृदो व्यत्ययतः शत्रवः सर्वे ॥ ४४ ॥
अश्नन्ति चेदनुदिनं वन्दिन इव वर्णयन्ति संतृप्ताः ।
तच्चेद्वित्रदिनान्तरमभिनिन्दन्तः प्रकुप्यन्ति ॥ ४५ ॥
दुर्भरजठरनिमित्तं समुपार्जयितुं प्रवर्तते चित्तम् ।
लक्षावधि बहुवित्तं तथाप्यलभ्यं कपर्दिकामात्रम् ॥ ४६ ॥
लब्धश्चेदधिकोऽर्थः पत्न्यादीनां भवेत्स्वार्थः ।
नृपचौरतोऽप्यनर्थस्तस्माद्द्रव्योद्यमोव्यर्थः ॥ ४७ ॥
अन्यायमर्थभाजां पश्यति भूपोऽन्वगामितां चौरः ।
पिशुनो व्यसनप्राप्तिं दायादानां गणः कलहम् ॥ ४८ ॥
पातकभैरैरनेकैरर्थं समुपार्जयन्ति राजानः ।
अश्वमतङ्गजहेतोः प्रतिक्षणं नश्यते सोऽर्थः ॥ ४९ ॥

[illegible] ।
[illegible] ॥ ५० ॥

इति [illegible] ॥ २ ॥

रमति कदाचिन्निर्जने भ्रान्तं सहृत दिशो भ्रमति ।
हृष्टं कदापि कष्टं शिष्टं दुष्टं न निन्दति स्तौति ॥ ५१ ॥
किमपि हृदि सदोषं ध्यानं आयते कदाचिदपि ।
नित्यं विशालभवनमयलक्ष्म्या तृष्णया व्याप्तम् ॥ ५२ ॥
दम्भाभिमानलोभैः कामक्रोधोरुमत्सरैश्चेतः ।
आक्रम्यते समन्ताच्छ्वभिरिव पतितास्थिवन्मार्गे ॥ ५३ ॥
तस्माच्छुद्धविरागो मनोभिलषितं त्यजेदर्थम् ।
तदनभिलषितं कुर्यान्निर्व्यापारं ततो भवति ॥ ५४ ॥

इति मनोनिन्दाप्रकरणम् ॥ ३ ॥

संसृतिपारावारे ह्यगाधविषयोदकेन संपूर्णे ।
नृशरीरमम्बुतरणं कर्मसमीरैरितस्ततश्चलति ॥ ५५ ॥
छिद्रैर्नवभिरुपेतं जीवो नौकापतिर्महानलसः ।
छिद्राणामनिरोधाज्जलपरिपूर्णं पतत्यधः सततम् ॥ ५६ ॥
छिद्राणां तु निरोधात्सुखेन पारं परं याति ।
तस्मादिन्द्रियनिग्रहमृते न कश्चित्तरत्यनृतम् ॥ ५७ ॥
पश्यति परस्य युवतिं सकाममपि तन्मनोरथं कुरुते ।
ज्ञात्वैव तदप्राप्तिं व्यर्थं मनुजोऽतिपापभाग्भवति ॥ ५८ ॥
पिशुनैः प्रकाममुदितां परस्य निन्दां शृणोति कर्णाभ्याम् ।
तेन परः किं म्रियते व्यर्थं मनुजोऽतिपापभाग्भवति ॥ ५९ ॥
अनृतं परापवादं रसना वदति प्रतिक्षणं तेन ।
परहानिर्लब्धिः का व्यर्थं मनुजोऽतिपापभाग्भवति ॥ ६० ॥
विषयेन्द्रिययोर्योगे निमेषसमयेन यत्सुखं भवति ।
विषये नष्टे दुःखं यावज्जीवं च तत्तयोर्मध्ये ॥ ६१ ॥
हेयमुपादेयं वा प्रविचार्य सुनिश्चितं तस्मात् ।
अल्पसुखस्य त्यागादनल्पदुःखं जहाति सुधीः ॥ ६२ ॥

धीवरदत्तमहामिषमश्नन्वैसारिणो म्रियते ।
तद्वद्विषयान्भुञ्जन्कालाकृष्टो नरः पतति ॥ ६३ ॥
उरगग्रस्तार्धतनुर्भेकोऽश्नातीह मक्षिकाः शतशः ।
एवं गतायुरपि सन्विषयान्समुपार्जयत्यन्धः ॥ ६४ ॥

इति विषयनिग्रहप्रकरणम् ॥ ४ ॥

स्वीयोद्गमतोयवहा सागरमुपयाति नीचमार्गेण ।
सा चेदुद्गम एव स्थिरा सती किं न याति वार्धित्वम् ॥ ६५ ॥
एवं मनः स्वहेतुं विचारयत्सुस्थिरं भवेदन्तः ।
न बहिर्वोदेति तदा किं नात्मत्वं स्वयं याति ॥ ६६ ॥
वर्षास्वम्भःप्रचयात्कूपे गुरुनिर्झरे पयः क्षारम् ।
ग्रीष्मेणैव तु शुष्के माधुर्यं भजति तत्राम्भः ॥ ६७ ॥
तद्वद्विषयोद्रिक्तं तमःप्रधानं मनः कलुषम् ।
तस्मिन्विरागशुष्के शनकैराविर्भवेत्सत्त्वम् ॥ ६८ ॥
यं विषयमभिलषित्वा धावति बाह्येन्द्रियद्वारा ।
तस्याप्राप्तौ खिद्यति तथा यथा स्वं गतं किंचित् ॥ ६९ ॥
नगनगर(दुर्ग)दुर्गमसरितः (परितः) परिभ्रमच्चेतः ।
यदि नो लभते विषयं यन्त्रितमिव खिन्नतां याति ॥ ७० ॥
तुम्बीफलं जलान्तर्बलादधः क्षिप्तमप्युपैत्यूर्ध्वम् ।
तद्वन्मनः स्वरूपे निहितं यत्नाद्बहिर्याति ॥ ७१ ॥
इह वा पूर्वभवे वा स्वकर्मणैवार्जितं फलं यद्यत् ।
शुभमशुभं वा तत्तद्भोगोऽप्यप्रार्थितो भवति ॥ ७२ ॥
चेतःपशुमशुभपथं प्रधावमानं निराकर्तुम् ।
वैराग्यमेवमुचितं गलकाष्ठं निर्मितं धात्रा ॥ ७३ ॥
निद्रावसरे यत्सुखमेतन्नहि विषयजं यस्मात् ।
नहि चेन्द्रियपदेशावस्थानं चेतसो निद्रा ॥ ७४ ॥
अन्तर्गृहस्य गृहेऽवरुद्धो यथा व्याघ्रः ।
बहुनिर्गमप्रयत्नैः श्रान्तस्तिष्ठत्यनुत्पतन्स तथा ॥ ७५ ॥

[illegible] ।
[illegible] निरुपममानन्दं सदा नास्ति ॥ ७६ ॥
[illegible] ।
[illegible] स्थैर्यं जहाति शनैः ॥ ७७ ॥

इति मनोनिग्रहप्रकरणम् ॥ ५ ॥

परगृहगृहिणीपुत्रद्रविणानामागमे विनाशे वा ।
कथितौ हर्षविषादौ किं वा स्यातां क्षणं स्थातुः ॥ ७८ ॥
दैवाल्लब्धं गतं वा यं कंचिद्विषयमीप्सितमल्पं वा ।
नो तुष्यन्न च सीदन्वीक्ष्य गृहेष्वतिथिवन्निवसेत् ॥ ७९ ॥
ममताभिमानशून्यो विषयेषु पराङ्मुखः पुरुषः ।
तिष्ठन्नपि निजसदने न बाध्यते कर्मभिः क्वापि ॥ ८० ॥
कुत्राप्यरण्यदेशे सुनीलतृणवालुकोपचिते ।
शीतलतरुतलभूमौ सुखं शयानस्य पुरुषस्य ॥ ८१ ॥
तरवः पक्वफलाढ्याः सुगन्धशीतानिलाः परितः ।
कलकूजितवरविहगाः सरितो मित्राणि किं न स्युः ॥ ८२ ॥
वैराग्यभाग्यभाजः प्रसन्नमनसो निराशस्य ।
अप्रार्थितफलभोक्तुः पुंसो जन्मनि कृतार्थतेह स्यात् ॥ ८३ ॥

द्रव्यं पल्लवतश्च्युतं यदि भवेत्क्वापि प्रमादात्तदा
शोकायाथ तदर्पितं श्रुतवते तोषाय च श्रेयसे ।
स्वातन्त्र्याद्विषयाः प्रयान्ति यदमी शोकाय ते स्युश्चिरं
संत्यक्ताः स्वयमेव ते शमसुखं निःश्रेयसं तन्वते ॥ ८४ ॥
विस्मृत्यात्मनिवासमुत्कटभवाटव्यां चिरं पर्यट-
न्संतापत्रयदीर्घदाहदहनज्वालावलीव्याकुलः ।
वल्गन्फल्गुषु सुमदाक्षिनयनश्चेतः कुरङ्गो बला-
दाशापाशवशीकृतोऽपि विषयव्याधैर्मृषा हन्यते ॥ ८५ ॥

इति वैराग्यप्रकरणम् ॥ ६ ॥

उत्पन्नेऽपि विरागे विना प्रबोधं सुखं न स्यात् ।
स भवेद्गुरूपदेशात्तस्माद्गुरुमाश्रयेत्प्रथमम् ॥ ८६ ॥

[illegible] ।
[illegible] ॥ ८७ ॥
[illegible] ।
[illegible] ॥ ८८ ॥
[illegible] ।
[illegible] ॥ ८९ ॥
[illegible] ।
[illegible] ॥ ९० ॥
[illegible] ।
[illegible] ॥ ९१ ॥
मनसो यदि वा [illegible] न जानाति ।
[illegible] ॥ ९२ ॥
[illegible]
[illegible] हि [illegible] ।
[illegible] (?) [illegible]
[illegible] ॥ ९३ ॥
तेजोंशेन पृथक्पदार्थनिवहज्ञानं हि [illegible]
तद्रन्ध्रैः कलशेन वा किमु घटो [illegible] वा ।
किं सूत्रेण न चेतदस्मि [illegible] प्रत्यक्षबाधादतो
दीपज्योतिरिहैकमेव शरणं देहे तथात्मा स्थितः ॥ ९४ ॥

[illegible] ॥ ७ ॥

चिन्मात्रः परमात्मा [illegible] आत्मानमात्मतया ।
अभवत्सोऽहंनामा तस्मादहमादिरेषो मूलम् ॥ ९५ ॥
द्वेधैव भाति तस्मात्पतिश्च पत्नी च तौ भवेतां वै ।
दलादयमाकाशस्त्रियैव पूर्यते सततम् (?) ॥ ९६ ॥
सोऽयमपीक्षां चक्रे ततो मनुष्या अजायन्त ।
इत्युपनिषदः प्राहुर्दयिता प्रति याज्ञवल्क्योक्तिम् ॥ ९७ ॥

[illegible] ।
[illegible] माया ॥ ९८ ॥
[illegible]नादिः ।
सा च [illegible] विश्वम् ॥ ९९ ॥
माया तावददृश्या दृश्यं कार्यं कथं जनयेत् ।
तन्तुभिरदृश्यमानैः पटोऽत्र दृश्यः कथं भवति ॥ १०० ॥
स्वप्ने सुरतानुभवाच्छुक्रस्रावो यथा च्युतो (?) वसने ।
अनृतेतरे प्रबोधे वसनोपहतिर्भवेत्सत्या ॥ १०१ ॥
स्वप्ने पुरुषः सत्यो योषिदसत्या तयोर्युतिश्च मृषा ।
शुक्रस्रावः सत्यस्तद्वदप्रकृतेऽपि संभवति ॥ १०२ ॥
एवमदृश्या माया तत्कार्यं जगदिदं दृश्यम् ।
माया तावदियं स्याद्या स्वानाशेन हर्षदा भवति ॥ १०३ ॥
रजनीवातिदुरन्ता न लक्ष्यतेऽत्र स्वभावोऽस्याः ।
सौदामिनीव नश्यति मुनिभिः संप्रेक्ष्यमाणैव ॥ १०४ ॥
माया ब्रह्मोपगताविद्या जीवाश्रया प्रोक्ता ।
चिदचिद्ग्रन्थिश्चैतत्तदक्षयं ज्ञेयमा मोक्षात् ॥ १०५ ॥
घटमठकुड्यैरावृतमाकाशं यत्तदाह्वयं भवति ।
तद्वदविद्यावृतमिह चैतन्यं जीव इत्युक्तः ॥ १०६ ॥
ननु कथमावरणं स्यादज्ञानं ब्रह्मणो विशुद्धस्य ।
सूर्यस्येव तमिस्रं रात्रिभवं स्वप्रकाशस्य ॥ १०७ ॥
दिनकरकिरणोत्पन्नैर्मेघैराच्छाद्यते यथा सूर्यः ।
न खलु दिनस्य दिनत्वं····विकृतं सान्द्रसंघातैः ॥ १०८ ॥
अज्ञानेन तथात्मा शुद्धोऽपि च्छाद्यते सुचिरम् ।
न परंतु लोकसिद्धा प्राणिषु तच्चेतनाशक्तिः ॥ १०९ ॥

इति मायासिद्धिप्रकरणम् ॥ ८ ॥

स्थूलशरीरस्यान्तर्लिङ्गशरीरं च तस्यान्तः ।
करणमस्याप्यन्तस्ततो महाकारणं तुर्यम् ॥ ११० ॥

स्थूलं निरूपितं प्रागधुना सूक्ष्मादितो ब्रूमः
अङ्गुष्ठमात्रपुरुषः श्रुतिरिति यत्प्राह तत्सूक्ष्मम् ॥ १११ ॥
सूक्ष्माणि महाभूतान्यसवः पञ्चेन्द्रियाणि पञ्चैव ।
षोडशमन्तःकरणं तत्संघातो हि लिङ्गतनुः ॥ ११२ ॥
तत्कारणं स्मृतं यत्तस्यान्तर्वासनाजालम् ।
तस्य प्रवृत्तिहेतुर्बुद्ध्याश्रयमत्र तुर्यं स्यात् ॥ ११३ ॥
तत्सारभूतबुद्धौ यत्प्रतिफलितं तु शुद्धचैतन्यम् ।
जीवः स उक्त आर्यैर्योऽहमिति स्फूर्तिकृद्वपुषि ॥ ११४ ॥
चरतरतरङ्गसङ्गात्प्रतिबिम्बं भास्करस्य च चलं स्यात् ।
अस्ति तथा चञ्चलता चैतन्ये चित्तचाञ्चल्यात् ॥ ११५ ॥
नन्वर्कप्रतिबिम्बः सलिलादिषु यः स चावभासयति ।
किमितरपदार्थनिवहं प्रतिबिम्बोऽप्यात्मनस्तद्वत् ॥ ११६ ॥
प्रतिफलितं यत्तेजः सवितुः कांस्यादिपात्रेषु ।
तदनु प्रविष्टमन्तर्गृहमन्यार्थान्प्रकाशयति ॥ ११७ ॥
चित्प्रतिबिम्बस्तद्वद्बुद्धिषु यो जीवतां प्राप्तः ।
नेत्रादीन्द्रियमार्गैर्बहिरर्थान्सोऽवभासयति ॥ ११८ ॥

इति लिङ्गदेहादिनिरूपणप्रकरणम् ॥ ९ ॥

तदिदं य एवमार्यो वेद ब्रह्माहमस्मीति ।
स इदं सर्वं च स्यात्तस्य च देवाश्च नेशते भूत्या ॥ ११९ ॥
येषां स भवत्यात्मा योन्यामथ देवतामुपास्ते यः ।
अहमन्योऽसावन्यश्चेत्थं यो वेद पशुवत्सः ॥ १२० ॥
इत्युपनिषदामुक्तिस्तथा श्रुतिर्भगवदुक्तिश्च ।
ज्ञानी त्वात्मैवेयं मतिर्ममेत्यत्र युक्तिरपि ॥ १२१ ॥
ऋजु वक्रं वा काष्ठं हुताशदग्धं सदग्नितां याति ।
तत्किं [illegible]मग्राह्यं ऋजुवक्राकारसत्त्वेऽपि ॥ १२२ ॥
पीक्ष
एवं [illegible]त्मनिष्ठो ह्यात्माकारश्च जायते पुरुषः ।
देहीव दृश्यतेऽसौ परं त्वसौ केवलो ह्यात्मा ॥ १२३ ॥

प्रतिफलति भानुरेकोऽनेकशरावोदकेषु यथा ।
तद्वत्परमात्मा ह्येकोऽनेकेषु देहेषु ॥ १२४ ॥
दैवाच्छरावभङ्गे किं वा विलीयते सूर्यः ।
प्रतिबिम्बचलत्वादर्कः किं चञ्चलो भवति ॥ १२५ ॥
जलाधारे कुम्भे यथैकसवितुः प्रकाशेन ।
तद्वच्चराचरभिन्नेकात्मनस्तथा चलति ॥ १२६ ॥
येनोदकेन कदलीचम्पकजात्यादयः प्रवर्धन्ते ।
मूलकपलाण्डुलशुनास्तेनैवैते विभिन्नरसगन्धाः ॥ १२७ ॥
एको हि सूत्रधारः काष्ठप्रकृतीरनेकशो युगपत् ।
स्तम्भाग्रपट्टिकायां नर्तयतीह प्रगूढतया ॥ १२८ ॥
गुडखण्डशर्कराद्या भिन्नाः स्युर्विकृतयो यथैकेक्षोः ।
केयूरकङ्कणाद्या यथैकहेम्नो भिदाश्च पृथक् ॥ १२९ ॥
एवं पृथक्स्वभावं पृथगाकारं पृथग्वृत्ति ।
जगदुच्चावचमुच्चैरेकेनैवात्मना चलति ॥ १३० ॥
स्कन्धधृतसिद्धमन्नं यावन्नाश्नाति मार्गगस्तावत् ।
स्पर्शभयात्क्षुत्पीडे तस्मिन्भुक्ते न ते भवतः ॥ १३१ ॥
मानुषमतङ्गमहिषश्वसूकरादिष्वनुस्यूतम् ।
यः पश्यति जगदीशं स एव भुङ्क्तेऽद्वयानन्दम् ॥ १३२ ॥

इत्यद्वैतप्रकरणम् ॥ १० ॥

यद्वत्सूर्येऽभ्युदिते स्वव्यवहारं जनः कुरुते ।
तं न करोति विवस्वान्न कारयति तद्वदात्मापि ॥ १३३ ॥
लोहे हुतभुग्व्याप्ते लोहान्तरताड्यमानेऽपि ।
तस्यान्तर्गतवह्नेः किं स्यान्निर्घातजं दुःखम् ॥ १३४ ॥
निष्ठुरकुठारघातैः काष्ठे संछेद्यमानेऽपि ।
अन्तर्वर्ती वह्निः किं घातैश्छेद्यते तद्वत् ॥ १३५ ॥
तनुसंबन्धाज्जातैः सुखदुःखैर्लिप्यते नात्मा ।
ब्रूते श्रुतिरप्युभयोरश्नन्नन्योऽभिचाकशीत्यादि ॥ १३६ ॥

स्थूलं निरूपितं प्रागधुना सूक्ष्मादिको ब्रूमः
अङ्गुष्ठमात्रपुरुषः श्रुतिरिति यस्मात् तत्सूक्ष्मम् ॥ १११ ॥
सूक्ष्माणि महाभूतान्यसवः पञ्चेन्द्रियाणि पञ्चैव ।
षोडशमन्तःकरणं तत्संघातो हि लिङ्गतनुः ॥ ११२ ॥
तत्कारणं स्मृतं यदसान्तर्वासनाजालम् ।
तस्य प्रवृत्तिहेतुर्बुद्ध्याश्रयमत्र तुर्यं स्यात् ॥ ११३ ॥
तत्सारभूतबुद्धौ यत्प्रतिफलितं तु शुद्धचैतन्यम् ।
जीवः स उक्त आद्ययोऽहमिति स्फूर्तिकृद्वपुषि ॥ ११४ ॥
चरतरतरङ्गसङ्गात्प्रतिबिम्बं भास्करस्य च चलं स्यात् ।
अस्ति तथा चञ्चलता चैतन्ये चित्तचाञ्चल्यात् ॥ ११५ ॥
नन्वर्कप्रतिबिम्बः सलिलादिषु यः स चावभासयति ।
किमितरपदार्थनिवहं प्रतिबिम्बोऽप्यात्मनस्तद्वत् ॥ ११६ ॥
प्रतिफलितं यत्तेजः सवितुः कांस्यादिपात्रेषु ।
तदनु प्रविष्टमन्तर्गृहमन्यार्थान्प्रकाशयति ॥ ११७ ॥
चित्प्रतिबिम्बस्तद्वद्बुद्धिषु यो जीवतां प्राप्तः ।
नेत्रादीन्द्रियमार्गैर्बहिरर्थान्सोऽवभासयति ॥ ११८ ॥

इति लिङ्गदेहादिनिरूपणप्रकरणम् ॥ ९ ॥

तदिदं य एवमार्यो वेद ब्रह्माहमस्मीति ।
स इदं सर्वं च स्यात्तस्य च देवाश्च नेशते भूत्या ॥ ११९ ॥
येषां स भवत्यात्मा योऽन्यामथ देवतामुपास्ते यः ।
अहमन्योऽसावन्यश्चेत्थं यो वेद पशुवत्सः ॥ १२० ॥
इत्युपनिषदामुक्तिस्तथा श्रुतिर्भगवदुक्तिश्च ।
ज्ञानी त्वात्मैवेयं मतिर्ममेत्यत्र युक्तिरपि ॥ १२१ ॥
ऋजु वक्रं वा काष्ठं हुताशदग्धं सदग्नितां याति ।
तत्किं हस्तग्राह्यं ऋजुवक्राकारसत्त्वेऽपि ॥ १२२ ॥
एवं [illegible]त्मनिष्ठो ह्यात्माकारश्च जायते पुरुषः ।
देहीव दृश्यतेऽसौ परं त्वसौ केवलो ह्यात्मा ॥ १२३ ॥

परमानन्दानुभवात्सुचिरं नादानुसंधानात् ।
योगिभिरुक्तो लयोऽयं सत्स्वन्यलयेष्वनेकेषु ॥ १४९ ॥

इति नादानुसंधानप्रकरणम् ॥ १३ ॥

संसारतापमासं नानायोनिभ्रमात्परिश्रान्तम् ।
लब्ध्वा परमानन्दं न चलति चेतः कदा कापि ॥ १५० ॥
अद्वैतानन्दभरात्किमिदं कोऽहं च कस्याहम् ।
इति मन्थरतां यातं यदा तदा मूर्छितं चेतः ॥ १५१ ॥
चिरतरमात्मानुभवादात्माकारं प्रजायते चेतः ।
सरिदिव सागरयाता समुद्रभावं प्रयात्युच्चैः ॥ १५२ ॥
आत्मन्यनुप्रविष्टं चित्तं नापेक्षते पुनर्विषयान् ।
क्षीरादुद्धृतमाज्यं यथा पुनः क्षीरतां न यातीह ॥ १५३ ॥
दृष्टौ द्रष्टरि दृश्ये यदनुस्यूतं च भानमात्रं स्यात् ।
तत्रोपक्षीणं चेच्चित्तं तन्मूर्छितं भवति ॥ १५४ ॥
याति स्वसंमुखत्वं दृङ्मात्रं वा यदा तदा भवति ।
दृश्ये द्रष्टृविभेदो ह्यसंमुखेऽस्मिन्न तद्भवति ॥ १५५ ॥
एकस्मिन्दृङ्मात्रे तत्तद्दृश्यादिकं हि समुदेति ।
लीनं दृङ्मात्रमपि ह्येकात्मत्वं च शिष्यते पश्चात् ॥ १५६ ॥
दर्पणतः प्राक्पश्चादस्ति मुखं प्रतिमुखं तदाभाति ।
आदर्शेऽपि च नष्टे मुखमस्ति मुखे तथैवात्मा ॥ १५७ ॥

इति मनोलयप्रकरणम् ॥ १४ ॥

माधुर्यं गुडपिण्डे यत्तस्यांशेऽणुमात्रेऽपि ।
एवं न पृथग्भावो गुडत्वमधुरत्वयोरस्ति ॥ १५८ ॥
अथवा न भिन्नभावः कर्पूरामोदयोरेवम् ।
आत्मस्वरूपमननात्पुंसा जगदात्मतां याति ॥ १५९ ॥
यद्भावानुगतः स्यान्निद्रादौ जागरस्यान्ते ।
अन्तः स चेत्स्थिरः स्याल्लभते हि तदाद्वयानन्दम् ॥ १६० ॥

अतिगम्भीरेऽपारे ज्ञानविज्ञानसागरे स्फारे ।
कर्मगभीरगतना जीवनरत्नावलिः स्फुरति ॥ १६१ ॥
सत्सङ्गकरैः पतितेऽभ्युदिते नैवान्तस्तिमिरौघे ।
स्फुरति पुरैव समन्तादनेकविधजीवमृगतृष्णा ॥ १६२ ॥
अन्तर्हृदये भक्तिर्जगदिदमाराग्यपरिस्फुरति ।
हृदि भक्तिस्फुरणे निर्गीयते काव्यलक्षणम् ॥ १६३ ॥
स्थूला सूक्ष्मा नेति द्वेधा हरिभक्तिरुद्दिष्टा ।
प्रारम्भे स्थूला स्यात्सूक्ष्मा तस्याः सकाशाच्च ॥ १६४ ॥
साधनधर्माचरणं कृष्णप्रतिमार्जनोत्सवो नित्यम् ।
विविधोपचारकरणैर्हरिदासैः संगमः शश्वत् ॥ १६५ ॥
कृष्णकथासंश्रवणे महोत्सवः सत्यवादित्वम् ।
परयुवतौ द्रविणे वा परापवादे पराङ्मुखता ॥ १६६ ॥
ग्राम्यकथासूद्वेगः सुतीर्थगमनेषु तात्पर्यम् ।
यदुपतिकथावियोगे व्यर्थं गतमायुरिति चिन्ता ॥ १६७ ॥
एवं कुर्वति भक्तिं कृष्णकथानुग्रहोत्पन्ना ।
समुदेति सूक्ष्मभक्तिर्यस्या हरिरन्तराविशति ॥ १६८ ॥
स्मृतिसत्पुराणवाक्यैर्यथाश्रुतायां हरेर्मूर्तौ ।
मानसपूजाभ्यासो विजननिवासेऽपि तात्पर्यम् ॥ १६९ ॥
सत्यं समस्तजन्तुषु कृष्णस्यावस्थितेर्ज्ञानम् ।
अद्रोहो भूतगणे ततस्तु भूतानुकम्पा स्यात् ॥ १७० ॥
प्रमितयदृच्छालाभे संतुष्टिर्दारपुत्रादौ ।
ममताशून्यत्वमतो निरहंकारत्वमक्रोधः ॥ १७१ ॥
मृदुभाषिता प्रसादो निजनिन्दायां स्तुतौ समता ।
सुखदुःखशीतलोष्णद्वन्द्वसहिष्णुत्वमापदो न भयम् ॥ १७२ ॥
निद्राहारविहारेष्वनादरः सङ्गराहित्यम् ।
वचने चानवकाशः कृष्णस्मरणेन शाश्वती शान्तिः ॥ १७३ ॥

केनापि गीतमाने हरिगीते वेणुनादे वा ।
आनन्दाविर्भावाद्युगपत्स्यादष्टसात्त्विकोद्रेकः ॥ १७४ ॥
तस्मिन्ननुभवति मनः प्रगृह्यमाणं परात्मसुखम् ।
स्थिरतां याते तस्मिन्याति मदोन्मत्तदन्तिदशाम् ॥ १७५ ॥
जन्तुषु भगवद्भावं भगवति भूतानि पश्यति क्रमशः ।
एतादृशी दया चेत्तदैव ह'''' सर्वशस्यः स्यात् ॥ १७६ ॥

इति द्विधाभक्तिनिरूपणप्रकरणम् ॥ १५ ॥

यमुनातटनिकटस्थितवृन्दावनकानने महारम्ये ।
कल्पद्रुमतलभूमौ चरणं चरणोपरि स्थाप्य ॥ १७७ ॥
तिष्ठन्तं घननीलं स्वतेजसा भासयन्तमिह विश्वम् ।
पीताम्बरपरिधानं चन्दनकर्पूरलिप्तसर्वाङ्गम् ॥ १७८ ॥
आकर्णपूर्णनेत्रं कुण्डलयुगमण्डितश्रवणम् ।
मन्दस्मितमुखकमलं सुकौस्तुभोदारमणिहारम् ॥ १७९ ॥
वलयाङ्गुलीयकाद्यानुज्ज्वलयन्तं स्वलंकारान् ।
गलविलुलितवनमालं स्वतोरड(?) न्यस्तकलिकालम् ॥ १८० ॥
गुञ्जारवालिकलितं गुञ्जापुञ्जान्विते शिरसि ।
भुञ्जानं सह गोपैः कुञ्जान्तरवर्तिनं हरिं स्मरत ॥ १८१ ॥
मन्दारपुष्पवासितमन्दानिलसेवितं परानन्दम् ।
मन्दाकिनीयुतपदं नमत महानन्ददं महापुरुषम् ॥ १८२ ॥
सुरभीकृतदिग्वलयं सुरभिशतैरावृतं सदा परितः ।
सुरभीतिक्षपणमहासुरभीमं यादवं नमत ॥ १८३ ॥
कंदर्पकोटिसुभगं वाञ्छितफलदं दयावन्तम् ।
त्यक्त्वा कमन्यविषयं नेत्रयुगं द्रष्टुमुत्सहते ॥ १८४ ॥
[illegible]निपुणां मनोभिरामां हरेः कथां त्यक्त्वा ।
[illegible] ग्राम्यकथामादरं वहति ॥ १८५ ॥
[illegible] च विषयेषु कृष्णविषयेषु ।
[illegible] यदन्यविषयेषु ॥ १८६ ॥

[illegible]प्रकरणम् ॥ १६ ॥

यशोदयापयोधरामृतेन विश्वपालको
यशोदयापयोधरामृतेन सोऽपि पालितः।

....

सतामबन्धनोचितः सदामबन्धनो हरिः ॥ १८७ ॥

यः शेषतूलिकायां मासंवाहितपदो हि निद्राति।
शेते स परिश्रान्तस्तरुमूले कम्बले गतः शिशुताम् ॥ १८८ ॥

शिरसि वहन्ति यदाज्ञाशेषां ब्रह्मादयोऽपि सुरपालाः।
आज्ञापितः स गोपैः समानयति गास्त्विदं महच्चित्रम् ॥ १८९ ॥

धन्या गोपकुमार्यस्तत्सदृशं नास्ति भाग्यमपि लक्ष्म्याः।
याः श्रीकृष्णेन समं व्यहरन्रासे विसृज्य तां लज्जाम् ॥ १९० ॥

चित्रं यः स्वजनानां परितुष्टः सन्ददाति साम्राज्यम्।
गच्छन्पथि कुब्जायै चन्दनमभियाचते स रङ्क इव ॥ १९१ ॥

मुनयस्त्वभ्यासरता यतन्ति यत्प्राप्तये मनोयुक्त्या।
अनुतिष्ठति स्म यत्नं स राधिकायाः प्रसादसिद्ध्यर्थम् ॥ १९२ ॥

संवर्णयन्ति निगमाः सहस्रपादेति यं पुरुषसूक्ते।
भित्त्यवलम्बं कृत्वा स करोति शनैः शनैः क्रमणम् ॥ १९३ ॥

निवसन्ति यस्य रोम्णि ब्रह्मकटाहा यथावकाशेन।
चित्रं स हरिः शेते पञ्चवितस्तिप्रमाणिकान्दोले ॥ १९४ ॥

नेच्छति यः स्वामित्वं क्वचिदपि विजितात्मनामपि मुनीनाम्।
चित्रं कुरुते दास्यं स एव घोषेषु पुंश्चलीस्त्रीणाम् ॥ १९५ ॥

क्षीरोद्भवकौस्तुभमपि लब्ध्वा यो नाभवद्धृष्टः।
गोपालबालदत्तैर्गुञ्जाभरणैश्च मोदयुक्तः सः ॥ १९६ ॥

यस्य तु नामोच्चारात्कालोऽपि हि बाधते न भक्तजनान्।
जनदृग्भीत्या जननी तस्य कपोले ह्यदान्मषीतिलकम् ॥ १९७ ॥

चित्रं पुरा सुरान्यः स्वकरेणापाययत्सुधां दिव्याम्।
क्षुधितः स मातुरङ्के स्तन्यार्थं रोदनं स्वयं कुरुते ॥ १९८ ॥

सन्त्रापि फल्गु पुरतः को विश्वासं करोति मह्यक्ये ।
पृत्वा स्वगात्रचेलं कुचार्थं रौति केवलं जग ॥ १९९ ॥

इति प्रबोधसुधाकरः ।

काश्मीरकमहाकविश्रीजह्लणप्रणीतो

मुग्धोपदेशः ।

पीयूषाभिनिवेश एष रभसादस्माकमद्यानया
बन्धूकद्युतिबान्धवाधररसस्यन्देन मन्दीकृतः ।
इत्थं दैत्यचयः समुद्रमथने येन क्षणाद्वञ्चित-
स्तस्मै सादरमोंनमोऽस्तु कपटस्त्रीरूपिणे विष्णवे ॥ १ ॥

हारिद्रद्रवसोदराय रसनामंडो (मात्रो)परिस्थायिने
सत्यादन्यतमाय वित्तहरणप्रत्यक्षचौराय च ।
चित्रं दुर्भगरूपवर्णनमहापाण्डित्यविधाय ते
व्याजानां प्रथमाय गर्भगणिकारागाय तुभ्यं नमः ॥ २ ॥

ध्यानं यत्परमेश्वरं प्रति सदा यद्वीतरागं मनो
यत्कर्मातिकठोरघोरगहनं भूत्यै यदत्यादरः ।
आश्चर्यं च शरीरदानमपि यत्कार्यं विकारं विना
तद्वेश्यैव तपस्विनी कलियुगे लोकोऽपि तद्भावितः ॥ ३ ॥

श्रीमन्तं शिरसा बिभर्ति कुरुते विश्वभ्रमं हेलया
धत्ते पाटक(?)पक्षपातमनिशं नैवामिषैस्तृप्यति ।
रक्तं पातुमपीहते च सकलं तार्क्ष्यस्य मूर्तिर्यथा
वेश्या किं तु भुजंगभक्षणविधौ नाद्यापि विश्राम्यति ॥ ४ ॥

शौर्यस्यातिनिकर्षणं पिशुनितोमानस्य दुःशीलता
सौन्दर्यस्य शकुन्तलेक्षणकला ज्ञानस्य गर्वितः ।
ऐश्वर्यस्य निकारता गुरुजना विनाशकर्मीण न
मानाभिभवनर्मणश्च गणिका सर्वाभिमा दूषणम् ॥ १८ ॥
लाभाभिभूतैः राज्ञैः सुजनता मानोन्नति मान्यता
कार्पण्येन यशांसि पूर्वकलया मैत्री सुखं सेवया ।
धर्मं प्राणिवधेन वाञ्छति धनं शून्यप्रादेन यो
वेश्याभिश्च विलासमात्मनि नराकारोऽपि गौरेव सः ॥ १९ ॥
नान्यो मूर्खसमो न सेवकसमो दुःखी न यक्ष्मोपमो
व्याधिर्नाभिरसस्सुतप्रतिनिधिर्लाभो न मृत्योः समः ।
कष्टं नान्यसमानमिन्द्रियसमो नारिः परस्त्रीरमं
नैनायुष्यमवश्यमन्यमथ नो वेश्यासमं दृश्यते ॥ २० ॥
किं काकोऽपि विहंगमो मरुरपि स्थानं करीरोऽपि किं
शाखी राहुरपि ग्रहः स न भवेदुष्ट्रोऽपि किं वाहनम् ।
किं काचोऽपि मणिर्भृंगोऽपि करटिः प्रेष्योऽपि वा मानुषः
किं वेश्यापि विलासिनी स च तदासक्तोऽपि किं कामुकः॥२१॥
किं तत्कर्म यदस्तशर्म रसना किं सा न (च) यारुन्तुदा
किं तत्प्रेम यदस्थिरं स च पुमान्किं नाम यो निर्गुणः।
सा किं श्रीरुपभोगमर्हति न या सेव्यः स किं योऽन्तरं
नो जानाति तदस्ति किं विलसितं वेश्यासु यत्कृत्रिमम्॥२२॥
दूरे तानि धनानि येषु मलनं मानस्य संजायते
वन्धुः सोऽस्तु सुखी मुखे मधुमयो योऽन्तश्च मायामयः ।
ते भोगाः प्रलयं प्रयान्तु कथमप्यौचित्यभङ्गेन ये
यायातुर्निधनं (?) वरं निधुवनं वेश्यासु मूल्येन यत् ॥ २३ ॥
अस्थानाभिनिवेशिता रतिपतेरौचित्यभङ्गो रते-
र्वैयर्थ्यं नवयौवनस्य किमपि प्रेम्णः कलङ्काङ्कुरः ।

१. पुरुषाकारो वृषभः. २. 'नातःपरमनायुष्यं परदाराभिमर्षणात्' इति मार्कण्डेयपुराणे स्वपुत्रं प्रति मदालसाया उपदेशः. ३. चतुर्विधासु हस्तिजातिष्वेका जातिः.

सौभाग्यस्य विमानना विगुणता सौन्दर्यसारश्रियः
शृङ्गारस्य विडम्बना किमपरं वेश्यारताडम्बरः ॥ २४ ॥

क्रुद्धो यस्य मनोभवस्तरुणिमा येनात्मनो वञ्चित-
स्तैस्तैर्यश्च कटाक्षितः परिभवैः साक्षादलक्ष्मीमुखैः ।
युक्तायुक्तविचारणापरिहृतः कामं स कामी क्रिमिः
पण्यस्त्रीषु नितम्बनामनि महानिम्ने रतिं विन्दति ॥ २५ ॥

शापः कोऽपि महानयं परिणतिर्दुष्कर्मणामीदृशी
दौर्जन्यं परमं विधेरिदमियं साक्षादलक्ष्मीः स्थिरा ।
सौहार्दस्य च विभ्रमस्य च रतेर्भर्तुश्च यूनां तथा
यत्संत्यज्य कुलाङ्गनां बहुमुखो दासीजनः सेव्यते ॥ २६ ॥

संपर्कोऽप्यतिकर्कशः परिचयाभासोऽप्यसंपत्करो
दृक्पातोऽप्यवसादसूरपि सकृत्संभाषणं दूषणम् ।
छायापि च्छलनात्मिका परिमलोद्गारोऽपि हालाहलं
वेश्यानां विषयेषु किं पुनरहो सक्तिर्महासाहसम् ॥ २७ ॥

द्रोहो यस्य पिता कलाः किल चतुःषष्टिस्तथा मातरः
प्राणाः सर्वमलीकमर्थहरणं नाम प्रधानव्रतम् ।
विक्रेयं निजमङ्गमङ्गमपि चानङ्गः सहायः स्वयं
तस्यानर्थशतात्मकस्य गणिकाव्याधेः किमस्त्यौषधम् ॥ २८ ॥

गृध्री निर्भरमामिषेषु सरघा घोरा मधूनां भरे
व्याघ्री तीक्ष्णनखक्षतेषु भुजगी दंशप्रकारेषु च ।
उत्तानेषु विवर्तनेषु शफरी वित्तच्छले मूषिका
वेश्या कामुकवञ्चनाय भुवने रूपैरनेकैः स्थिता ॥ २९ ॥

साम्राज्यं मधुमांसमत्स्यगिलनं मन्त्री जरत्कुट्टनी
दण्ड्यः सोऽर्धकिराटमनुरधनाः शृङ्गारिणः किंकराः ।
आचारो बहुगालिदानमधमो मित्रं धनं जीवितं
वेश्यानां पुरचार..................ध भग्नः प्रियः ॥ ३० ॥

१. दर्पेनेत्युक्तादिनावृतैः समुद्[illegible] धनवान्. [illegible]

रागीति प्रतिपत्तिमूर्विट इति प्राप्तोऽतिवन्द्यं पदं
श्लाघार्हो व्यसनीतिहीनकुल इत्यग्र्यः कुटुम्बः स्वयम्।
मान्यः प्राहत(?) इत्यहो कितव इत्याप्तश्च किं वाधिकं
सर्वावस्थ इति प्रमाणपुरुषो वेश्याभिरभ्यर्च्यते ॥ ३१ ॥
मांस्पाकोत्कटमद्यगन्धि विहरच्चेटीनटीसंकुलं
यद्वेश्यायतनं भुजंग परया भक्त्या पुरः पश्यसि।
अत्रास्ते गृहदेवता विदधती दिग्घट्टनं कुट्टनी
यस्याः प्रत्यहमाढ्यकामुकपशुव्रातोपहारैर्बलिः ॥ ३२ ॥
प्रत्यङ्गार्पणचारुचाटुकरणप्रेमोचितप्रार्थना
श्रीवातायनदर्शनादि (?) गणिकालोकस्य धर्मः परः।
कुट्टन्याः पुनरुत्कटोत्कटमिदं तत्रास्त्यगस्त्यव्रतं
यत्प्राणाहुतिरेककैव सकलै रत्नाकरैः कामिभिः ॥ ३३ ॥
कंदर्पप्रतिभूनिवेशितवलीरेखावलीशोभिते
लीलोदञ्चितबाहुपाशयुगलापातैश्च भोः कामुकाः।
वेश्यानां विपुले नितम्बफलके शारैः कटाक्षैरितो
यद्वः क्रीडितमत्र दास्यति पुरो दारिद्र्यमेवोत्तरम् ॥ ३४ ॥
शूलेनाद्य मृताहमद्य सरजाः कर्तव्यमद्य व्रतं
त्यागी नास्ति ततोऽधिकोऽपर इति श्लाघा विपक्षस्य च।
कंचिन्नोत्सहते स राजतनयो जानाति माता ममे-
त्येवं मुग्धभुजंग रूक्षगणिकावाचोऽचिराच्छ्रोष्यसि ॥ ३५ ॥
मालिन्यं प्रकटीकरोति निबिडं नैर्गुण्यमातन्वते(ती)
जीर्णस्नेहपरम्परा विदधते पात्रेऽप्यहो दूषणम्।
वेश्या दीपशिखेव भाति रजनौ रूपभ्रमान्धीकृतो
यत्रायं कुरुते पतङ्गपतनं हाहा भुजंगव्रजः ॥ ३६ ॥
केशाकर्षणकर्मणि व्यवसिता वीर्यं हरन्ती परं
ग्लानिं कामपि तन्वती स्मितमुखी लग्ना च कर्णान्तिके।

१. एतदपि पद्यं सुभाषितावलावस्ति.

उत्कम्पं गतिविभ्रमं विदधती यूनां शनैर्निन्दिना
तारुण्यस्य जनापवाद......वेश्या च संदृश्यते ॥ ३७ ॥

योऽयं निर्दयदन्तखण्डनकरो बुद्धिप्रयोगैर्हठा-
त्सीत्कारो भुजयन्त्रपीडनविधिः सोल्लासमुत्पादितः ।
तेनेक्षोरिव कामुकस्य सरसस्यादाय सारं परं
वेश्याभिः क्रियते बहिर्यदि परं निष्कासनं शल्कवत् ॥ ३८ ॥

वाग्भिर्भर्त्सनमंशुकादिहरणं संताडनं मुष्टिभिः
किं चान्यद्विपरीतदर्शनमधःकारोऽथ पादाहतिः ।
इत्यादि प्रथमं यदेव सुरतप्रौढोपचारक्रमे
वेश्या पश्यत तत्तदेव कुरुते निर्वासने कामिनाम् ॥ ३९ ॥

यद्भूयः परिचुम्बनं यदसकृत्सर्वाङ्गमालिङ्गनं
यत्पर्युत्सुकमीक्षितं सरभसं यच्चाटुकोत्कट्ट(त्कीर्तः)नम् ।
यत्सद्भावकथानकं रहसि यत्तत्किंचिदभ्यर्थनं
वेश्यानां विषवत्तदेव निपुणं चिन्त्यं सदा कामुकैः ॥ ४० ॥

विव्वोके वकचेष्टितं बहुविधभ्रूविभ्रमेषु भ्रमं
कौटिल्यं नखरक्षतेषु सुरतोपायेषु मायां स्वयम् ।
सीत्कारान्तरसत्यमर्थहरणं सर्वत्र ये जानते
वेश्यानां परमं रहस्यमवनौ ते केऽपि मेधाविनः ॥ ४१ ॥

किंचित्प्राहु(घु)णकागमेन किमपि प्रस्तारविस्तारव-
द्यात्राचैत्रतिथिक्रमैः किमपि च क्रोधप्रसादोदयैः ।
किंचित्काञ्चनरत्नवस्त्रविषयैर्नानाविधैर्दोहदै-
र्द्वाराण्यर्थविनिर्गमस्य गणिकाः कुर्वन्ति शृङ्गारिणाम् ॥ ४२ ॥

अर्थोष्मा पितृलालनं विटघटामेलः प्रियंमन्यता
तारुण्यं नगरे स्थितिस्तरलता धीः कामशास्त्रं प्रति ।
संगीतं रजनी विधुर्मधुमदः स्पर्धा सपत्नैस्तथा
वेश्यानामनुरक्तवित्तहरणे कुर्वन्ति साहायकम् ॥ ४३ ॥

वैदग्धीमवधीरय व्यवहितं कार्यं कलाकौशलं
सौजन्येन गतं किमन्यदफलो राशिर्गुणानामपि ।
यस्मान्न प्रणयेन न प्रणतिभिः प्रेम्णा न न प्रीणनै-
र्न प्राणैरपि ते भुजंग गणिका वित्तं विना तुष्यति ॥ ४४ ॥
दासी नाथ तवाहमेव विभवः सर्वस्त्वदीयः स्थितो
मा मां निर्दय मुञ्च शून्यमखिलं मन्ये जगत्त्वां विना ।
इत्युक्त्वा सहसा भुजंगपुरतो यद्वेश्यया रुद्यते
भुक्तोच्छिष्टदरिद्रकामिविभवास्ते केवलं तद्विदुः ॥ ४५ ॥
स्वप्ने कामपि संस्मरन्प्रिय मया दृष्टोऽसि तत्ते बला-
देवं मां प्रति सांप्रतं किमुचिता निष्कारणं वञ्चना ।
तज्जागर्मि वरं निशासु यदसौ निद्रापि मे द्रोहिणी-
त्यालापैर्गणिकागणेन न च को विश्वास्यते कामुकः ॥ ४६ ॥
भ्रूभङ्गैरतिभङ्गुरैः कुटिलितप्रान्तैस्तथा कुन्तलैः
सोपेक्षैरिव चक्षुषोः सरलितापाङ्गैश्च भङ्ग्यन्तरैः ।
आत्मीयां चलचित्तवृत्तिरचनां वेश्या वराकी सदा
यूनां दर्शयतीव ते यदि परं मूढा न तज्जानते ॥ ४७ ॥
वक्रोक्त्या प्रथमं निरादरतया पश्चात्ततः केनचि-
द्दातव्यं बहु तत्र यामि भवतां(ताद्) भूयोऽपि नौ संगमः ।
इत्युक्तोऽपि न बुध्यते खलु यदा रागी दरिद्रो जड-
श्चेटीभिर्बहुभाषितैरपि तदा हस्तार्गलैर्वार्यते ॥ ४८ ॥
भूयः कालवशात्तमर्जितधनं दृष्ट्वाथ मद्वल्लभः
स क्रुद्धो गमितस्त्वयेति कलहो मात्रा समं जायते ।
कृत्वा तं प्रति च व्रतादि विरहं स्वं नाटयित्वा तत-
स्तस्मिन्मित्रमुखेन संधिरपरो वेश्याभिरुत्पाद्यते ॥ ४९ ॥
प्रौढ प्राणद कान्त नाथ सुभगोदार प्रिय त्वां विना
किं वित्तेन गृहेण किं किमसुभिर्ह्योऽपीति यो भाषितः ।

१. पूर्वदिनेऽपि.

तत्रैवाद्य निराश दुर्भग पशो निर्लज्ज गच्छाधुना
   भिक्तत्वां निर्धनचक्रगिल्लपवदन्क्रीतो न वेश्याजनः ॥ ५० ॥
केचिद्द्यूतकरा भवन्ति कतिचिद्भिक्षाचराः किंकराः
   केचित्कर्मकराः परे धनवतां श्लाघाकराः केचन ।
स्कन्धासक्तपटचरा घ(अ)नुचरा शोकादकिंचित्करा-
   स्तेऽमी कामिवराः पुरा समभवन्वेश्यासु ये गोचराः ॥ ५१ ॥
वेश्याभिर्विवशीकृतः कुपुरुषः संजायते दुर्गतो
   दौर्गत्येन दुरोदरे निपतितः स्वं हारयत्येव सः ।
रुद्धो द्यूतकरैः करोति विधुरश्चौर्यं ततस्तस्करो
   वध्यः स्यान्नृपतेरहो नु विषयासक्तेर्दुरन्ता गतिः ॥ ५२ ॥
आजीवः कपटानुरागकलया दोषो न दुःशीलता
   वैधव्यं न च बाधते सदसतोः संभावना व्यत्ययात् ।
यत्किंचित्करणे परस्वहरणे व्रीडा न पीडाकरी
   नो वा राजभयं च ही वत सुखं जीवन्ति वारस्त्रियः ॥ ५३ ॥
स्त्रीति प्रीतिकरं पुरः परिणतौ हालाहलं केवलं
   सर्वस्य व्यसनं किलैतदधिकं तत्रापि वेश्येति च ।
प्राधान्येन ततस्तदेव कथितं यत्तत्प्रसङ्गेन च
   व्याख्यातं गुणदोषजातमुचितं चिन्त्यं तदप्यादरात् ॥ ५४ ॥
चेतःश्वापदवागुरा दशगुणस्फारस्मरोड्डामरा
   वार्तल्यावधयः (?) समुद्रलहरीपूरैरिवोत्पादिताः ।
नापि स्वान्यसमर्पणेन न सखे सख्या (?) विरोधेन वा
   गूढान्तर्मुखसाहसव्यतिकरा रक्ष्याः परं योषितः ॥ ५५ ॥
भस्मस्नानमहाव्रतं कतिपयश्रीभ्रष्टसंभावितं
   सर्वापह्नवहस्तलाघवकलाकूटाक्षशिक्षात्मकम् ।
प्रत्याशापुनरुक्तहारणजगद्द्रोहं विवादास्पदं
   दारिद्र्यस्य निमन्त्रणं किमपरं धिग्द्यूतलीलायितम् ॥ ५६ ॥

१. मुने. २ जोवक्ष.

हिंसानिर्घृणकर्मभूः प्रतिपदानेकपथाद्भ्रमु-
रत्नागारधुरंधरा प्रतिकृता शाम्भैर्जनैः भाभिः ।
शृङ्गाररसतरङ्गतारानिरन्तरागामभिन्नागुणा
कामक्लेशकलाभिर्मलिनता सेव्या मृगस्यापि किम् ॥ ५७ ॥
शौनागारविनारनालमखिलकार्याहितानार्जकं
तत्तक्रोध्यगृहस्मयभिदुरं निर्भेशमण्णोल्लसः ।
मत्तव्यालकलिप्रमादनिविशोन्मादैः पिशाचार्पितं
मन्ये मूर्तममेध्यमेतदितरादन्यस्य कस्य प्रियम् ॥ ५८ ॥
उल्कापातसहोदरं सहचरं वैश्वानरज्ञागरु-
ज्जृम्भानां हरकण्ठलालितगरद्रोणीकुटुम्बीकृतम् ।
जिह्वाग्रे करपत्रभिन्नमनिशं तत्कर्कशं दुर्वचो
यस्यास्ते वद कैद्रदः कथमहो सोऽपि स्वयं जीवति ॥ ५९ ॥
चण्डं दण्डमकाण्ड एव कलयन्राजा प्रजानां यमः
कुर्वन्दुर्व्ययमर्थदूषणरुचिः स्वस्यैव स द्रोहकृत् ।
सौम्यः सौम्यकरोऽतिविश्वनयनानन्दोऽभिनन्द्यः सतां
सश्रीकः कमलाकरश्च सुषमां कां कामहो नार्हति ॥ ६० ॥
संसारस्य महेश्वरो दिनपतिर्ध्वान्तस्य वैद्यो रुजां
प्रायश्चित्तमघस्य शास्त्रमपरिज्ञानस्य तोयं तृषः ।
सिद्धाज्ञा गरलस्य तीर्थसरणं वृद्धत्ववैक्लव्ययोः ।
सप्ताङ्गव्यसनावलेः प्रशमनोपायश्च शिक्षा सताम् ॥ ६१ ॥
ॐकारः साहसानां निजगुणनिपुणप्रत्यवेक्षा सुखानां
कादाचित्कः प्रयोगः सकलपरिचयोपाधिवैदग्ध्यबन्धुः ।
कष्टानामन्त्यकाष्ठा धनरसिकवणिग्लोकयात्राप्रसङ्गो
जीवज्जन्मान्तरं चेत्यलमतिबहुना स्वस्ति देशान्तराय ॥ ६२ ॥
यद्यप्यस्ति सविस्तराद्भुतकथाभूयिष्ठनानाविध-
व्याख्यायां निरवद्यहृद्यचरितोदारं च देशान्तरम् ।

१. गर्ध्यवादी.

संख्यागलत्तिमिरदुर्दिनमत्र तेन
मन्यामहे कुसुमबाणमहानिधानम् ॥ २ ॥
उद्दीप्यते तव हृदि स्मरजातवेदा
वक्षोरुहप्रतिहतोऽस्य तदुग्रधूमः ।
जानामि रोमलतिकाच्छलमवाप्य
नाभीगभीरविवरं प्रविशन्निलीनः ॥ ३ ॥
वक्षोरुहक्षितिभृता मिलितैकभागां
रोमावलीं भुजगराजवधूं विधाय ।
दर्वीकरज्यगिरिचापजितामरारि-
रुद्रोपमेयमसमाशुगमातनोषि ॥ ४ ॥
नाभीसमाश्रयिण उज्ज्वलदीपमूर्ते-
र्हारामगुम्फितमहामणिदीपकस्य ।
उद्गत्वरी विलसदञ्जनमञ्जरीव
राजीवगात्रि तव राजति रोमराजी ॥ ५ ॥
वक्षोरुहौ कविवरैस्तव तर्कितौ यौ
स्तम्बेरमप्रवरकुम्भतया वरोरु ।
तन्निर्गलन्मदजलौघतया ध्रुवं ते
रोमालिरूपमपि निह्नुतदेश्यमेव ॥ ६ ॥
नाभीह्रदे निपततां जनमानसानां
नैवाभविष्यदिह उद्धरणं कदाचित् ।
रज्जुर्हि रोमलतिकाव्यपदेशभाजी
वक्षोजशैलनियता यदि नाभविष्यत् ॥ ७ ॥
नाभीमुपेत्य सरसीं तव रोमवीथी-
स्तम्भं ततो दुरधिरोहतरं निखाय ।
वक्षोजवप्रमसुबोधसुखं मनोभू-
र्व्यग्रीकृतः सततमुग्रभियाधिशेते ॥ ८ ॥

१. 'भासां' ख. २. 'रुद्रोपमेय' क.

पैत्तावनौ लवणिमामृतसागरस्य
तालीलता तव विराजति रोमलेखा ।
तस्याः पयोधरमयेन फलद्वयेन
माद्यन्ति नेत्रविषयीभवतापि लोकाः ॥ ९ ॥

अत्युन्नतस्तनमहीरुहदुर्गवासो
भर्गाद्भिया मकरकेतन आयताक्षि ।
रोमालिरज्जुमिलिताग्रकहाररत्न-
कुम्भं निरस्य रसमिच्छति नाभिकूपात् ॥ १० ॥

वृद्धेर्निदानमिह पुष्पशरासनस्य
वामोरु ते स्तनमयो नववामदेवः ।
यस्मिन्कुरङ्गमदपङ्कवशात्कलिन्द-
कन्या स्थिता पतति रोमलताछलेन ॥ ११ ॥

स्नेहातिरेकसततज्वलितास्मरेषु-
दीपेन यत्स्तनतलेऽञ्जनमाविरासीत् ।
मन्ये तदेव चिरकालभवद्गुरुत्वं
तस्मात्पतद्वदति रोमलतेति लोकः ॥ १२ ॥

आकाशमाश्रितवतीमवलोकमाना
स्रोतस्वतीं दुहितरं तुहिनाचलस्य ।
मन्ये कलिन्दतनयापि तवावलम्ब-
माशिश्रिये सुतनु रोमलतामिषेण ॥ १३ ॥

शृङ्गारनामकरसान्वितनीलवर्णः
किं पारमार्थिक इतीव मनोभवेन ।
क्षिप्तः परीक्षितुमयं नलिनाक्षि मध्य-
[illegible] स्फुरत्यहह रोमलतेति चित्रे ॥ १४ ॥

[illegible]तुहिन[illegible]संनिधाना-
[illegible] [illegible]ान् ।

अन्तर्भृतं[1] मधु कुचाम्बुजकोरकाभ्यां
निश्च्योतदन्तरवगच्छति रोमवल्लीम् ॥ १५ ॥
त्वन्मध्यमं गगनमित्यविवादमेव
वक्षोजकाञ्चनसरोजरुचास्य भागः ।
पिङ्गीकृतो ह्युभयतोऽखिलदिङ्मुखत्वा-
द्रोमालिरित्यविकृतः पुनरस्य योंऽशः ॥ १६ ॥
नूनं पयोधरयुगं तव तन्वि देह-
व्यूहं वहत्यविहतं यत एतदेव ।
रोमावलीपदमुपैति गभीरनाभी-
पद्माकरान्[2]नवसमुद्यतमेचकत्वम् ॥ १७ ॥
त्वन्मध्यमं प्रियतमे वियता समानं
मन्दाकिनीव समुदञ्चति हारवल्ली ।
पीयूषभानुरिव नायकरम्यरत्नं
रोमावली तनुवलाहकवीथिकेव ॥ १८ ॥
सारङ्गिकामदनिपङ्करसंप्ररोह-
नीलत्वयोस्तव पयोधरयोरतीव ।
संघट्टनादिव परस्परमेकखण्डो
रोमावलीपदमुपेत्य पपात मन्ये ॥ १९ ॥
मुक्तालिलोहितकमालिकयोर्द्विभाग-
संलग्नयोर्ललितरोमलतेयमन्तः ।
संगम्य शीतकिरणामृत(?)दीधितिभ्यां
सिंहीसुतः कवलतामिव नीयमानः ॥ २० ॥
त्वन्मध्यमाम्बरतलादहितुल्यरूपो
रोमावलीमयविधुंतुद एष सुभ्रु ।
लिप्सुर्मुखेन्दुमिव जिघ्रसिपासमेतः
प्रोद्यत्स्तनक्षितिधरान्वयतो निरुद्धः ॥ २१ ॥

१. 'भृतं' ख. २. 'करान्तर' क.

हाराग्रभूमितलोहितकांशुजाल-
नीरन्ध्रनाभिमिलिता तव रोमराजिः ।
पारीक्षितक्रतुविदीपितवह्निकुण्ड-
मध्ये विभाति पतयालुरिवोरगाली ॥ २२ ॥

श्रीखण्डसङ्गविरहेण विहीनमुच्चै-
र्वक्षोरुहं मलयपर्वतमारुरुक्षुः ।
दर्वीकरी तव विलासिनि रोमराजी
गारुत्मतान्वयभयादध एव तस्थौ ॥ २३ ॥

नाभी तवोज्ज्वलरसामृतपूर्णवापी
तस्यां निधाय विधया वरहारयष्टिम् ।
मीनध्वजं मदयितुं हृदयाधिवासं
रोमावली रसझरी समकृष्यतोर्ध्वम् ॥ २४ ॥

वक्षोरुहक्षितिधरद्वितयान्तराला-
दुत्थायिनी शुचिरसस्य सरस्वतीयम् ।
उन्निद्रनीलनवनीरजहासिनीयं
रोमालिरुल्लसति जीवितवल्लभे ते ॥ २५ ॥

वक्षोरुहाद्रिपतनप्रतिबन्धहेतु-
संयोगवत्त्वदुदरं वियदस्त्यपूर्वम् ।
यल्लिम्बिराजति समायतरोमवल्ली-
स्वातीपथो विलसदञ्जनगञ्जनश्रीः ॥ २६ ॥

नाभीदरीज्वलदनङ्गकृशानुमध्ये
यूनां मनांसि रससंक्लिनितानि पेतुः ।
तद्गाहतः समुदिता प्रतिभाति रोम-
[illegible] वरवर्णिनि धूमलेखा ॥ २७ ॥

[illegible] वहन्नुर्मि [illegible] मन एव हेतु-
[illegible] चकमत्र ।

[illegible]

रोमालिभूमलतिकाकुनागर्भतेन
नाभीह्रदेन च समं व्यतिषङ्गमेति ॥ २८ ॥

स्वज्ञानजन्यदहनानुमितौ विशङ्कं
धूमोऽपि याति विषयत्वमितीव वक्तुम् ।
नूनं व्यधत्त हृदये तव रोमराजि-
व्याजेन धूमवितर्तिं विगिरुह्निवादाम् ॥ २९ ॥

एकार्थवाचकमिदं दहनासमेषु-
शब्दद्वयं नियतमाकलयामि कान्ते ।
धूमेन रोमलतिकाव्यपदेशभाजा
स्यादन्यथा तदनुमाप्रमितिः कथं वा ॥ ३० ॥

कामोपजीवकमिमं मुखरेवतीश-
मासेवितुं तपनजासरिदुद्गतेव ।
तद्भीत्युदीतकृशता तव रोमराजी
निर्भाति मुक्तवलिरूपऋजुप्रवाहा ॥ ३१ ॥

सर्वाङ्गसंचरणतः समनन्तरं य-
द्यूनां दृशस्तनमहीधरमध्यरुक्षन् ।
मन्ये ततो निपतनं समुपेयुषीणां
तासां विभाति पदवी तव रोमवीथी ॥ ३२ ॥

रत्नावलीविविधकान्तिकदम्बकेन
चापं पयोधरयुगे तव निर्मितं यत् ।
कामस्य रुद्रविजयाय तदीयमौर्वी-
लेखेव[2] रोमलतिका दयिते चकास्ति ॥ ३३ ॥

त्वच्चेतसि स्थितवतो मकरध्वजस्य
संरक्षणाय दनुजद्विषता निदिष्टम् ।
स्वाश्मच्छलेन गरुडं समवेक्ष्य रोम-
श्रेणीमिपात्स्तनभवाहिरपागमत्किम् ॥ ३४ ॥

१. 'व्यतिरेकं' ख. २. 'लेखा' ख.

रोमावली मरकतोपलरेखिकेयं
नीलारविन्दसुषमाक्षि समुज्जिहीते।
केनान्यथा कुसुमबाणभुजंगदष्टं
चेतः समुच्छ्वसिति दृग्गतया तयापि॥ ३५॥
उद्दाममन्मथविकारविमोहगाढ-
ध्वान्तच्छटा सुतनु संक्रमणस्वभावा।
रोमावली तव कुतोऽपरथा युवाक्ष्णां
तद्दर्शनात्तिमिरिता हरितो भवन्ति॥ ३६॥
स्नानन्तरोन्नतपयोधरमण्डलेन
ग्रीष्मेण यौवनमयेन महोष्मभाजा।
नीता शिशुत्वरजनी कृशिमानमेषा
नूनं चकास्ति तव रोमलताछलेन॥ ३७॥
जागर्ति मानसगतो रस उज्ज्वलो यः
स्वाधिक्यतः स किल मातुमिहासमर्थः।
वक्षोजभूमिधरसंधिपथेन मन्ये
वामाक्षि ते वहति रोमलतापदेशात्॥ ३८॥
बाल्यं दशाननमिवास्तमितं विधातुं
रोम्णामियं ततिरिति व्यपदिश्य शङ्के।
लावण्यवारिनिधिमुत्तरितुं रतीश-
रामेण सेतुरिह चारुतरो न्यबन्धि॥ ३९॥
पीयूषदीधितितया जनितप्रसङ्गो
योऽङ्को मुखेन तव तन्वि तिरस्कृतोऽभूत्।
मन्ये स एव कुचशैलनिपातभिन्नो
विज्ञायते जगति रोमलतेति लोकैः॥ ४०॥
वक्षोजपर्वननटीषु कृताटनानां
नाभीसरः समवगाहितुमुत्सुकानाम्।

1. 'पारे' ख.

यूनां मनोमदकलद्विपनायकानां
बन्धाय रोमलतिका तव शृङ्खलेव ॥ ४१ ॥
एषा वशीकरणसिद्धमहाञ्जनस्य
रेखा[1] व्यधायि तव रोमलता स्मरेण ।
नेत्रेन्द्रियाणि जगतां सति यत्प्रयोगे
नालं भवन्ति विषयान्तरसंगमाय ॥ ४२ ॥
तारुण्यधर्मसमये तव देहभूमौ
संचारिणां युवकदम्बकलोचनानाम् ।
विश्रामकाम इव कामिनि काम आधा-
न्नाभीप्रहिं कुचघटौ कचराजिरज्जुम् ॥ ४३ ॥
अभ्युद्गता तव पयोधरमध्यदेशा-
द्विद्योतते तडिदिवाहह रोमराजी ।
यूनां विवेकधृतिमुख्यगुणक्षयस्य
संसूचनाय सुतनूदितमेचकत्वा ॥ ४४ ॥
रोमावली तव नवीनपयोदवीथि-
रैरावतः किमु पयोधर एतदूर्ध्वम् ।
यस्यां विभाति नवमौक्तिकहारवल्ली-
निःस्पन्दमन्दगतिका बिसकण्ठिकेव ॥ ४५ ॥
आरामताजुषि मनोजनृपो भवत्यां
वाणी कुहूरुतरुतं युवता निदाघः ।
रोमावली घनलता वदनं सुधांशु-
र्हासो हिमं करयुगं मृदुलं शिरीषम् ॥ ४६ ॥
काले महातरुणताजनितान्धकारे
त्वन्मानसालयमनङ्गमभिव्रजन्ती ।
नीलं निचोलमुपगृह्य कृशाङ्गयष्टी
रोमावली रतिरिव प्रविविक्षुरन्तः ॥ ४७ ॥

१. 'लेखा' ख.

वक्षोजशैलशिखरं समवाप्य बाल-
तीक्ष्णांशुना स्तनहरेऽन्तमुपप्रयाति ।
संध्येव लौहितकरद्विभिरुज्झितेति
रोमालिरुल्लसति सुभ्रु तमोलतेव ॥ ४८ ॥

या तस्य पूजनविधौ हरिणीमदस्य
धारा त्वया प्रियतमे प्रथमं व्यतारि ।
सैव त्वदीयहृदये कृतसंनिपातं
रोमालिरीक्ष्यत उपसितमीनकेतुम् ॥ ४९ ॥

निर्जन्तुणी कुचतटात्तव रोमराजी
नाभीमुखं प्रविशती नितरां चकास्ति ।
चामीकराम्बुजगुलुच्छमुपेक्ष्य फुल्ल-
गम्भोरुहं मधुतृपा भ्रमरावलीव ॥ ५० ॥

लोकत्रयं वशयितुं कुसुमायुधस्य
तारुण्यमभ्युदयते दहनीयमस्त्रम् ।
तस्यैव संभवविशोधनकोविदेयं
रोमावली स्फुरति धूमलता कृशाङ्गि ॥ ५१ ॥

प्रीत्यै प्रसूनधनुषो नवयौवनेन
नाभीसरोवरमिवोत्खनतोच्छ्रिता ते ।
तत्संनिधौ सुरुचिरासितवैजयन्ती
रोमावलीति वरवर्णिनि वर्णयन्ति ॥ ५२ ॥

वक्षोरुहात्मकहिरण्यमहीधरोऽयं
विभ्राजते स्मरधनुर्भुवि दक्षभावन् ।
[illegible] सुन्दरचामरः प्रकाशो
[illegible] पवनो विभाति ॥ ५३ ॥
[illegible] निम्नं [illegible]चन्दनोऽयं
[illegible] हृदयावनौ ते ।

लङ्का नखक्षतपलाशवती यतोऽत्र
रोमावली रजनिरस्ति सदैकरूपा ॥ ५४ ॥
वक्षोजहाटकगिरीन्द्रतटस्थनील-
जम्बूफलस्रुतरसोत्करनिर्मितेयम्।
स्रोतस्वती वहति रोमलता त्वदीया
यस्याः सुवर्णघटितोभयभागभूमिः ॥ ५५ ॥
तारुण्यपावकभवा कचराजिधूम-
वीथी विराजति मृगाक्षि विलक्षणैव।
या गोलकेन सह संगममप्यनाप्ता
दृष्टैव दृष्टिविकृतिं वितनोति यूनाम् ॥ ५६ ॥
मन्दाकिनीं कनकभूमिधरप्रपात-
निष्पातिनीं समवलोक्य तदीर्ष्ययेव।
मन्ये कलिन्दतनया तव रोमराजि-
व्याजेन सुभ्रु कुचवप्रतटात्पपात ॥ ५७ ॥
तन्वि त्वदीयहृदये परमाधिराज्यं
नेतुं मनोभवमशेषजगत्सु नूनम्।
वक्षोरुहौ कनकजावभिषेककुम्भौ
रोमालिहारलतिके चमरेऽसिताच्छे ॥ ५८ ॥
आवासधाम्नि हृदये तव मन्मथस्य
कुम्भौ सुवर्णघटितौ निहितौ स्तनौ किम्।
मन्ये तयोर्निपतनप्रतिकारहेतो
रोमालिरक्रियत मारकतीव यष्टिः ॥ ५९ ॥
रोषान्धकारनिकरो दयितं प्रति प्रा-
ग्वामाक्षि ते हृदय एव तिरोहितोऽभूत्।
मन्ये स एव तव रोमलतामिषेण
प्रादुर्बभूव चिरसंभृतिभूतभूमा ॥ ६० ॥

१. 'धूमलता' क. २. 'दृष्ट्वैव' क.

नूनं वियोगदहनाहितदाहभाजा-
मुज्झाशनेन य उपार्जि मनोभवेन ।
मन्ये सुदुष्कृतभरो हृदये स्थितं त-
मन्वेतुमावसति रोमलताच्छलेन ॥ ६१ ॥
यावन्ति जाग्रति पुरा हृदये त्वदीये
बीजानि चन्द्रमुखि कामकलाविकृत्याः ।
तान्येव हाररससेकवशेन रोम-
राजीमिषात्सकलमङ्कुरितानि मन्ये ॥ ६२॥
वासाय पुष्पधनुषो हृदयं तवेदं
साधु प्रसाधयितुमागतवधुवत्त्वम् ।
रोमालिकैतवत आयतनीलसूत्र-
लेखां विभागजननीमिव तन्वि चक्रे ॥ ६३ ॥
त्वन्मानसे निवसता कुसुमायुधेन
मायासु शम्बरमहासुरतो बुधेन ।
व्यामोहनाय दहनालिकलोचनस्य
रोमावली तिमिरवीथिरिव व्यकासि ॥ ६४ ॥
हारस्तवैष मकरध्वजपालनाय
संकर्षणोऽतिविशदो हृदि नित्यमास्ते ।
प्रत्यग्रमेघदलमेचककान्तिरेषा
रोमावली बृहतिकालतिका तदीया ॥ ६५ ॥
तारुण्यतीक्ष्णरुचिना तव कामकेली-
मोहान्धकारमखिलं निरकासि चित्तात् ।
यन्मत्तकाशिनि हठेन तदेव रोम-
राजीति नूनमिह गोचरयन्ति लोकाः ॥ ६६ ॥
येन व्यधायि जनकेन पुरास्य दाहो
भालेक्षणे निवसता पुरसूदनस्य ।

तस्य त्वदीयहृदये वसता स्मरेण
धूमस्य रोमलतिकेति कृतो ग्रहः किम् ॥ ६७ ॥
आलम्ब्य ते स्तनमहीधरमच्छहारं
मन्दाकिनीरुचिरमुग्रजिगीषयेव ।
रोमावलीमिषसमुन्नतधूमलेखा-
मिन्दीवराक्षि पिबतीव रतेरधीशः ॥ ६८ ॥
तारुण्यशक्तिजनुषा कृतभारतार्हे-
व्यासेन ते स्तनयुगेन मृगीमदाभाम् ।
मत्सीं ग्रहीतुमनसा निरमायि नूनं
नीहारवीथिरिह रोमलतापदेन ॥ ६९ ॥
वक्त्रेन्दुकान्तिनिकरैः कुचचक्रवाक-
युग्मस्य यत्र समुदञ्चति विप्रलम्भः ।
रोमावलीतिमिरलौहितिकार्कयोश्च
वासो यदेष मदनस्य नवीनसर्गः ॥ ७० ॥
संकेतभूः प्रियतमे हृदयं त्वदीयं
नूनं विहर्तुमनसो रतिकामयोः किम् ।
यस्मिन्विभाति विशदत्रिवलीतटिन्यां
रोमावलीमयनवीनतमालवल्ली ॥ ७१ ॥
अद्यापि रुद्रनयनानलदाहजन्यां
वहीं रुजं वहति सुन्दरि पुष्पधन्वा ।
एतत्सुहृत्तरुणिमा तव हृत्स्थितेऽस्मि-
न्रोमालिशैवललतां निदधाति यस्मात् ॥ ७२ ॥
रोमावलीलवणिमामृतदीर्घिकायां
शैवालवल्लरिरुदेति विशङ्कमेषा ।
नाशिष्यतां कथममु कुचचक्रवाकौ
ध्वान्तभ्रमो यदि तयोर्हृदि नाभ्युदेष्यत ॥ ७३ ॥

१. 'धूमलता' क. २. 'रोमावली[illegible]' क. ३. 'नूनमलिकेक्षण' क.

रोमावली मरकतोपलकोमलेयं
रोलम्बतः कथमिवाभ्युपयातु भेदम् ।
यद्गोचरीकरणमात्रत उत्पलाक्षि
गृह्णाति कामुकजनेक्षणमीनसंघः ॥ ७४ ॥
शुद्धेन्द्रनीलघटितध्वजयष्टिरेषा
रोमावली त्रिजगतीजयकृत्स्मरस्य ।
यस्या विभाति शिखरे कुचसंश्रयोऽयं
सत्पत्रभङ्गिमिषतो मकरः सुनेत्रे ॥ ७५ ॥
त्वन्मानसे निवसता मकरध्वजेन
संतर्क्य साध्वसमलीकविलोचनोत्थम् ।
त्वप्रत्यनीकविनिरोधनहेतुसिद्ध-
मन्त्राक्षरालिरिव रोमलता न्यलेखि ॥ ७६ ॥
वाचा कुहूरुतरुतोपमया प्रिये ते
कृसाहृया निजमनेहसमन्तरेण ।
वक्त्रामृतद्युतिभिया समुपस्थितेयं
रोमालिरूपककुहूः कुचपर्वताधः ॥ ७७ ॥
विद्यामधीत्य तत एव हृतं तनैव
कामेन शम्बरमहादितिजं निरीक्ष्य ।
रोमावलीपदमुपेत्य विधुंतुदोऽमुं
त्वन्मानसस्थमभियुङ्क्त इवोत्पलाक्षि ॥ ७८ ॥
वैरानुबन्धनविधौ विधुरावधित्व-
मालोक्य पुष्पधनुषा सुकुमारगात्रि ।
रुद्रीयभालनयनानलवारणाय
रोमालिसूर्यतनया हृदि ते न्यधायि ॥ ७९ ॥
[illegible]न्मुखमान्यनाभे
नूनं [illegible] ।

[illegible]

भासां तव कलिका इव हारमुक्ताः
  स्तनान्तरस्य तव रोमलतेति मन्ये ॥ ८० ॥
वह्निर्विलासमृगमञ्जरि नलिनीनि-
  शेषं निमग्न मत्स्योऽपुन नदितां नु ।
गम्भीरनाभिसरसी ह्रदगे सरीरे
  रोमालिधूमलतिकाभाति प्रकामम् ॥ ८१ ॥
नाभीक्षणे तव मुखेन सुधाकरेण
  भ्रान्त्याभिभूय तिमिरनिकरे प्रसन्न ।
क्षिप्ता कुचक्षितिधराद्रिश रोमलेखा-
  व्याजेन नाभिविवरे किमु गन्धवेशि ॥ ८२ ॥
भूयो दृशां तव पयोधरमण्डलेऽस्मि-
  न्मग्नां मनःसु परिसर्पति निर्विरामम् ।
दर्वीकरी मृतनु रोमलतास्वरूपा
  नूनं प्रवेष्टुमभिकाङ्क्षति नाभिरोकम् ॥ ८३ ॥
स्फूर्जत्पुरत्रयविरोधिललाटनेत्र-
  ज्वालोदितज्वरमनङ्गममुं हृदिस्थम् ।
सेक्तुं हलायुधधियेव कलिन्दकन्या
  रोमावलीत्वमुपगम्य किलोपतस्थे ॥ ८४ ॥
वक्षोरुहौ वरसुवर्णसरोजगुच्छौ
  मुक्तावली पुनरखण्डिततण्डुलाली ।
दीपोऽतिदीप्ततरलः स्मरपूजनाय
  रोमावली लघुजधूमलता कृशाङ्गि ॥ ८५ ॥
भ्रूवल्लिकार्मुकमथाञ्जनवीथिमौर्वी
  लब्ध्वा कटाक्षविशिखांस्तव काम औज्झत् ।
ज्यां रोमराजिरिति चापमथावतंस
  इत्याशुगान्कबरिकासुमना इतीव ॥ ८६ ॥

१. 'वि[illegible]क्षललामनेत्र' क.

मध्यान्तोऽप्यतिवसंवदितेन्द्रिया ये
नेतोभुवा पशगनायिपतात्मनः प्राक् ।
तेषामिह स्फुटतरा अवशःप्ररोहा
व्यक्तास्त्वदीयहृदि रोमलतामिषेण ॥ ८७ ॥

हुत्वा युवत्वदहने रतिजीवितेश-
कापालिकेन मदिराक्षि मनांसि यूनाम् ।
निर्जेतुमुग्रमिव रोमलताकृपाणी
सिद्धेन साधु विधिना विदधे विधेया ॥ ८८ ॥

कामेन ते हृदयसीम्नि निवासभाजा
संप्रेक्ष्य संनिहितमीशसुरोजरूपम् ।
तं विध्यता नखरजन्यपदार्धचन्द्रै-
र्मौर्वी परेव निहिता तव रोमलेखा ॥ ८९ ॥

अन्तर्निवासमुपयातवतः स्मरस्य
द्वारे यथा हृदि विराजदुरोजकुम्भे ।
दौवारिकीव हृदि ते नवयौवनश्री-
र्लीलयष्टिरिव रोमलता विभाति ॥ ९० ॥

भीत्या भवस्य भजता न परिस्फुटत्व-
मध्यक्षतामखिलमेव निनीषता च ।
कामेन ते हृदि गतेन वरोरु रोम-
राजीमिषेण निहिता किल काचलेखा ॥ ९१ ॥

कर्णान्तकर्षणभरादवनम्यमाना-
द्बाणासनात्सुतनु पुष्पशरासनस्य ।
या श्च्योतनेऽच्युततरा मकरन्दवीथी
तामेव रोमलतिकां ब्रुवते जगन्ति ॥ ९२ ॥

दुर्भिन्नानि हृदयानि सुमेदभिन्ना-
न्यालोक्य तानि पुनरक्षतानि कर्तुम् ।

१ हृदये क.

आकर्षणाञ्जनततिः किमु रोमवल्ली-
कामेन ते व्यरचि जेतुमखेदितेन ॥ ९३ ॥
अभ्युच्छ्रितं किमपि यौवनसेवकेन
मुक्तावलीद्वितयचामरमन्तरेण ।
रोमावली हृदयगस्य मनोभवस्य
मायूरमातपपिधानमिवावभाति ॥ ९४ ॥
वक्षोजकाञ्चनमहीभृति यन्नखाङ्क-
रूपः समुद्गमगुपागमदर्धचन्द्रः ।
तत्रास्ति कारणमियं तव रोमराजि-
रूपा यदर्धरजनी नवनीरजाक्षि ॥ ९५ ॥
ईशानभालनयनानलदाहभाजो
मीनध्वजस्य परितापनिवारणाय ।
सज्जीकृतेव नसितोत्पलपत्रशय्या
रोम्णामियं तव लता वलवद्विभाति ॥ ९६ ॥
धूमोर्ध्वगत्यनुमिताद्विरहाद्वरिम्ण-
स्तत्पार्थिवत्वविषये विमतिं विहन्तुम् ।
किं तावकीनहृदि मन्मथवह्निधूमो
वाले व्यधायि विधिना पतयालुरेषः ॥ ९७ ॥
धूम्याटभावमुपविश्रति नूनमत्र
यूनां मनांसि नलिनायतलोचनान्ते ।
यन्मन्मथेन निरमीयत रोमराजि-
धूमावली खलु वशीकरणाय तेषाम् ॥ ९८ ॥
त्वन्मानसे निवसता झषकेतनेन
सार्धं रतेरतितरां विहृतिं चरन्त्या ।
तालच्छिदेव वरवर्णिनि कर्णदेशा-
द्विस्रंसिनी स्फुरति ते हृदि रोमराजी ॥ ९९ ॥

१. 'भेत्तुं' क.

उज्जृम्भमाणनवयौवनघर्मकाल-
विस्तारभृद्घनशिरीषरजश्छटेव ।
यूनां मनांसि नितरामुपलोभयन्ती
रोमालिरन्तरतिसंमदमातनोति ॥ १०० ॥

सूरीन्द्रमौलिमुकुटामलरत्नदीप-
लक्ष्मीधराख्यबुधवर्यतनूद्भवेन ।
विश्वेश्वरेण हृदयालुहृदां मदाय
रोमावलीशतकमेतदकारि चारु ॥ १०१ ॥

इति पार्वतीयश्रीविश्वेश्वरपण्डितप्रणीतं रोमावलीशतकम् ।

वेदान्ताचार्यश्रीवेङ्कटनाथप्रणीता

सुभाषितनीवी ।

अनिपुणपद्धतिः ।

प्रथममनुजनाय पुंसे मह्यमपि प्रथमदुर्जनाय नमः ।
सर्वं हतः कृतं यौ सकृदुपकारापकाराभ्याम् ॥ १ ॥

प्रमितिपरिष्कृतिमुद्रा सहृदयहृदयैः समर्पिता कविभिः ।
भवति सुभाषितनीवी परगुणचौरैरहार्यार्था ॥ २ ॥

पश्यति परेषु दोषानसतोऽपि जनः सतोऽपि नैव गुणान् ।
विपरीतमिदं स्वस्मिन्महिमा मोहाञ्जनस्यैषः ॥ ३ ॥

यत्र पयः प्रभृति स्वं भुक्त्वा सत्यानुषक्तधीश्चोरः ।
पशुवृत्तिगणे तस्मिन्नपि नाम यशोदया वृत्तम् ॥ ४ ॥

---

१. 'विस्तारिवर्धन' क. २. अयं वेदान्ताचार्यः क्रिस्ताब्दीयत्रयोदशशतकोत्तरार्धे आसीद्द्रविडदेशे. अधिकारसंग्रह–तत्त्वमुक्ताकलाप–न्यायसिद्धाञ्जन–पादुकासहस्र–यदुवंशादिपद्यकाव्य–रहस्यत्रयसार–संकल्पसूर्योदयाद्या एतत्प्रणीता बहवो ग्रन्थाः समुपलभ्यन्ते. अस्याः सुभाषितनीव्या एकं द्रविडलिपिमुद्रितं पुस्तकमुपलब्धम्. तत्प्रतिरूपकं च सांप्रतं जयपुरमलंकुर्वाणानां द्रविडनरसिंहाचार्याणां साहाय्येन विहितम्. कवेर्देशकालादिकं च तैरेव दर्शितम्.

हरिकरसङ्गमदरं [illegible] पश्यति [illegible] ।
गिरीश पाञ्चजन्यं पीतं [illegible] ॥ ५ ॥
स्फटिककरगालगुल्मो स पुनः [illegible] ।
तदपि न तवानालो [illegible] मा [illegible] ॥ ६ ॥
[illegible] शशिनि [illegible] ।
पक्षमन्ति [illegible]: शुक्तिपुटमौक्तिकस्थानैः ॥ ७ ॥
पतितपत्रजातधृतिः श्वान इव कश्चित् [illegible] ।
पतनमपि गमय समये पविहाराणामतो भाति ॥ ८ ॥
बहु निम्नगाप्रकारानुद्गमा कुक्षिं प्रकाश्य निरपति न ।
मुहुरपि विहितादरं य·······प्रत्युपकरोति न तत् ॥ ९ ॥
प्रभान्दहन्ति शान्तान्येभ्यः [illegible] ।
अगणितनिजप्रकाशैः किमाश्रयाशैरनाशमिदं ॥ १० ॥

नवदलपुटे कलन्या यस्य प्रभोरपि फलाभी-
नैदपरिग्रहो यस्यापलाच्छुरं शमयिष्यति ।
वटविटपिनल्लासाङ्कूरानुत्कटपल्लवा-
न्स्वपुटचटसापेक्षी भिक्षुः प्रतिक्षणमीक्षते ॥ ११ ॥
निरवधिगुणग्रामे रामे निरागसि वागसि-
स्फुरणमुषितालोका लोका वदन्ति सदन्तिके ।
वरतनुहृतिं बालिद्रोहं मनागपि सर्पणं
परिमितगुणे स्पष्टावद्ये मुधा किमुदासते ॥ १२ ॥

इत्यनिपुणपद्धतिः प्रथमा ।

अथ दम्भपद्धतिः ।

तदेव गृह्यतां नाम च्छागमण्डूकरासभैः ।
तिसृणां तावता हन्त मूर्खाणां किमिहागतम् ॥ १ ॥
अण्डजाः पुण्डरीकेषु समुद्रेषु जनार्दनाः ।
नीलकण्ठाश्च शैलेषु निवसन्ति न तेन ते ॥ २ ॥

कामं निरुन्तु संस्थानं कश्चिद्रूपं न भास्वतः ।
अभित्तिविहितालम्बमालोकं विलिखेत्कथम् ॥ ३ ॥
अपि सत्पथनिष्ठानामाशाः पूरयितामपि ।
अगस्त्यवृत्तिर्मेघानां हन्त मालिन्यकारणम् ॥ ४ ॥
अस्तु तावदगस्त्यस्य जह्नोर्महिमनिह्नवः ।
का कथा तस्य बालस्य विश्वग्रासेऽप्यतृप्यतः ॥ ५ ॥
दृष्टसारङ्गयूथोऽपि दंष्ट्रानखरवानपि ।
भूभृत्कटकसंस्थोऽपि सारमेयो न सिंहति ॥ ६ ॥
सत्पथे छादयन्मित्रमपि व्यालस्तमोमयः ।
अतीतपर्वा जगतामदृश्यः सहसा भवेत् ॥ ७ ॥
धुर्याणामपि सत्कार्यगुणशालिविमर्दिनाम् ।
अनागमविदां युक्तमपनीतेर्निवारणम् ॥ ८ ॥
बलोत्तरेण हरिणा नागमल्लविभेदिना ।
शृगालः साम्यभाक्काङ्क्षन्शौर्याधिक्यं न विन्दति ॥ ९ ॥
सुदर्शनभृता कश्चिदजहत्कीर्तिमत्सरः ।
महाशान्तपदाकर्षी जलजन्तुर्निगृह्यते ॥ १० ॥

गतिर्व्योम्ना तर्कि गरुडमभिटीकेत चटकः
पिबत्वम्भःक्षारं न खलु कलशीसूनुरलसः ।
कलः कण्ठे नादः क इव मशके किंनरपतेः
कथंचित्साधर्म्ये क्षिपति नहि वैधर्म्यनियमम् ॥ ११ ॥

निमीलयतु लोचने नहि तिरस्कृतो भास्करः
श्रवः स्थगयतु स्वयं परभृतः किमु ध्वाङ्क्षति ।
स्वयं भ्रमतु बालिशो न खलु बम्भ्रमीति क्षितिः
कदर्थयतु मुष्टिभिः कथय किं नभः क्षुभ्यते ॥ १२ ॥

इति दम्भपद्धतिर्द्वितीया ।

अथ खलपद्धतिः ।

परचिन्तैकनिरताः पुत्रादिष्वप्यसङ्गिनः ।
योगिनामनुकुर्वन्ति विशृङ्खलधियः खलाः ॥ १ ॥
आत्मार्थं युक्तचित्तानां मित्रमण्डलभेदिनाम् ।
अतिलङ्घितलोकानां न वन्धः केनचित्क्वचित् ॥ २ ॥
स्नेहः शैत्यं प्रसादश्च कोपत्यागश्च जायते ।
आसन्नपरपीडार्थं निस्त्रिंशस्यासितात्मनः ॥ ३ ॥
जनित्वापि महावंशे निम्नगा वक्रचेष्टिताः ।
वैपरीत्यं वितन्वन्ति समेषु विषमेषु च ॥ ४ ॥
उत्पथादुन्नताः केचिद्बहुभङ्गभ्रमाकुलाः ।
तटस्थानपि निघ्नन्ति तरसा भिन्नसेतवः ॥ ५ ॥
केनचिद्दान्तकृत्येन कुलगोत्रविमर्दिनम् ।
मदेन वहुधा भिन्नं मातङ्गं मन्यते जनः ॥ ६ ॥
अनेकमुखपापात्मा छद्मसंदर्शिताश्रमः ।
कर्पूरप्रकृतिः कश्चित्कापेयकलहोचितः ॥ ७ ॥
छलिनं सत्कथानर्हं स्वात्मोपहतजातिकम् ।
न निगृह्णाति यः काले सोऽपि सभ्यैर्निगृह्यते ॥ ८ ॥
निगरन्तो जगत्प्राणानुद्गिरन्तो विषं मुखैः ।
दूरतः परिहर्तव्या द्विजिह्वा जिह्मवृत्तयः ॥ ९ ॥
अकिंचित्कारिणां दीनैराकृष्टगुणकर्मणाम् ।
अघाय गतसत्त्वानां दर्शनस्पर्शनादिकम् ॥ १० ॥
अधिकोन्नतैरपि सुदारुणान्वितैरसकृत्क्रमत्पशुगणाङ्घ्रिपीडितैः ।
विधिसिद्धनैकगुणसस्यसंपदां विरसैः स्वभावकठिनैरलं खलैः ॥ ११ ॥
मुक्ताहारनिषेविता अपि न तद्वृत्त्यै दिशन्त्यन्तरं
वद्धे गाढविमर्दने च न जहत्यन्योन्यसंपीडनम् ।
उष्णे शीतलतामुपेत्य शिशिरे प्राप्ते भजन्त्युष्णतां
कामान्तःपुरचेटिकाकुचतटीकाठिन्यवन्तः खलाः ॥ १२ ॥

इति खलपद्धतिस्तृतीया ।

अथ दुर्वृत्तपद्धतिः ।

गुणजालप्रकर्षोऽपि धीवरत्वेऽपि जन्मनः ।
सर्वतीर्थावगाहेऽपि नीचवृत्तिर्न शस्यते ॥ १ ॥

द्विजराजाङ्कसंसर्गोऽपि सन्मार्गाकारवानपि ।
विशुद्धिरहितः कश्चिन्न विन्दत्यकलङ्कताम् ॥ २ ॥

अवक्रस्तारकाधीशः परिपूर्णः प्रियोदयः ।
प्राचीं दिशमतिक्रम्य पतनं प्रतिपद्यते ॥ ३ ॥

पततां हन्त केषांचिद्भजते मलिनात्मनाम् ।
विशुद्धवर्णयोगोऽपि विपरीतनिमित्तताम् ॥ ४ ॥

पतनानन्तरं कृच्छ्रात्प्ररूढः शुद्धिमानपि ।
द्विजः संछाद्यते नित्यमधरेणापि रागिणा ॥ ५ ॥

जोषमेकपदे स्थित्वा संनिकृष्टान्क्षणाद्ग्रसन् ।
बहिर्दर्शितसंशुद्धिर्बकव्याहारमर्हति ॥ ६ ॥

द्विजस्य सितपक्षस्य कवेरपि निरस्यते ।
नाहंस इति साजात्यं गतिशब्दितवृत्तिभिः ॥ ७ ॥

अव्यवस्थितवृत्तानामभिन्नश्रुतिचक्षुषाम् ।
अधर्मार्जितभोगानामाशीरप्यहितोचिता ॥ ८ ॥

दुष्टैरारोपितः कश्चिदनर्थक्रिययान्वितः ।
असत्कारेण गृह्येत विशुद्धाकारवेदिभिः ॥ ९ ॥

तमः स्वभावमलिनं वृत्त्यालोकोज्झिताश्रयम् ।
दण्ड्यं मित्रेण राज्ञा च दृष्टदोषान्वयं विदुः ॥ १० ॥

जातिमात्रशरणा बहिष्कृताः केचिदादृतजघन्यवृत्तयः ।
रोषणा विपरिधाविनो मुधा ह्रेपयन्ति जनमुज्झितह्रियः ॥ ११ ॥

आलोकावधि यद्वशेन सुगतिं विन्दन्ति भूतान्यसौ
दृष्टिस्नेहविशेषतो वितनुते वंशे भुजंगभ्रमम् ।
दक्षा भोगिषु केषुचिद्विषमिता दृष्टिं निहन्तु क्षणा-
त्तानप्याशु विनाशयेत्क्षणरुचिः काचित्क्षणस्फूर्जिता ॥ १२ ॥

इति दुर्वृत्तपद्धतिश्चतुर्थी ।

अनार्यसंगतिः ।

कठिनः कृशमूलश्च दुर्लभो दधिशेखरः ।
कश्चित्कल्याणगोत्रोऽपि मनुष्यैर्नोपजीव्यते ॥ १ ॥
दुग्धपक्षः प्रतिपदं स्यात्पलाशसमाश्रितिः ।
काले घनरसौघेऽप्यरसो जीवनाशिभिः ॥ २ ॥
सतः सत्त्वविहीनानां संसर्गेणापराध्यताम् ।
कथंकारं प्रतीकारः कल्पकोटिशतैरपि ॥ ३ ॥
अपि संतापशमनाः शुद्धाः सुरभिशीतलाः ।
भुजंगसङ्गाज्जायन्ते भीषणाश्चन्दनद्रुमाः ॥ ४ ॥
नीचानुसरणान्मन्ये निसर्गपरिशुद्धयोः ।
गतिः कुटिलतां याति गङ्गायमुनयोरपि ॥ ५ ॥
मित्रे भवति वैमुख्यं मैत्री दोषाकरेण च ।
अपि तीर्थप्रसूतानां कैरवाणां रजोभृताम् ॥ ६ ॥
अपि निर्मुक्तभोगेन स्वान्तस्थविषयेक्षया ।
असद्भावाय जायेत जिह्मगेन सहासिका ॥ ७ ॥
मण्डूकराविणं सर्पं गोमुखं च मृगादनम् ।
असुहृत्त्वेन मन्येत मानयन्तं च वैरिणम् ॥ ८ ॥
घोरास्त्यक्तमिथोवैराः सौकर्यवदुपद्रवे ।
दण्डेनापि न भज्येरन्पापमण्डलमण्डलाः ॥ ९ ॥
अनाकलितमानुष्याः क्षमासंस्पर्शवर्जिताः ।
प्रतिबुद्धैर्न सेव्यन्ते पूर्वदेवविरोधिनः ॥ १० ॥
अमित्रे विश्वासः श्वपचकरके सौमिकरसः
कपाले गङ्गाम्भः खलपरिषदग्रे सुजनता ।
परिक्षीणाचारे श्रुतमनुपनीते च निगमः
स्वतः सिद्धां शुद्धिं त्यजति विपरीतं च फलति ॥ ११ ॥
तरतु विवित्सयाब्धिमधिरोहतु शैलतटीं
धमतु च धातुवर्गमभिगच्छतु शस्त्रमुखम् ।

[illegible] ।

[illegible]

[illegible] ॥ १२ ॥

[illegible] ।

अथ सत्पुरुषपद्धतिः ।

सतामिव स्फुटत्वं येषां यत्सङ्गसञ्चयोः ।
न जातु नस्स तराभ्यामिति तेषां स विश्वदृक् ॥ १ ॥
शुक्लानुगुणवृत्तानां भजतां पावनीं गतिम् ।
नित्यं विष्णुपदे वृत्तिस्तारकाणां सितात्मनाम् ॥ २ ॥
सन्नियोगेन शिष्टानां वर्णादीनां स्वसूत्रतः ।
प्रवृत्तिं च निवृत्तिं च न भिन्यात्साधुशब्दवित् ॥ ३ ॥
धर्मसेतुनिविष्टानामस्खलानां शरीरिणाम् ।
दक्षिणोत्तरवृत्तीनां दृष्टिः पापनिवर्तिनी ॥ ४ ॥
अनङ्गीकृतकामानामनुमानार्हवर्ष्मणाम् ।
धृतनिर्मलतीर्थानां भूतिलेपोऽपि भूषणम् ॥ ५ ॥
अनन्तख्यातिसंपन्नः शुद्धसत्त्वः सुधीर्बलः ।
धत्ते बहुसुखं भोगं श्रुतिदृष्टिस्थिराश्रयः ॥ ६ ॥
अहार्यः सर्वमध्यस्थः काञ्चनद्युतिमुद्वहन् ।
सत्पदक्षिणयोग्यत्वमुपयाति सदोन्नतः ॥ ७ ॥
पुण्यगन्धाः सुमनसः प्रबुद्धाः समयागमे ।
शिरसा परिगृह्यन्ते सादरं त्रिदशैरपि ॥ ८ ॥
अनुकर्तुमपह्नोतुमतिवर्तितुमीक्षितुम् ।
अशक्ये तेजसां पत्यौ मित्रतानुमतिक्षमा ॥ ९ ॥
आहितुण्डिकवृत्तीनामशेषा भोगिनः पदम् ।
न संवर्ताग्निसारथ्ये स्याता यन्मुखमारुतः ॥ १० ॥
गरुत्मति सुपक्षतां गिरिधुरंधरे धीरता-
मुदन्वति गभीरताममृतदीधितौ सौम्यताम् ।

विवस्वति च दीप्ततां विधिरुपाददानश्चिरा-
दनर्घगुणचित्रितं किमपि चित्रमासूत्रयत् ॥ ११ ॥
प्रशस्ति निन्दन्ति प्रशमसुखदिव्यामृतरस-
प्रलीनोदन्यानां परिषदि न संपत्तिसरितः ।
अमित्रोपक्षेपक्षणविगलदात्मीयपृतना-
दृढामर्दत्रस्यद्रमिडभटजङ्घाजवभृतः ॥ १२ ॥

इति महापुरुषपद्धतिः षष्ठी ।

अथ समचित्तपद्धतिः ।

पुंसः कस्यचिदास्थाने द्विजेन्द्रः सूरिसेविते ।
गुणवत्पक्षपातेऽपि मध्ये तिष्ठति मानभृत् ॥ १ ॥
देशकालविशेषेण विषमत्वसमत्ववत् ।
निशादिवसयोर्दृष्टमहोरात्रस्य न क्वचित् ॥ २ ॥
चकोरस्य दरं देवश्चक्रवाकस्य चादरम् ।
विवस्वान्नाभिसंधत्ते विश्वमेकं प्रकाशयन् ॥ ३ ॥
प्रतिगृह्णति जीमूते प्रत्यर्पयंति वा स्वयम् ।
अपूरणमपांपत्युः पूरणं च न लक्ष्यते ॥ ४
छिद्रं जनयतां तीक्ष्णैरच्छिद्रं बिभ्रतामपि ।
त्रासहीनाः सुमणयः स्वभावादुपकुर्वते ॥
अनुज्झितसुहृद्भावः सुहृदां दुर्हृदामपि ।
सम इत्येव भाव्योऽपि नम इत्येव भाव्यते
मरुद्भिः पीड्यमानोऽपि संत्यक्तोऽपि ...
विषयस्नेहरहितो रत्नदीपः प्रकाशते ॥
जनयत्यनिले दावं शमयत्यपि तोयदे ।
अभिन्नैः स्थीयते पुण्यैराश्रमारण्यपादपैः
अहार्येण कदाप्यन्यैरसंहार्येण कैरपि ।
तितिक्षाकवचेनैकः सर्वं जयति संवृ...

अमृतस्यन्दिनं कंचित्कृष्णमेघं द्विजः स्मरन् ।
उदन्यया न क्लेशन्तमुदन्वन्तं च वीक्षते ॥ १० ॥
तु धाम तमसा कृतेन किं यदि वा न वेत्ति न विधिर्न वा वयम् ।
पकारचरमं यतस्ततः प्रतियोगिनो भवति तस्य सार्थता ॥ ११ ॥
ष्वपि दोषगन्धहीनः प्रलयेऽपि स्थितिमक्षयां दधानः ।
ष्वपि भावयन्समर्थं पुरुषः कोऽपि हृदि स्थितः प्रजानाम् ॥ १२ ॥

इति समचित्तपद्धतिः सप्तमी ।

अथ सदाद्भुतपद्धतिः ।

सुवृत्तस्यावदातस्य कलापूर्णस्य सत्पतेः ।
क्षणलेशग्रहेऽपि स्यादतीर्थस्यापि तीर्थता ॥ १ ॥
प्रतिपत्प्रासितः प्रागप्यपातार्हपदाश्रितः ।
राजा तदितरो वापि नोपरागेण गृह्यते ॥ २ ॥
विषमो गुणभेदेन विकाराञ्जनयन्क्रमात् ।
समये महता योगादहंकारः प्रलीयते ॥ ३ ॥
स्वदृष्टिप्रतिघातोऽपि स्वच्छे क्वचन शोभनः ।
तत्र ह्यभिमुखः स्वात्मा झटित्येव प्रकाशते ॥ ४ ॥
शिक्षके हरिताकारो मेरौ नीलतनुर्द्विजः ।
अपूर्ववर्णवान्भाति सत्यनिष्ठे च कौशिकः ॥ ५ ॥
कलङ्किनि जले क्वापि सौरं प्रतिफलन्महः ।
तमोपहत्वं तनुते समृद्धिं च दिने दिने ॥ ६ ॥
स्वतश्चैतन्यभिन्नस्य विषमच्छिद्रभागिनः ।
कस्यचित्प्राङ्गमूलाः स्युः पुरुषार्थप्रवृत्तयः ॥ ७ ॥
महान्तं पुरुषं प्राप्य कंचित्सत्त्वप्रवर्तकम् ।
प्रतिबुद्धो जनस्तेन परमं साम्यमश्नुते ॥ ८ ॥
सूत्रं रत्नसमावेशात्क्षमसंश्रयसत्पदात् ।
तदभेदेन गृह्येत गुणसंश्रयलक्षणात् ॥ ९ ॥

एकैव गुरोर्दृष्ट्या द्वाभ्यां नापि कवेः शत् ।
न तत्त्रिभिरष्टाभिः सहस्रेणापि कस्यचित् ॥ १० ॥
रम्यातोयं त्रिदशसरिता राजनीतिः शुक्रोक्तौ
काव्यालापस्त्रिगुणकथया कामबाणानुलुब्धा ।
दारप्रीतिः प्रजननविधा जन्तुहिंसा मखेन
प्रज्ञाहीनः परहितविदा संगतः शुद्धिमेति ॥ ११ ॥
विभुर्बन्धं प्राप्य व्यतनुत विमुक्तिं भजभुवां
स्वतन्त्रोऽसौ दूतः स्वयमजनि सूतश्च भजताम् ।
प्रतिज्ञां स्वामोज्झत्स्वपदतटिनीसूनुसमरे
महद्योगात्प्रायो वहति महिमानं तदधिकम् ॥ १२ ॥

इति सदाश्रुतपद्धतिरष्टमी ।

अथ नीतिपद्धतिः ।

विक्रमाक्रान्तभुवने समे षाड्गुण्यशालिनि ।
भजति स्थिरतां लक्ष्मीः कस्मिंश्चित्पुरुषोत्तमे ॥ १ ॥
पार्थिवानां पदार्थानां स्वभूत्या चक्रवर्तिनाम् ।
सूचयत्यचिराद्भेदं छिद्रेण महतान्वयः ॥ २ ॥
सदसन्तौ विचिन्वानः समवर्ती शमप्रदः ।
अपि दण्डधरो नित्यं लोकपालः सदक्षिणः ॥ ३ ॥
यमेनोपक्रमे जानन्विश्वाधीशं व्यवस्थितम् ।
शमादिषु च तत्त्वज्ञः सनकः सिद्धिमर्हति ॥ ४ ॥
अङ्गयुक्तः कृतास्त्रश्च कुर्वन्सम्यक्पुरोविधिम् ।
विजानन्सिद्धसाध्यादीन्वैरिमन्त्रैर्न पीड्यते ॥ ५ ॥
आमाधिकरणग्राह्यमूलादिबलशालिनः ।
अहीनेऽपि नरेन्द्रस्य शक्तयः सिद्धिहेतवः ॥ ६ ॥
प्रद्युम्नो ह्यनिरुद्धात्मा स्वनाम्ना मानसोदयः ।
वीरः कश्चिद्विजानीते स्त्रीप्रायमखिलं जगत् ॥ ७ ॥

[illegible] विजिताक्षो [illegible] ।
कपिकुलैरपि स्थाने भाति वेल्लातिलङ्घिभिः ॥ ८ ॥
प्रयुक्तं मन्त्रिभिः काले भक्तिभेदपुरस्कृतम् ।
अपि ज्वलनचक्राणां साम संवननं परम् ॥ ९ ॥
विधौ लब्धधृतिर्नित्यं विनतानन्दनो द्विजः ।
नियम्यमानैः स्थानेषु भुजगैरपि भूष्यते ॥ १० ॥

नीतिः सती त्वयि परं परपुष्टया तु
पुत्रीकृतोऽसि बलिपुष्टकुलैर्यतस्त्वम् ।
दूरीकृतश्च पुरुषैस्तत एव काले
कण्ठे यदेष तव पञ्चममुच्चकार ॥ ११ ॥

विबुधमहिते नैरावैरावणः करटी मुहुः
कषतु करटं कण्डूलं स्वं क्षरन्मदकर्दमम् ।
भजतु च तटक्रीडां पीडाभिसंधिरसौ दृढं
न तु मलिनता नापि क्षोभः क्षमाभृति संभृतः ॥ १२ ॥

इति नीतिपद्धतिर्नवमी ।

अथ वदान्यपद्धतिः ।

आभिमुख्यदशामात्राद्वदान्य इव सज्जनः ।
शीघ्रं रक्तमरक्तं वा गृह्णाति स्वप्रसादतः ॥ १ ॥
अप्यनावर्जिताः स्वेन फलभारेण संनताः ।
अर्भकैरपि गृह्यन्ते साधुसंतानशालिनः ॥ २ ॥
निर्मुक्तभवनक्षेत्राः स्युः सदागतिनिर्वृताः ।
प्राप्ते भूपविपर्यासे भोगिनः खलु योगिनः ॥ ३ ॥
सर्वेषामुत्तरामाशां धनदो यः परीक्षते ।
सत्यं मनुष्यधर्मैव न तु पुण्यजनेश्वरः ॥ ४ ॥
[illegible] ।
[illegible] न हीयते ॥ ५ ॥
[illegible] ।
[illegible] ॥ ६ ॥

क्षोभितोऽपि बुधैः कश्चिद्गभीरमधुराशयः ।
चन्द्ररत्नगवाश्वादिसहितां दिशति श्रियम् ॥ ७ ॥
वदान्यश्च कदर्यश्च गृहीतस्थिरलोभतः ।
स्वानर्थान्संचिनोत्यर्थान्परानर्थैरयोजयन् ॥ ८ ॥
अनिःशेषितदातव्यं वदान्यदिति वादिनम् ।
नोपसर्पति सव्रीडा व्रीडा कुलवधूरिव ॥ ९ ॥
अपुनर्देहिशब्दार्हमप्रत्युपकृतिक्षमम् ।
अर्थिनं कुरुते कश्चित्पुनरावृत्तिवर्जितम् ॥ १० ॥
त्वचं मांसं जीवं यदपि ददुरस्थीनि पृथिवीं
श्रियं रत्नाधीशं त्रिदशतरुमैरावतमपि ।
तदेतत्प्रत्येकं मिलितमपि नालं तुलयितुं
मनस्कारोपेतस्थिरमधुरकल्पोक्तिकणिकाम् ॥ ११ ॥
अनिर्घातं धाराधरममथनीयं निधिमपा-
मकाठिन्यं चिन्तामणिमजडभूतं सुरतरुम् ।
अभित्त्वोपादाय प्रभुरपशुवृत्तिर्न सुरभिं
परार्थैकस्वार्थानकृत पुरुषानादिपुरुषः ॥ १२ ॥

इति वदान्यपद्धतिर्दशमी ।

अथ सत्कविपद्धतिः ।

अपङ्किलयितुं शुद्धाः साधुमानसवृत्तयः ।
वमन्ति श्रुतिजीवातुं ध्वनिं नवरसास्पदम् ॥ १ ॥
महापुरुषलब्धात्मा सर्गादिप्रथितोदयः ।
वश्यावदातया वाचा सेव्यते चतुराननः ॥ २ ॥
विशुद्धललिताकारा गुणालंकारशालिनी ।
सरसा भारती यस्य स सत्येकः प्रतिष्ठितः ॥ ३ ॥
कुतश्चिदचलस्थानात्प्रयान्ती सागरान्तिकम् ।
दृश्यादृश्यतनुर्भाति श्रुत्यभीष्टा सरस्वती ॥ ४ ॥
प्रभूतोदितमुक्ताभिर्भूयते सूक्तिशुक्तिभिः ।
सुदृशां कर्णपूराय तादृशः फलभेदतः ॥ ५ ॥

प्रतीपगमयमूढापि स्वाभिमुख्यं न मुञ्चति ।
कालिकेव सतां सूक्तिस्तादृशश्रुतिनन्दिनी ॥ ६ ॥
जलाशयस्य घोषेण जातलौल्यस्य भूयसा ।
कविशब्दं तिरोधाय कश्चिदर्थो न साध्यते ॥ ७ ॥
सदानवोक्तिमहितः प्रतिरुन्धन्प्रतीपगान् ।
प्रथितः काव्यनाम्नापि कविरेकः प्रकाशते ॥ ८ ॥
पूर्वकल्पप्रकारेण पुरुषार्थप्रवृत्तया ।
विचित्रसृष्ट्या विहरन्प्राप्तः कश्चिन्महाकविः ॥ ९ ॥
.... ।
.... ॥ १० ॥

मतिमन्थजवेन लब्धवर्णा प्रतिपन्ना विबुधैरनन्यभक्तैः ।
सुकवेरनघाशयस्य सूक्तिः स्वदते दुग्धपयोनिधेः सुधेव ॥ ११ ॥

मनुव्यासप्राचेतसपरिषदर्हा क्वचिदियं
सुधासिक्ता सूक्तिः स्वयमुदयमन्विच्छति जने ।
निरुन्ध्युः के विन्ध्याचलविकटसंध्यानटजटा-
परिभ्रान्ता पङ्गोरुपरि यदि गङ्गा निपतति ॥ १२ ॥

इति सत्कविपद्धतिरेकादशी ।

अथ परीक्षकपद्धतिः ।

काकानां कोकिलानां च सीमाभेदः कथं भवेत् ।
यदि विश्वसृजा साक्षान्न कृता कर्णशष्कुली ॥ १ ॥
छन्दःप्रत्ययशुद्धात्मा पश्यन्यतिगणास्थितम् ।
वर्णादिनियतं वृत्तं नियुङ्क्ते गौरवादिवित् ॥ २ ॥
सुवर्णमपि दुर्वर्णं युक्त्या दर्शयति क्वचित् ।
व्यनक्ति शुद्धिं सहसा शुचिरेकः स्वतैक्ष्ण्यतः ॥ ३ ॥
स्वच्छत्वाद्विशुद्धाना स्रोतसां कलशोदधेः ।
दोषं केऽपि न मृष्यन्ति दुष्टजिह्वेन कल्पितम् ॥ ४ ॥

[illegible] ।
गुणान् किमपि [illegible] ॥ ५ ॥
[illegible] ।
निम्नस्थितिभिरग्नौ न [illegible] परीक्ष्यते ॥ ६ ॥
मन्ये किमस्य [illegible] मौनं जयति सांप्रतम् ।
मशककणितं यत्र वीणास्वनितिरस्कृतम् ॥ ७ ॥
रत्नाभरणगोप्यानां राजान्तःपुरयोषिताम् ।
क्रीडाकङ्कणनिर्माणे काचोऽपि [illegible] कश्चित् ॥ ८ ॥
[illegible] भवति संमतः ।
तथापि [illegible] रसज्ञानुमतिक्षमा ॥ ९ ॥
नादं मङ्गलवाद्यानां नागरीनटनोचितम् ।
कृषिकर्मेषु ग्राम्येषु न मूर्च्छयति गीतवित् ॥ १० ॥

विधिमन्तरेण विहितेन कुतः पयसोऽपि [illegible] विवेकिभिः ।
कति वा दिनानि वद पर्वनिनोत्कलशीसुतः कवलयत्यलधिम् ॥ ११ ॥
भूयसीरपि कलाः कलङ्किताः प्राप्य कश्चिदपनीयते शनैः ।
एकयापि कलया विशुद्धया योऽपि कोऽपि भजते गिरीशताम् ॥ १२ ॥

इति परीक्षकपद्धतिर्द्वादशी ।

सैषा सुभाषितानां माला महनीयवर्णवृत्तगणा ।
भावुकसंख्यारूढा प्रियपद्धतिभूषिता जयति ॥ १ ॥
कविकथकसिंहकथितं कठोरललितं सुभाषितं नीवी ।
सदसद्विवेकमुखतः संमुखयति सर्वलोकहितम् ॥ २ ॥

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य वेदान्ताचार्यस्य श्रीमद्वेङ्कटनाथस्य कृतिषु सुभाषितनीवी ।